This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः श्रीमल्लारयेनमः ॥
सूत उवाच ॥ कदाचिन्नारदो योगी परानुग्रहवांछया ॥ पर्यटन् सकलांल्लो
कान् सत्यलोकमुपागमत् ॥ १ ॥ तत्र दृष्ट्वा महर्षिमद्भिः छंदोभिः परिवेष्टि
तं ॥ बालार्कप्रभया सम्यक् भासयंतं सभागृहं ॥ २ ॥ मार्कंडेयादिमुनिभिः
स्तूयमानं मुहुर्मुहुः ॥ सर्वार्थिगोचरज्ञानं सरस्वत्या समन्वितं ॥ ३ ॥ चतुर्मु
खं जगन्नाथं भक्ताभीष्टफलप्रदं ॥ प्रणम्य दंडवद्भक्त्या तुष्टाव मुनिपुं
गवः ॥ ४ ॥ संतुष्टस्तं मुनिं प्राह स्वयंभूर्वैष्णवोत्तम ॥ ४ ॥ किं दृष्टकामोसि स्व
तद्वदिष्यामि ते मुने ॥ ५ ॥ इत्याकर्ण्य वचस्तस्य मुनिर्ब्रह्माणमब्रवीत् ॥ त्व
त्तः श्रुतं मया पूर्वं सर्वमेव शुभाशुभं ॥ ६ ॥ इदानीमेकमेवास्ति श्रोतव्यं
मुनिसत्तम ॥ तद्रहस्यमपि ब्रूहि यदि तेनुग्रहो मयि ॥ ७ ॥ प्राप्ते कलियुगे घो
रे नराः पुण्यविवर्जिताः ॥ दुराचाररताः सर्वे सत्यवार्तापराङ्मुखाः ॥ ८
परापवादनिरताः परद्रव्याभिलाषिणः ॥ परस्त्रीसक्तमनसः परहिंसा
परायणाः ॥ ९ ॥ देहात्मदृष्टयो मूढा नास्तिकाः पशुबुद्धयः ॥ मातृपितृ

breaks off in the middle of लङ्. 19/15 (87)

Accession No.:- 45 M1128 (अपूर्ण)
Title:- अध्यात्म रामायण (part of ब्रह्माण्डपुराण)
Subject:- पुराण
पत्रे: 302

(1)

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वी१

कृतद्वेषाः स्त्रीदेवाः कामकिंकराः ॥१०॥ विप्रालोभग्रस्ता वेदविक्रयजीविनः ॥ ॥१॥
धनार्जनार्थमभ्यस्तविद्यामदविमोहिताः ॥११॥ त्यक्ताः स्वजातिकर्माणः प्रायशः
परवंचकाः ॥ क्षत्रियाश्च तथा वैश्याः स्वधर्मत्यागशालिनः ॥१२॥ तद्वच्छूद्राश्च रा
ये केचिद्ब्राह्मणाचारतत्पराः ॥ स्त्रियश्च प्रायशो भ्रष्टा भर्त्रवज्ञाविनिर्भयाः ॥१३
श्री श्वशुरद्रोहकारिण्ये भविष्यंति न संशयः ॥ एतेषां नष्टबुद्धीनां परलोकः कथं भ
वेत् ॥१४॥ इति चिंताकुलं चित्तं जायते मम संततं ॥ लघूपायेन येनैषां परलो
कः कथं भवेत् ॥१५॥ तमुपायमुपाख्याहि सर्वं वेत्सि यतो भवान् ॥ इत्यर्षेर्वाक्यम
ाकर्ण्य प्रत्युवाचांबुजासनः ॥१६॥ साधु पृष्टं त्वया साधो वक्ष्ये तच्छृणु नारद ॥
पुरा त्रिपुरहंतारं पार्वती भक्तवत्सलं ॥१७॥ श्रीरामतत्त्वं जिज्ञासुः पृष्टवति विनया
न्विता ॥ प्रियायै देवदेवेशः स्तत्वं गूढं व्याख्यातवान् स्वयं ॥१८॥ पुराणोत्तममध्
यात्मरामायणमिति स्मृतं ॥ तत्पार्वती जगद्धात्री पूजयित्वा दिवानिशं ॥१९
आलोचयंती स्वानंदमग्नातिष्ठति सांप्रतं ॥ प्रचरिष्यति कलौ [illegible] श्राण्य
दृष्टवत्त्वद्यदा ॥२०॥ तस्याध्ययनमात्रेण जनाः यास्यंति सद्गतिं ॥ ता
वद्विजृंभते पापं ब्रह्महत्यापुरःसरं ॥२१॥ यावज्जगति नाध्यात्मरामायण
मुदेष्यति ॥ तावत्कलेर्महोत्साहो संचरिष्यंति निर्भयाः ॥२२॥ यावज्जगति ०
यावज्जगति नाध्यात्म० तावद्यमभटाः शूराः संचरिष्यंति निर्भयाः ॥२३
॥१॥ ५

नमोस्तु ते देव जगन्निवास सर्वात्मदृक् त्वं परमेश्वरोसि॥ इच्छामि तत्त्वं पुरुषोत्तमस्य॥ स
नातनस्त्वं च सनातनोसि॥ ७॥ गोप्यं यदत्यंतमनन्यवाच्यं वदंति भक्तेषु महानुभावाः॥
तदप्यहो हं तव देव भक्ता॥ प्रियोसि मे त्वं वद यत्तु पृष्टं॥ ८॥ ज्ञानं सविज्ञानमथानुभ
क्ति वैराग्ययुक्तं च मितं विभास्व तु॥ जानाम्यहं योषिदपि त्वदुक्तं यथा तथा ब्रूहि न रंति य
न॥ ९॥ इच्छामि चात्यंत परं रहस्यं देव चाग्रे व[द] वाग्जिजाक्ष॥ श्रीरामचंद्रे खिलतत्त्वसा
रे भक्तिदृढा नो भवति प्रसिद्धा॥ १०॥ भक्तिप्रसिद्धा भवमोक्षणाय नान्यत्तमं साधन
मस्ति किंचित्॥ तथापि हृत्संशयबंधनं मे विमोक्तुमर्हस्यमलोक्तिभिस्त्वं॥ ११॥ वदं
ति रामं परमेकमाद्यं निरस्तमायागुणसंप्रवाहं॥ भजंति चाहर्निशमप्रमत्ताः परं पदं
यांति तथैव सिद्धाः॥ १२॥ वदंति केचित्परमेकरामं स्वाविद्यया संवृतमानसास्तं॥
जानाति नात्मानमतो परेण संबोधितो वेदपरात्मतत्त्वं॥ १३॥ यदि स्म जानाति कुतो वि
लापः सीताकृते तेन हृतः परेण॥ जानाति नैवं यदि केन सेव्यः स मोहितः सर्वैरपि जीव
जातैः॥ १४॥ अत्रोत्तरं किं विदितं भवद्भिस्तद्ब्रूहि [ ] मे संशयभेदवाक्यं॥ १५॥ श्रीमाहा
देव उवाच॥ धन्यासि भक्तासि परात्मनस्त्वं यज्ज्ञातुमिच्छा तव रामतत्त्वं॥ पुराणकेना
प्यपि चोदितोहं वक्तुं रहस्यं परमं निगूढं॥ १६॥ त्वमायया कल्पितमिदं च सर्व[ ]मनीय
२॥ दं तव हि स्थितो यः॥ सर्वांतरस्थोपि निगूढ आत्मा स्वमायया सर्वमिदं विसृष्टं॥ १८॥ हृ
दयाद्यमत्तमापर नोदितोहं वक्ष्ये नमस्कृत्य रघूत्तमं ते॥ रामः परात्मा प्रकृतेरनादि
रानंदकंदः पुरुषोत्तमो हि॥ १७॥ जगंति नित्यं परितो भ्रमंति यत्संनिधौ चुंबकलोहवद्धि॥
तहं न जानंति विमूढचित्ताः स्वाविद्यया संवृतमानसास्ते॥ १९॥ स्वज्ञानमप्यात्मनि

(3)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शुद्धबुद्धबोधे स्वात्मस्वरूपे यं तीह निरस्तमाये ...रमेवानुसरंति ये वै यज्ञादिसक्ताः पुरु
कर्मयुक्ताः॥ जानंति नैव स्वहृदि स्थितं वै चामिकरं कंटगतं यथाज्ञाः॥२०॥ यथा
यथाप्रकाशो न तु विद्यते रवौ ज्योतिस्वभावा परमेश्वरे तथा॥ विशुद्धविज्ञानघ
ने रघुत्तमेऽविद्या कथं स्यात्परतः परात्मनि॥२१॥ यथा हि चाक्ष्णो भ्रमता गृहादिकं
विनष्टदृष्टेर्भ्रमतीव दृश्यते॥ तथैव देहेंद्रियकर्तुरात्मनः कृतं परं यस्य जनो वि
मुह्यति॥२२॥ नाहो न रात्रिः सवितुर्यथा भवेत् प्रकाशरूपाव्यभिचारतः क्वचित्॥
ज्ञानं तथाज्ञानमिदं द्वयं हरौ रामे कथं स्यास्यति शुद्धचिद्घने॥२३॥ तस्मात्परानंद
मये रघुत्तमे विज्ञानरूपे हि न विद्यते तमः॥ अज्ञानसाक्षिण्यरविंदलोचने माया
श्रयत्वान्न र देहकारणं॥२४॥ अत्र ते कथइष्यामि रहस्यमपि दुर्लभं॥ सीता
राममरुत्सूनुसंवादं मोक्षकारणं॥२५॥ पुरा रामायणे रामो रावणं देवकंटकं
हत्वा रणे रणश्लाघी सपुत्रबलवाहनं॥२६॥ सीतया सह सुग्रीवलक्ष्मणा
भ्यां समन्वितः॥ आयोध्यामगमद्रामो हनुमत्प्रमुखैर्वृतः॥२७॥ अभिषि
क्तः परिवृतो वशिष्ठाद्यैर्महात्मभिः॥ सिंहासने समासीनः कोटिसूर्यस
मप्रभः॥२८॥ दृष्टा तदा हनुमंतं प्रांजलिः पुरतः स्थितं॥ कृतकार्यं निराकां
क्षं ज्ञानापेक्षं महामतिः॥२९॥ रामः सीतामुवाचेदं ब्रूहि तत्वं हनुमते॥ निः
कल्मषोऽयं ज्ञानस्य पात्रं नौ नित्यभक्तिमान्॥३०॥ तथेति जानकी प्राह तत्वं
रामस्य निश्चितं॥ हनुमते प्रपन्नाय सीता लोकविमोहिनी॥३१॥ सीतोवाच॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रामं विद्धि परं ब्रंह्म सच्चिदानंदमद्वयं ॥ सर्वोपाधिविनिर्मुक्तं सत्तामात्रमगोचरं ॥ ३२ ॥ आ
नंदं निर्मलं शांतं निर्विकारं निरंजनं ॥ सर्वव्यापिनमात्मानं स्वप्रकाशमकल्मषं ॥ ३३ ॥
मां विद्धि मूलप्रकृतिं सर्गस्थित्यंतकारिणीं ॥ तस्य संन्निधिमात्रेण सृजामीदमतंद्रिता ॥ ३४
तत्सान्निध्यान्मया सृष्टं तस्मिन्नारोप्यते बुधैः ॥ अयोध्यानगरे जन्म रघुवंशेतिनिर्म
ले ॥ ३५ ॥ विश्वामित्रसहायत्वं मखसंरक्षणं तथा ॥ अहल्याशापशमनं चापभंगो महे
शितुः ॥ ३६ ॥ मत्पाणिग्रहणं पश्चाद्भार्गवस्य मदक्षयः ॥ अयोध्यानगरे वासो मया द्वा
दशवार्षिकः ॥ ३७ ॥ दंडकारण्यगमनं विराधवध एव च ॥ मिथ्यामारीचमरणं छायासी
ताहृतिस्तथा ॥ ३८ ॥ जटायुषो मोक्षलाभः कबंधस्य तथैव च ॥ शबर्याः पूजनं पश्चात्सुग्री
वेण समागमः ॥ ३९ ॥ वालिनश्च वधः पश्चात्सीतान्वेषणमेव च ॥ सेतुबंधश्च जल
धौ लंकायाश्च निरोधनं ॥ ४० ॥ रावणस्य वधो युद्धे सपुत्रस्य दुरात्मनः ॥ विभीषणे रा
ज्यदानं पुष्पकेन मया सह ॥ ४१ ॥ अयोध्यागमनं पश्चाद्राज्ये रामाभिषेचनं ॥ एवमादी
नि कर्माणि मयैवाचरितान्यपि ॥ ४२ ॥ आरोपयंति रामेस्मिन्निर्विकारेखिलात्मनि ॥ ४३ ॥
न रामो गच्छति न तिष्ठति नानुशोचत्याकांक्षते त्यजति नो न करोति किंचित् ॥ आनंदमूर्तिरच
लः परिणामहीनो मायागुणाननुगतो हि तया विभाति ॥ ४४ ॥ महादेव उवाच ॥ ततो रामः
स्वयं प्राह हनुमंतमुपस्थितं ॥ शृणु तत्त्वं प्रवक्ष्यामि ह्यात्मानात्मपरात्मनां ॥ ४५ ॥ आका
शस्य यथा भेदस्त्रिविधो दृश्यते महान् ॥ जलाशये महाकाशस्तदवच्छिन्न एव हि ॥ ४६ ॥
प्रतिबिंबाख्यमपरं दृश्यते त्रिविधं नभः ॥ बुद्ध्यवच्छिन्नचैतन्यमेकं पूर्णमथापरं ॥ ४७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अभासस्त्वपरंबिंबंभुंजन्नेवंत्रिधान्वितः॥साभासबुद्धेःकर्तृत्वमविछिन्नेविकारिणी॥४८॥सा
क्षिण्यारोप्यतेभ्रांत्याजीवितंचतथाबुधेः॥अभासस्तुमृषाबुद्धिरविद्याकार्यउच्यते॥४९॥
अविछिन्नंतुतद्ब्रह्मविछेदस्तुविकल्पितः॥अविछिन्नस्यपूर्णेनएकत्वंप्रतिपद्यते॥५०॥
तत्वमस्यादिवाक्यैश्चसाभासस्यमहस्तथा॥ऐक्यज्ञानंयदोत्पन्नंमहावाक्येनचात्मनोः॥५१
तदाविद्यास्वकार्यैश्चनश्यत्येवनसंशयः॥एतद्विज्ञायमद्भक्तोमद्भावायोपपद्यते॥५२॥
मद्भक्तिविमुखानांहिशास्त्रमात्रेषुमुह्यतां॥नज्ञानंनचमोक्षःस्यात्तेषांजन्मशतैरपि॥५३॥
इदंरहस्यंहृदयंममात्मनोमयैवसाक्षात्कथितंतवानघ॥मद्भक्तिहीनायशठायनत्वया
दातव्यमैंद्रादपिराज्यतोधिकं॥५४॥श्रीमाहादेवउवाच॥एतत्तेभिहितंदेवीश्रीरामहृ
दयंमया॥अतिगुह्यतमंहृद्यंपवित्रंपापनाशनं॥५५॥साक्षाद्रामेणकथितंसर्ववेदांतसं
ग्रहं॥यःपठेत्सततंभक्त्यासमुक्तोनात्रसंशयः॥५६॥ब्रह्महत्यादिपापानिबहुजन्मार्जि
तान्यपि॥नश्यंत्येवनसंदेहोरामस्यवचनंयथा॥५७॥योतिभ्रष्टोतिपापीपरधनपर
दारेषुनित्योद्यतोवास्तेयीब्रह्मघ्नमातापितृवधनिरतोयोगिवृंदापकारी॥यःसंपू
ज्याभिरामंपठतिचहृदयंरामचंद्रस्यभक्त्यायोगींद्रैरप्यलभ्यंपदमिहलभतेसर्वदे
वैसपूज्यः॥५८॥इतिश्रीब्रह्मांड०उ०पार्व०रामहृदयंनामप्रथमोध्यायः॥१॥श्रीपार्वत्यु०
धन्यास्म्यनुगृहीतास्मिकृतार्थास्मिजगत्प्रभो॥विछिन्नोमेतिसंदेहोग्रंथिश्छिन्नोभवदनुग्र
हात्॥१॥त्वन्मुखाद्गलितंरामतत्वामृतरसायनं॥पिबंतोमेमनोदेवनतृप्यतिभवापहं॥
॥२॥श्रीरामस्यकथातत्वंसंक्षेपतोमया॥इदानींश्रोतुमिछामिविस्तरेणस्फुटाक्षरं॥
॥३॥श्रीमाहादेव०शृणुदेवीप्रवक्ष्यामिगुह्याद्गुह्यतरंमहत्॥अध्यात्मरामचरितंरामे
णोक्तंपुरामम॥४॥

तद्यत्कथयिष्यामि शृणु तापत्रयापहं। यच्छ्रुत्वा मुच्यते जंतुरज्ञानोत्थमहाभयात्॥ ५॥
प्राप्नोति परमामृद्धिं दीर्घायुः पुत्रसंततिं॥ ६॥ भूमिभारेणमग्ना दशवदनमुखाशे
षरक्षोगणानां धृत्वा गोरूपमादौ दिविजमुनिजनैः साकमब्जासनस्य॥ गत्वा लोकं
रुदंती व्यसनमुपगतं ब्रह्मणे प्राह सर्वं ब्रह्मा ध्यात्वा मुहूर्तं सकलमपि हृदावेदशेषा
त्मनत्वं॥ ७॥ तस्मात्क्षीरसमुद्रतीरमगमत् ब्रह्मा च वै वेदैष्टुतो देवाश्चाखिललोकहृ
त्स्थमजरं सर्वज्ञमीशं हरिं॥ अस्तौषीच्छ्रुतिसिद्धनिर्मलपदैः स्तोत्रैः पुराणोद्भवैः भक्त्या
गद्गदया गिरातिविमलैरानंदबाष्पैर्वृतः॥ ८॥ ततः स्फुरत्सहस्रांशुसहस्रसदृश
प्रभः॥ आविरासीद्धरिः प्राच्यां दिशि व्यपनयंस्तमः॥ ९॥ कथंचिद्दृष्टवान् ब्रह्मा दुर्द
र्शमकृतात्मनां॥ इंद्रनीलप्रतिकाशं स्मितास्यं पद्मलोचनं॥ १०॥ किरीटहारके
यूरकुंडलकटकादिभिः॥ विभ्राजमानं श्रीवत्सकौस्तुभप्रभयान्वितं॥ ११॥
स्तूयतः सनकाद्यैश्च पार्षदैः परिवेष्टितं॥ शंखचक्रगदापद्मवनमालाविराजि
तं॥ १२॥ स्वर्णयज्ञोपवीतिनं स्वर्णवर्णाम्बरेण च॥ श्रिया भक्त्या च सहितं गरुडोप
रिसंस्थितं॥ १३॥ हर्षगद्गदया वाचा स्तोतुं समुपस्थिते॥ ब्रह्मोवाच॥ नतोस्मि ते पदं
देवप्राणबुद्धीन्द्रियात्मभिः॥ यच्चिंत्यते कर्मपाशान्तु हृदि नित्यं मुमुक्षुभिः॥ १४॥
मायया गुणमय्या विसृजस्यवसि लुंपसि॥ जगद्विस्तारयन् काले यः स्वानंदानु
भवात्मकः॥ १५॥ तथा शुद्धिर्न दुष्टानां दानाध्ययनकर्मभिः॥ शुद्धात्मनां ते यशसि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सदाभक्तिमतायथा॥१६॥अतस्त्वांघ्रिमेदृष्टंचित्तदोषापनुत्तये॥सद्योनहृदयेनित्यंमु
निभिःसारवेर्धृतः॥१७॥ब्रह्माद्यैस्त्वार्थसिध्यर्थमस्माभिःपूर्वसेविनः॥अपरोक्षानु
भूत्यर्थंज्ञानिभिर्हृदिभाविनः॥१८॥तवांघ्रिपूजानिर्माल्यतुलसीमालयाविभो॥
स्पर्द्धतीवक्षसिपदंलब्ध्वापिश्रीसपत्निवत्॥१९॥अतस्त्वत्पादभक्तेषुतेभक्तिःश्रिव
धि श्रियोधिका॥भक्तिमेवाभिवांछंतितद्भक्ताःरसवेदिनः॥२०॥अतस्त्वत्पादकम
लेभक्तिरेवसदास्तुमे॥संसारामयतप्तानांभेषजंभक्तिरेवते॥२१॥इतिब्रु
वंतंब्रह्माणंबभाषेभगवान्हरिः॥किंकरोमीतितेवेधाःप्रश्रयावाचातिहर्षितः॥ २२॥
भगवन्रावणोनामपौलस्त्यतनयोमहान्॥राक्षसानामधिपतिर्मद्दत्तवरदर्पितः॥ २३॥
त्रिलोकींलोकपालांश्चबाधतेविश्वबाधकः॥मानुषेणमृतिस्तस्यमयाकल्पा
तकल्पिता॥२४॥अतस्त्वंमानुषोभूत्वाजहिदेवरिपुंप्रभो॥२५॥श्रीभगवानुवा
च॥कस्यपस्यवरोदत्तस्तपसातोषितेनमे॥याचितःपुत्रभावायतथेत्यंगीकृतं
मया॥२६॥सइदानींदशरथोभूत्वातिष्ठतिभूतले॥तस्याहंपुत्रतामेत्यकौ
शल्यायांशुभेदिने॥२७॥चतुर्द्धात्मानमेवाहंसृजामीतरयोःपृथक्॥योग
मायापिसीतेतिजनकस्यगृहेसदा॥२८॥उत्पत्स्यतेतयासार्द्धंसर्वंसंपादयाम्यहं॥
त्युक्त्वांतर्दधेविष्णुर्ब्रह्मादेवानथाब्रवीत्॥२९॥विष्णुर्मानुषरूपेणाभवि
ष्यतिरघोःकुले॥यूयंसृजध्वंसर्वेपिवानरानंशसंभवान्॥३०॥विष्णोःसा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हायं कुरु तया वत्स्यास्यति भूतले ॥ इति देवान् समादिश्य समाश्वास्य च मेदिनीं ॥
॥२१॥ अयोध्यां सत्यमवनं विज्वरः सुखमास्थितः ॥२२॥ देवाश्च सर्वे हरिरूपधारि
णः स्थितास्सहायार्थमितस्ततो हरेः ॥ महाबलाः पर्वतवृक्षयोधिनः प्रतीक्ष्यमा
णा भगवंतमीश्वरं ॥ २३॥ ॥ इति श्री० आध्यात्मरा० उमामहे० द्वितीयोध्यायः ॥२॥
अथ राजा दशरथः श्रीमान् सत्यपराक्रमः ॥ अयोध्याधिपतिर्वीरः सर्वलोकेषु विश्रु
तः ॥१॥ अनपत्यत्वदुःखेन पीडितो गुरुमेकदा ॥ वसिष्ठं मुनिशार्दूलमभिवाद्येदम
ब्रवीत् ॥२॥ स्वामिन् पुत्राः कथं मे स्युः सर्वलक्षणलक्षिताः ॥ पुत्रहीनस्य मे राज्यं
सर्वं दुःखाय कल्पते ॥३॥ ततोब्रवीद्वसिष्ठस्तं भविष्यंति सुतास्तव ॥ चत्वारः सर्वसं
पन्ना लोकपाला इवापराः ॥४॥ स त्वं शीघ्रं समानीय ऋष्यशृंगं तपोधनं ॥ अ
स्माभिः सहितः पुत्रकामेष्टिं शीघ्रमाचर ॥५॥ तथेति मुनिमानीय मंत्रिभिः
सहितः शुचिः ॥ यज्ञकर्म समारेभे मुनिभिर्वीतकल्मषैः ॥६॥ श्रद्धया हू
यमानेग्नौ तप्तजांबुनदप्रभः ॥ पायसं स्वर्णपात्रस्थं गृहीत्वोवाच हव्यवाट् ॥ ७॥
गृहाण पायसं दिव्यं पुत्रीयं देवनिर्मितं ॥ लप्स्यसे परमात्मानं पुत्रत्वेन न
न संशयः ॥८॥ इत्युक्त्वा पायसं दत्वा राज्ञे सोंतर्दधेनलः ॥ ववंदे मुनिशार्दू
लौ राजा लब्धमनोरथः ॥९॥ वसिष्ठऋष्यशृंगाभ्यामनुज्ञातो ददौ हविः ॥१०
कौशल्यायै स कैकेय्यै ह्यर्द्धमर्द्धं प्रयत्नतः ॥ ततः सुमित्रा संप्राप्ता जगृहे योत्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

केचरूं ॥ ११ ॥ कोन्ल्यातु स्वभागाद्वै दृष्टो तस्या मुदान्विता ॥ उपयुज्याचिरं सर्वास्त्रि ॥८॥
योगर्भसमन्विता ॥ १२ ॥ देवताइव नारेजुः स्वभासा राजमंदिरे ॥ दशमे मासि कौ
न्ल्यासुषुवे पुत्रमद्भयं ॥ १३ ॥ मधुमासे सिते पक्षे नवम्यां कर्कटे शुभे ॥ पुनर्वस्वृक्ष
सहिते उच्चस्थे ग्रहपंचके ॥ १४ ॥ मेषे तु लग्ने संप्राप्ते पुष्पवृष्टिसमाकुले ॥ आ
विरासीज्जगंन्नाथः परमात्मा सनातनः ॥ १५ ॥ निलोत्पलदलश्यामः पीनवा
क्षाश्चतुर्भुजः ॥ जलजारुणनेत्रांतः स्फुरत्कुंडलमंडितः ॥ १६ ॥ सहस्त्रार्कप्रतिका
शः किरिटी कुंचितालकः ॥ शंखचक्रगदापद्मवनमालाविराजितः ॥ १७ ॥ अ
नुग्रहाय भक्तानां दुष्टानां नाशनाय च ॥ करुणारससंपूर्णो विशालोत्पललोच
नः ॥ १८ ॥ श्रीवत्सहारकेयूरनुपुरादिविभूषणः ॥ दृष्ट्वा तं परमात्मानं कौशल्या
विस्मयाकुला ॥ १९ ॥ हर्षाश्रुपूर्णनयनानत्वा प्रांजलिरब्रवीत् ॥ कौशल्योवाच ॥
देवदेव नमस्तेस्तु शंखचक्रगदाधर ॥ परमात्माच्युतोनंतः पूर्णस्त्वं पुरुषोत्त
म ॥ २० ॥ वदंत्यगोचरं वाचा बुद्ध्यादीनामतिंद्रियं ॥ २१ ॥ त्वां वेदवादिनः सत्तामा
त्रं ज्ञानैकविग्रहं ॥ त्वमेव मायया विश्वं सृजस्यवति हंति च ॥ २२ ॥ सत्वादि
सूर्यए गुणसंयुक्तः [illegible] त्वामलः सदा ॥ करोषीव न कर्त्ता त्वं गच्छसीव न गच्छसि ॥ २४ ॥
८ न शृणोषि शृणोषीव पश्यसीव न पश्यसि ॥ अप्राणो ह्यमना शुद्धस्त्वादि

(10)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तावत्सर्वाणि शास्त्राणि विवदंति परस्परं॥ २३॥ यावज्जगतिनोध्यात्मरामाय
णमुदेष्यति॥ तावत्तत्त्वरूपं रामस्य दुर्बोधं विदुषामपि॥ २४॥ [illegible]
अध्यात्मरामायणसंकीर्तनश्रवणादिजं॥ फलं वक्तुं न शक्नोमि कार्त्स्न्येन मुनि
सत्तम॥ २५॥ तथापि तस्य माहात्म्यं वक्ष्ये किंचित्तवानघ॥ शृणु चित्तं समाधा
य शिवेनोक्तं पुरा मम॥ २६॥ अध्यात्मरामायणतः श्लोकं श्लोकार्धमेव वा॥ यः प
ठेद्भक्तिसंयुक्तः सपापान्मुच्यते क्षणात्॥ २७॥ यस्तु प्रत्यहमध्यात्मरामा
यणो मनन्यधीः॥ यथाशक्ति पठेद्भु न्मास जिवन्मुक्त उच्यते॥ २८॥ योभ्यस्मा
२ र्चयतेध्यात्मरामायणमतंद्रितः॥ दिने दिनेश्वमेधस्य फलं तस्य भवेन्मुने॥ २९॥
पदच्छयापि योध्यात्मरामायणमनादरात्॥ अनेन्यतः शृणुयात्पाप्मा सोपि पापे
प्रमुच्यते॥ ३०॥ नमस्करोति योध्यात्मरामायणमदूरतः॥ सर्वदेवा
र्चनफलं संप्राप्नोति न संशयः॥ ३१॥ लिखित्वा पुस्तकेध्यात्मरामायण
मन्त्रोपेतः॥ योदद्याद्रामभक्तेभ्यः॥ तस्य पुण्यफलं शृणु॥ ३२॥ अधीतेषु
चवेदेषु शास्त्रेषु व्याख्यातेषु च यत्फलं दुर्लभं लोके तत्फलं तस्य संभवेत्॥ ३३
एकादशीदिनेध्यात्मरामायणमुपोषितः॥ योरामभक्तसदसी व्या
करोति नरोत्तमः॥ ३४॥ तस्य पुण्यफलं वक्ष्ये शृणु वेदवसत्तम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रत्यक्षरं तु गायत्री पुरश्चर्या फलं भवेत् ॥ ३५ ॥ उपवासव्रतं कृत्वा श्रीराम नवमी दिने ॥ रात्रौ जागरितो ध्यात्म रामायणमनन्यधीः ॥ ३६ ॥ यः
पठेच्छृणुयाद्वापि तस्य पुण्यं वदाम्यहं ॥ कुरुक्षेत्रादि निखिले पुण्यतीर्थेष्वनेकशः ॥ ३७ ॥ अतुल्यधनं सूर्यग्रहणे सर्वतो मुख ॥ विप्रेभ्यो व्यासमुख्येभ्यो दत्वा यत्फलमश्नुते ॥ नेफलं संभवेत्तस्य सत्यं सत्यं न संशयः ॥ ३८ ॥ योगी पठेन्मुदाध्यात्म रामायणमहर्निशं ॥ आज्ञां तस्य प्रतीक्षंते देवाः रुद्रपुरोगमाः ॥ ४० ॥
पठन्नध्यात्म रामायणमनुभ्रमन् ॥ यद्यत्करोति तत्कर्म तत्तत्कोटीगुणं भवेत् ॥ ४१ ॥ ततः श्रीरामहृदयं यः पठेत्सुसमाहितः ॥ स ब्रह्मघ्नोपि पूतात्मा त्रिभिरेव दिनैर्भवेत् ॥ ४२ ॥ श्रीरामहृदयं यस्तु हनुमत्प्रतिमांतिके ॥ त्रिः पठेत्प्रत्यहं मौनी स सर्वेप्सि[illegible]भवेत् ॥ ४३ ॥ पठेच्छ्री

रामहृदयं तु तस्य स्वच्छयोयद्दि॥ प्रदक्षिणां प्रकुर्वित ब्रह्महत्या निवर्त्तते॥४४॥ श्री
रामगीतामाहात्म्यं कृत्स्नं जानाति शंकरः॥ तदर्धं गिरिजा वेत्ति तदर्धं वेद्म्यहं मुने॥४५॥
तन्ते किंचित्प्रवक्ष्यामि कृत्स्नं वक्तुं न शक्यते॥ यज्ज्ञात्वा तत्क्षणाल्लोकश्चित्तशु
द्धिमवाप्नुयात्॥४६॥ श्रीरामगीता यत्पापं नो नाशमेष्यति नारद॥ तन्नपश्याम्य
हं लोके मार्गमाणोपि सर्वदा॥४७॥ रामोपनिषत्सिंधुमन्मथ्योत्सारिता
लक्ष्मणायार्पितां गीतां सुधां पिबामरो भवेन॥४८॥ जमदग्निसुतः पूर्वं कार्त्त
वीर्यवधेच्छया॥ धनुर्विद्यामभ्यसितुं महेशस्यान्तिके वसन्॥४९॥ अधीय
मानां पार्वत्या रामगीतां प्रयत्नतः॥ श्रुत्वाग्रहीत्सुपठन् रामायणकल्याणमगा
त्॥५०॥ ब्रह्महत्यादिपापानां निष्कृतिं यदि वांछसि॥ रामगीतां मासमात्रं प
ठित्वा मुच्यते नरः॥५१॥ दुःप्रतिग्रह दुर्भोज्य दुरालाप दिसंभवं॥ पापं सकृत्
कीर्त्तनेन रामगीता विनाशयेत्॥५२॥ शालग्रामशिलाग्रे च तुलस्यश्वत्थ
सन्निधौ॥ यतीनां पुरतस्तद्वद्रामगीतां पठेत्तु यः॥५३॥ स तत्फलमवा
प्नोति यद्वाचोनपि गोचरं॥ रामगीतां पठन्नाद्ये यः श्राद्धे भोजयेद्द्विजा
न्॥५४॥ तस्य ते पितरः सर्वे यांति विष्णोः परं पदं॥५५ एकादश्यां निराहा
तो नियतो द्वादशी दिने॥५५॥ स्थित्वागस्त्यतरोर्मूले रामगीतां पठेत्तु यः॥
हाकृत्याचावक्ष्य॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स एव राघवः साक्षात्सर्वदेवैस्सुपूज्यते ॥५६॥ विना ध्यानं विना दानं विना तीर्थावगाहनं ।
रामगीतां नरो धीत्य तदनंतफलं भवेत् ॥५७॥ बहुनात्र किमुक्तेन शृणु नारद तत्वतः ॥ श्रु
तिस्मृतिपुराणेतिहासागमशतानि च ॥५८॥ अर्हंति नाल्पमध्यात्मरामायणकलामपि ॥ सूत ॥४॥
उवाच ॥ अध्यात्मरामचरितस्य मुनीश्वराय माहात्म्यमेतदुदितं कमलासनेन ॥ यः
श्रद्धया पठति वा शृणुयात्स मर्त्यः प्राप्नोति विष्णुपदवीं सुरपूज्यमानः ॥ इति श्री
ब्रह्मांडपुराणे उत्तरखंडे एकाषष्टितमोध्यायः ॥ ॥ ब्रह्मोवाच ॥ यः पृथ्वीभर
वारणाय दिविजैः संप्रार्थितश्चिन्मयः संजातः पृथ्वीतले रविकुले मायामनुष्योव्य
यः ॥ निश्चक्रं हतराक्षसः पुनरगाद्ब्रह्मत्वमाद्यं स्थिरां कीर्तिं पापहरां विधाय जगतां
तं जानकीशं भजे तं ॥१॥ विश्वोद्भवस्थितिलयादिषु हेतुमेकं मायाश्रयं विगतमाय
मचिंत्यमूर्तिं ॥ आनंदसांद्रममलं निजबोधरूपं सीतापतिं विदिततत्वमहं नमा
मि ॥२॥ पठंति ये नित्यमनन्यचेतसः शृण्वंति चाध्यात्मिकसंज्ञितं शुभं ॥ रामा
यणं सर्वपुराणसंमतं निर्धूतपापा हरिमेव यांति ते ॥३॥ आध्यात्मरामायण
मेव नित्यं पठेद्यदिच्छेद्भवबंधमुक्तिं ॥ गवां सहस्रायुतकोटिदानेजं फलं ल
ल्ले यः शृणुयात्स नित्यं ॥४॥ पुरारिगिरिसंभूता श्रीरामार्णवसंगता ॥ अध्या
त्मरामगंगेयं पुनाति भुवनत्रयं ॥५॥ कैलासाग्रे कदाचिद्रविशतविमले मंदि
॥४॥ रे रत्नपीठे संविष्टं त्रिनयनमभयं सेवितं सिद्धसंघैः ॥ देवी वामांकसंस्था ।
गिरिवरतनया पार्वती भक्तिनम्रा प्राहेदं देवमीशं सकलमलहरं वाक्यमा
नंदकंदं ॥६॥ श्री पार्वत्युवाच ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तुतिरब्रवीत्॥२४॥समःसर्वेषुभूतेषुतिष्टन्नपिनलक्ष्यसे॥अज्ञानध्वांतचि
त्तानांव्यक्तएवसुमेधसां॥२५॥जठरेतवदृश्यंतेब्रह्मांडाःपरमाणवः॥त्वंममोदर
संभूतइतिलोकान्विडंबसे॥२६॥भक्तेषुपारतंत्र्यंतेसदृष्टंमेद्यरघूत्तम॥संसारसा
गरेमग्नापतिपुत्रधनादिषु॥२७॥भ्रमामिमाययातेद्यपादमूलमुपागता॥
देवत्वद्रूपमेतन्मेसदातिष्टतुमानसे॥२८॥आवृणोतुनमांमायातवविश्ववि
मोहिनी॥२९॥उपसंहरविश्वानूरूपंतेपारलोकिकं॥दर्शयस्वमहानंदबाल
भावंसुकोमलं॥ललितालिंगनालापैस्तरिष्याम्युत्कटंतमः॥३०॥श्रीभगवानु०
यद्यदिष्टंतवास्त्यंबतत्तद्भवतुनान्यथा॥अहंतुब्रह्मणापूर्वंभूमेर्भारापनु
त्तये॥३१॥प्रार्थितोरावणंहंतुंमानुषत्वमुपागतः॥त्वयादशरथेनाहं
तपसाराधितःपुरा॥३२॥मत्पुत्रत्वाभिकांक्षिण्यातथाकृतममेतद्रितो॥रूपमेतत्व
यादृष्टंप्राक्तनंतपसःफलं॥३३॥मद्दर्शनंविमोक्षायकल्पतेह्यन्यदुर्ल
भं॥संवादमावयोर्यस्तुपठेद्वाशृणुयादपि॥३४॥सयातिममसारूप्यंमरणे
मत्स्मृतिंलभेत्॥इत्युक्त्वामातरंरामोबालोभूत्वारुरोदह॥३५॥बालत्वेपींद्र
नीलाभोविशालाक्षोतिसुंदरः॥बालारुणप्रतीकाशोलालिताखिलचाप
लः॥३६॥अथराजादशरथःश्रुत्वापुत्रोद्भवोत्सवं॥आनंदार्णवमग्नोसौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चार्यैयो गुरुणा सह ॥ ३७ ॥ रामं राजिवपत्राक्षं दृष्ट्वा हर्षाश्रुनं युतः ॥ गुरुणा जा
तकर्माणि कर्त्तृव्यानि चकार सः ॥ ३८ ॥ कैकयी चाथ भरत मस्तूत कमं लक्ष्मणा ॥
सुमित्रायां यमौ जातौ पूर्णेंदुसदृशाननौ ॥ ३९ ॥ तदा ग्रामसहस्राणि ब्राह्मणेभ्यो
ददौ मुदा ॥ वेसूर्णानि च रत्नानि वासांसि सुभीः शुभाः ॥ ४० ॥ यस्मिन्नुरंभ
ते मुनयो विद्यया ज्ञाननिश्चया ॥ तं गुरुः प्राह सुनैयौ रामेति रमणाद्रामइ स
पि ॥ ४१ ॥ भरणाद्भरतो नाम लक्ष्मणं लक्षणान्वितं ॥ शत्रुघ्नं शत्रुहंतारमेव
गुरुरभाषत ॥ ४२ ॥ लक्ष्मणो रामचंद्रेण शत्रुघ्नो भरतेन च ॥ द्वंद्वीभूतनच
रं तौ तौ पायसांशानुसारतः ॥ ४३ ॥ रामस्तु लक्ष्मणेनाथ विचरन्नु बा
ललीलया ॥ रमयामास पितरौ चेष्टितैर्मुखभाषितैः ॥ ४४ ॥ भालेस्वर्ण
मपाश्वस्थपर्णमुक्ताफलप्रभं ॥ कंठे रत्नमणिव्रातं मध्यद्वीपिनखांचितं ॥ ४५
कर्णयोः स्वर्णसंपन्नरत्नार्जुनसत्कुलं ॥ सिंजानमणिमंजीर कटिसूत्रां
गदैर्युतं ॥ ४६ स्मितवक्त्रा ल्पदशनं इंद्रनीलसमप्रभं ॥ अंगने रंगमानं
म तं भर्भकाननुसंवेतः ॥ ४७ दृष्ट्वा दशरथो गौरो कौशल्या मुमुदे तदा ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भोक्ष्यमाणो दशरथो राममेहीति चासकृत् ॥४८॥ आव्रज्य स निहार्देन प्रेमा
नायाति लीलया ॥ अनयेति च कौशल्या मोहसास्मितास्थलं ॥४९॥ धावत्य
पि न शक्नोति स्प्रष्टुं योगिमनोतिगं ॥ प्रसहेनु स्वयं यथायाति कृद्धं मां किंतु
पाणिनं ॥५०॥ किंचिन्नेहीहि वाक वदं ॥ पुनरेव पलायते ॥ एवं मानंदसंदोह
जगदानंदकारकं ॥५१॥ मायाबालवपुर्धारं मयामास दंपती ॥ अथ कौ
लेनैते सर्वे कौमारं प्रतिपेदिरे ॥५२॥ उपनीता वशिष्ठेन सर्वविद्याविशार
दाः ॥ धनुर्वेदे च निरताः सर्वशास्त्रास्त्रवेदिनः ॥५३॥ बभुर्मनुजगतानाथा
लीलया नररूपिणः ॥ लक्ष्मणस्तु सदा राममनुगच्छति सादरं ॥५४॥ सेव्य
सेचकभावेन शत्रुघ्नो भरतं तथा ॥ रामश्चापधरो नित्यं तूणीबाणान्वि
तः प्रभुः ॥५५॥ अश्वारूढो वनं याति मृगयार्थे सलक्ष्मणः ॥ हत्वा दुष्टमृगा
न्नन्यानु पित्रे सर्वं न्यवेदयत् ॥५६॥ प्रातरुत्थाय सुस्नातः पितरावभिवा
द्य चापि पौरकार्याणि सर्वाणि करोति विनयान्वितः ॥५७॥ बंधुभिः सहि
तो नित्यं प्रभुः कामुनिभिरन्वहं ॥ धर्मशास्त्ररहस्यानि शृणोति व्याक
रोत्यपि ॥५८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्ट्वा रामं परात्मानं ॥ जातं ज्ञात्वा स्वमायया ॥ ~~प्रस्थाप्य स्वमुनिं~~ ॥ दशरथस्यो राजा प्रस्थ
प्रायाच्चरणौ ॥ २॥४४
एवं परात्मा मनुजावतारो मनुष्यलोकाननुसृत्य सर्वं ॥ चक्रे विकारी परि १०
णामहीनो विचार्यमाणे न करोति किंचित् ॥ इति श्री० उमा० बालकांडे तृतीयो ध्यायः ३ ॥
कदाचित्कौशिको भ्यायादयोध्यां ज्वलनप्रभः ॥ वशिष्टेन समागम्य पूजयत् यथा
विधि ॥ १ ॥ प्रत्युवाच मुनिं राजा प्रांजलिर्भक्तिनम्रधीः ॥ कृतार्थोस्मि मुनींद्राहं त
वागमेन कारणात् ॥ ३ ॥ त्वद्विधा गमनं यांति तत्रैवायांति संपदः ॥ यदर्थमागतो
सि त्वं ब्रूहि सत्यं करोमि तत् ॥ ४ ॥ विश्वामित्रोपि तं प्रीतः प्रत्युवाच महामतिः ॥ अ
हं पर्वणि संप्राप्ते दृष्ट्वा दृष्टुं सुरान्पितॄन् ॥ ५ ॥ यदारभे तदा दैत्या विघ्नं कुर्वंति नित्य
शः ॥ मारीचश्च सुबाहुश्चापरे चानुचरास्तयोः ॥ ६ ॥ अतस्तयोर्वधार्थाय ज्ये
ष्ठं रामं प्रयच्छ मे ॥ लक्ष्मणेन सह भ्रात्रा तव श्रेयो भविष्यति ॥ ७ ॥ वशिष्टेन सहा
स्य मंत्र्य दीयतां यदि रोचते ॥ पप्रच्छ गुरुमेकांते राजा चिंतापरायणः ॥ ८ ॥
किं करोमि गुरो रामं त्यक्तुं नोत्सहते मनः ॥ बहुवर्षसहस्रांते कष्टेनोत्पादिताः
सुताः ॥ ९ ॥ चत्वारो मरतुल्यास्ते तेषां रामोतिवल्लभः ॥ रामो यदा गच्छति चेन्न
जीवामि कथंचन ॥ १० ॥ प्रत्याख्यातो यदि मुनिः शापं दास्यत्यसंशयं ॥ कथं श्रे
२० यो भवेन्मह्यमसत्यं चापि नस्पृशेत् ॥ ११ ॥ वशिष्ठ उ० शृणु राजन्देवगुह्यं गोप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नीयंप्रयत्नतः॥रामोनमानुषोजातः परमात्मासनातनः॥१२॥अमेभौरावना
रायब्रह्मणाप्रार्थितःपुरा॥सएवजातोभवनेकौशल्यायांतवानघ॥त्वंतुप्रजाप
तिःपूर्वंकश्यपोब्रह्मणःसुतः॥१३॥कौशल्यावादितिर्देवमातापूर्वंयशस्विनी॥
भवंतौतपउग्रंवैतेपातेबहुवत्सरं॥१४॥आत्राम्यविषयोविष्णुपूजाध्यानैकत
त्परौ॥तदाप्रसन्नोभगवान्वरदोभक्तवत्सलः॥१५॥वृणीष्ववरमित्युक्तो
त्वेमेपुत्रभवामल॥इतिसयाचितोवैभगवान्भूतभावनः॥१७॥तथेत्युक्तो
घपुत्रस्तेजातोरामःसएवहि॥शेषस्तुलक्ष्मणोराजन्राममेवान्वपद्यते॥१८॥
जातोभरथशत्रुघ्नौशंखचक्रेगदाभृतः॥योगमायापिसीतेतिजातावैजनक
नंदिनी॥१९॥विश्वामित्रोपिरामायतांयोजयितुमागतः॥एतद्गुह्यतमंराजन्
नवक्तव्यंकदाचन॥२१॥अतःप्रीतेनमनसापूजयित्वाथकौशिकं॥लिनस्य
भिवात्मानंमेनेप्रमुदितांतरः॥२१॥आहूयरामरामेतिलक्ष्मणेतिचसादरं॥
आलिंग्यमूर्ध्न्यवघ्राय कौशिकायसमर्पयत्॥२२॥ततोतिहृष्टोभगवान्वि
श्वामित्रःप्रतापवान्॥आशीर्भिरभिनंद्याथराजानंरामलक्ष्मणौ॥२३॥गृहीत्वाध्व
पत्नीरोबाणखड्गधरौयुमौ॥किंचिद्दूरगमतिक्रम्यराममाहूयभक्तितः॥२४॥
ददौबलांचातिबलांविद्येद्वेदेवनिर्मिते॥ययोर्ग्रहणमात्रेणक्षुत्क्षुधमादिन
वसिष्ठेनैवमुक्तस्तुराजादशरथस्तदा×वल्ल २०
२०×श्रेयस्त्वरमानाथंराममंचसहलक्ष्मणं॥२०॥

जायते॥२५॥ततउत्तीर्यगंगांतेताटकावनमागमत्॥विश्वामित्रस्तदाप्राहरा
मंसत्यपराक्रमं॥२६॥अत्रास्तिताटकानामराक्षसीकामरूपिणी॥बाधतेलोक ११
मखिलंजहितामविचारयन्॥२७॥तथेतिधनुरादायसगुणंरघुनंदनः॥टं
कारमकरोत्तेननादेनापूरयन्वनं॥२८॥तच्छ्रुत्वासहमानासाताटकाघोररू
पिणी॥क्रोधसंमूर्छितारामसभिदुद्राववमेघवत्॥२९॥तामेकेनशरेणाथ
ताडयामासवक्षसि॥पपातविपिनेघोरावमंतीरुधिरंबहु॥३०॥ततोतिसुं
दरीयक्षीसर्वाभरणभूषिता॥शापान्मुक्ताचतांप्राप्तामुक्तारामप्रसादतः॥३१
नत्वारामंपरिक्रम्यगतारामाज्ञयादिवं॥३२॥ततोतिहृष्टःपरिरभ्यरामंमू
र्ध्नीनमाघ्रायविचिंत्यकिंचित्॥सर्वास्त्रजालंसरहस्यमंत्रंप्रीत्याभिरामा
यददौसहृष्टः॥इतिश्रीमदध्यात्म०उमा०बालका०चतुर्थोध्यायः॥४॥छ
तत्रकामाश्रमेरम्येकाननेमुनिसंकुले॥उषित्वारजनीमेकांप्रभातेप्र
स्थितास्ततः॥१॥सिद्धाश्रमंगतासर्वेसिद्धचारणसेवितं॥विश्वामि
त्रेणसंदिष्टामुनयस्तन्निवासिनः॥२॥पूजांचसत्कृतिंचक्रूरामल
क्ष्मणयोर्द्रुतं॥श्रीरामःकौशिकंप्राहमुनेदीक्षांप्रविश्यतां॥३॥दर्शय
११ स्वमहाभागकुतस्तौराक्षसाधमौ॥तथेत्युक्त्वामुनिर्यष्टुमारेभेमुनिभिः
सह॥४॥छ

२०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मध्याह्ने ददृशाते तौ राक्षसौ कामरूपिणौ ॥ मारिचश्च सुबाहुश्च वर्षंतौ रुधिरान्तौ ५
रामोपि धनुरादाय दृष्ट्वा बाणौ संदधे शुभे अक्षयात्तं समालक्ष्य विससर्ज तयोः पृथक् ॥६॥
तयोरेकं तु मारीचं भ्रामयन् शतयोजनं ॥ पातयामास जलधौ तदद्भुतमिवाभवत् ॥७॥
द्वितीयाग्निमयो बाणः सुबाहुं महत् तत्क्षणात् ॥ अपरे लक्ष्मणेनाशु हतास्तदनुयायिनः ॥८॥
पुष्पौघैरवकिरन् देवा राघवं सहलक्ष्मणं ॥ देवदुंदुभयो नेदुस्तुष्टुवुः सिद्धचारणाः ॥९॥
विश्वामित्रस्तु संपूज्य पूजार्हं रघुनंदनं ॥ अंकेनिवेश्य चालिंग्य भक्त्या बाष्पकुले
क्षणः ॥१०॥ भोजयित्वा सहभ्रात्रा रामं पक्कफलादिभिः ॥ पुराणवाक्यैर्मधुरैर्निनाय
दिवसत्रयं ॥११॥ चतुर्थेहनि संप्राप्ते कौशिको राममब्रवीत् ॥ राम राम महाभाग यज्ञं द्रष्टुं
गच्छामहे वयं ॥१२॥ विदेहराजनगरे जनकस्य महात्मनः ॥ तत्र माहेश्वरं चापमस्ति
न्यस्तं पिनाकिना ॥१३॥ द्रक्ष्यसि त्वं महासत्वं पूज्यसे जनकेन च ॥ इत्युक्त्वा मु
निस्ताभ्यां ययौ गंगासमीपगं ॥१४॥ गौतमस्याश्रमं पुण्यं यत्राहल्या स्थिता
तपः ॥ दिव्यपुष्पफलोपेतं पादपैः परिवेष्टितं ॥१५॥ मृगपक्षिगणैर्हीनं नानाजंतु
विवर्जितं ॥ दृष्ट्वोवाच मुनिं श्रीमान् रामो राजीवलोचनः ॥१६॥ कस्यैतदाश्रमपदं भा
तिभास्वद्धुनेमहत् ॥ पत्रपुष्पफलैर्युक्तं जंतुभिः परिवर्जितं ॥१७॥ आह्लादय
ति मे चित्तं भगवन् ब्रूहि तत्वतः ॥ विश्वामित्र उवाच ॥ शृणु राम पुरा वृत्तं गौतमो
लोकविश्रुतः ॥ सर्वधर्मभृतां श्रेष्ठो मुमुक्षुपरायणः ॥१८॥ तयोसार्द्धमिहावासीत्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोतमः स्तपतां वरः ॥ तत्रक्रस्तु तां धर्षयितुं मंतरे प्रेप्सुरन्वहं ॥ २० ॥ कदाचिन्मुनिवेषे ॥ १२
णनिर्गते मुनिरगृहान् ॥ २१ ॥ तां धर्षयित्वा निरगात् तेदितं मुनिरप्यगात् ॥ दृष्ट्वा
यांतं स्वरूपेण मुनिः परमकोपनः ॥ २२ ॥ पप्रच्छ कस्त्वं दुष्टात्मन् मम रूपधरोऽध
मः ॥ सत्यं ब्रूहि न चेद्भस्म करिष्यामि न संशयः ॥ २३ ॥ सोऽब्रवीद्देवराजोऽहं पाहि मां का
मकिंकरं ॥ कृतं जुगुप्सितं कर्म मया कुत्सितचेतसा ॥ २४ ॥ गोतमः क्रोधताम्रा
क्षः शशाप त्रिदशाधिपं ॥ योनिलंपट दुष्टात्मन् सहस्रभगवान् भव ॥ २५ ॥ शा
प्त्वा तं देवराजानं प्रविश्य चाश्रमं द्रुतं ॥ दृष्ट्वाहल्यां वेपमानां प्राजलिं गोतमोऽब्रवी
त् ॥ दुष्टे त्वं तिष्ठ दुर्वृत्ते शिलारूपाश्रमे मम ॥ निराहारा दिवारात्रौ तपः परम
मास्थिता ॥ २६ ॥ आतपानिलवर्षादिसहिष्णुः परमेश्वरं ॥ ध्यायंती राममेकाग्र
मनसा हृदि संस्थितं ॥ २७ ॥ नानाजंतुविहीनोयमाश्रमो मे भविष्यति ॥ एवं व
र्षसहस्त्रेषु वनेषु पवनेषु च ॥ २९ ॥ रामो दाशरथिः श्रीमानागमिष्यति सा
नुजः ॥ यदा तवाश्रमं शिला पादाभ्यामाक्रमिष्यति ॥ ३० ॥ तदैव धूतपापा त्वं रामं
संपूज्य भक्तितः ॥ परिक्रम्य नमस्कृत्य स्तुत्वा शापाद्विमोक्ष्यसे ॥ ३१ ॥ पूर्ववं
न्मम शुश्रूषां करिष्यसि यथासुखं ॥ इत्युक्त्वा गोतमो प्रागाद्धिमवंतं नगो
त्तमं ॥ ३२ ॥ तदाप्रभृत्यहल्याभूतानामदृश्या स्वाश्रमे शुभे ॥ तव पादरजःस्पर्शं
१२ कांक्षंती पापनाशनं ॥ ३३ ॥ आस्ते ह्यापि रघुश्रेष्ठ तपो दुष्करमास्थिता ॥ पा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वयस्व मुनेर्भार्यामहल्यां ब्रह्मणः सुतां॥ २४॥ इत्युक्त्वा राघवं हस्ते गृहीत्वा मुनि
पुंगवः॥ दर्शयामास चाहल्यामुग्रेण तपसा स्थितां॥ २५॥ रामः शीलां पदा स्पृ
ष्ट्वा तां चापश्यत्तपोधनां॥ ननाम राघवोहल्यां रामोहमिति चाब्रवीत्॥ २६
ततो दृष्ट्वा रघुश्रेष्ठं पीतकौशेयवाससं॥ धनुर्बाणधरं रामं लक्ष्मणेन स
न्वितं॥ २७॥ स्मितवक्त्रं पद्मनेत्रं श्रीवत्सांकितवक्षसं॥ नीलमणिक्यसंका
शं द्योतयंतं दिशोदश॥ २८॥ दृष्ट्वा रामं रमानाथं हर्षविस्फुरितेक्षणा॥ गौत
मस्य वचः स्मृत्वा ज्ञात्वा नारायणं परं॥ २९॥ संपूज्य विधिवद्राममर्घ्यादिभि
रनिंदिता॥ हर्षाश्रुजलनेत्रांता दंडवत्प्रणिपत्य सा॥ ३०॥ उत्थाय च पुनर्दृष्ट्वा
रामं राजिवलोचनं॥ पुलकांकितसर्वांगा गिरा गद्गदयैडयत्॥ ३१॥ अहील्यावाच॥
अहो कृतार्थास्मि जगन्निवास ते पदाग्रसंलग्नरजःकणानहं॥ स्पृशामि
यत्पद्मजशंकरादिभिर्विमृग्यते रंधितमानसैः सदा॥ ३२॥ अहो विचित्रं
तव राम चेष्टितं मनुष्यभावेन विमोहयज्जगत्॥ चलस्यजस्रं चरणादि
वर्जितः संपूर्णमानंदमयोतिमायिकः॥ ३३॥ यत्पादपंकजपरागपवित्र
गात्रा भागीरथी भवविरंचिमुखान्पुनाति॥ साक्षात्स एव मम दृग्विषयोय
दास्ते किं वर्ण्यते मम पुरोकृतभागधेयं॥ ३४॥ मर्त्यावतारे मनुजाकृतिं हरिं
रामाभिधेयं रमणीयदेहिनं॥ धनुर्धरं पद्मविशाललोचनं भजामि नित्यं न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परान्मजिष्ये ॥४५॥ यत्पादपंकजरजः श्रुतिभिर्विमृग्यं यन्नाभिपंकजभवः क ॥१७
मलासनश्च ॥ यन्नामसाररसिको भगवान्पुरारिस्तं रामचंद्रमनिशं हृदि भावया
मि ॥४६॥ यस्यावतारचरितानि विरंचिलोके गायंति नारदमुखा भवपद्मजा
द्याः ॥ आनंदजाश्रुपरिषिक्तकुचाग्रसीमा वागीश्वरी च मम तं शरणं प्रपद्ये ॥४७॥
सोयं परात्मा पुरुषः पुराण एषः स्वयंज्योतिरनंत आद्यः ॥ मायातनुं लोकवि
मोहनीयां धत्ते परानुग्रह एष रामः ॥४८॥ अहं हि विश्वोद्भवसंयमानामेक
स्वमायागुणबिंबितो यः ॥ विरंचिविष्णवीश्वरनामभेदान् धत्ते स्वतंत्रः
परिपूर्ण आत्मा ॥४९॥ नमोस्तु ते राम तवांघ्रिपंकजं श्रिया धृतं वक्षसि ला
लितं प्रियात् ॥ आक्रांतमेकेन जगत्त्रयं पुरा ध्येयं मुनींद्रैरभिमानवर्जितैः ॥५०
जगतामादिभूतस्त्वं जगत्त्वं जगदाश्रयः ॥ सर्वभूतेष्वसंसक्त एको भाति भ
वान्परः ॥५१॥ ओंकारवाच्यस्त्वं राम वाचामविषयः पुमान् ॥ वाच्यवा
चकभेदेन भवानेव जगन्मयः ॥५२॥ कार्यकारणकर्तृत्वफलसाधन
भेदतः ॥ एको विभासि राम त्वं मायया बहुरूपया ॥५३॥ त्वन्मायया मोहित
धियः त्वां न जानंति तत्त्वतः ॥ मानुषं त्वाभिमन्यंते मायिनं परमेश्वरं ॥५४॥
१७ आकाशवत्त्वं सर्वत्र बहिरंतर्गतोमलः ॥ असंगो ह्यचलो नित्यः शुद्धो
बुधः सदाद्वयः ॥५५॥ योषिन्मूढाहमज्ञाता तत्त्वं जाने कथं विभो तस्मात्ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्नातन्नो रामं नमस्कुर्यामनन्यधीः ॥५६॥ देवमेयत्र कुत्रापि स्थिता या अपि सर्व
दा॥ त्वत्पादकमले सक्ता भक्तिरेव सदास्तु मे ॥५७॥ नमस्ते पुरुषाध्यक्ष नम
स्ते भक्तवत्सल॥ नमस्तेस्तु हृषिकेश नारायण नमोस्तु ते॥५८॥ भवभयहर
मेकं भानुकोटिप्रकाशं करधृतशरचापं कालमेघावभासं॥ कनकरुचिरवस्त्रं
रत्नवत्कुंडलाढ्यं कमलविषदनेत्रं सानुजं राममीडे॥५९॥ स्तुत्वैवं पु
रुषं साक्षाद्राघवं पुरतस्थितं॥ परिक्रम्य प्रणम्याशु सानुज्ञाता ययौ पतिं॥६०॥
अहल्यायाकृतं स्तोत्रं यः पठेद्भक्तिसंयुतः॥ स मुच्यतेखिलैः पापैः परब्र
ह्माधिगच्छति॥६१॥ पुत्राद्यर्थे पठेद्भक्त्या रामं हृदि निधाय च॥ संवत्सरेण
लभते पुत्रं वंध्यापि पुत्रकं॥६२॥ सर्वान् कामानवाप्नोति रामचंद्रप्रसा
दतः॥६३॥ ब्रह्मघ्नो गुरुतल्पगोपि पुरुषः स्तेयी सुरापोपि वा पितृभ्रा
तृविहंसकोपि सततं भोगैकबद्धातुरः॥ नित्यं स्तोत्रमिदं जपन्र
घुपतिं भक्त्या हृदिस्थं स्मरन् ध्यायन्मुक्तिमुपैति किं पुनरसौ स्वा
चारयुक्तो नरः॥६४॥ इति श्रीमध्यात्मरामायणे उमामहेश्वरसंवा
दे ब्रह्मांडोत्तरखंडे बालकांडे पंचमोध्यायः॥५॥ महादेव उवाच॥

विश्वामित्रोथ तं प्राह राघवं सह लक्ष्मणं ॥ गच्छामो वत्स मिथिलां जनकेनाभिपालि-
तां ॥१॥ दृष्ट्वा क्रतुवरं पश्चात् अयोध्यां गंतुमर्हसि ॥ इत्युक्त्वा प्रययौ गंगां समुत्तीर्य
सहराघवः ॥२॥ विदेहस्य पुरं प्राप्य ऋषिवाटं समाविशत् ॥ प्राप्तं कौशिकमाकर्ण्य
जनकोतिमुदान्वितः ॥३॥ पूजाद्रव्याणि संगृह्य सोपाध्यायः समाययौ दंडवत्प्र-
णिपत्याथ पूजयामास कौशिकं ॥४॥ पप्रच्छ राघवौ दृष्ट्वा सर्वलक्षणलक्षितौ ॥
द्योतयंतौ दिशः सर्वाश्चंद्रसूर्याविवांबरे ॥ प्रत्युवाच मुनिः प्रीतो हर्षयन्
जनकं तदा ॥ पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ ॥५॥ ×कस्यैतौ नरशा-
र्दूलौ पुत्रौ देवसुतोपमौ मनःप्रीतिकरौ मेघ नरनारायणाविव ॥६॥ ×मखसं-
रक्षणार्थाय मया नीतौ पितुः पुरात् ॥ आगच्छ राघवो मार्गे ताटकां विश्वघाति-
नीं ॥८॥ शरेणैकेन हतवान् नोदितोमितविक्रमः ॥ ततो ममाश्रमं गत्वा मम य-
ज्ञविहंसकान् ॥९॥ सुबाहुप्रमुखान् हत्वा मारीचं सागरेक्षिपत् ॥ ततो गंगानदे न
पुंस्पे गौतमस्याश्रमे शुभे ॥१०॥ दृष्ट्वाहल्यां समाश्वस्य तया सत्कृत्य पूजितः ॥१०
पादांबुजरजःस्पर्शात्साऽपि शापाद्विमोचिता ॥११॥ इदानीं द्रष्टुकामस्ते गृहे
माहेश्वरं धनुः ॥ पूजितं राजभिः सर्वैर्द्रष्टुमिच्छत्यनुत्तमः ॥१२॥ अथो
॥१५ दर्शय राजेंद्र त्वं चापमनुत्तमं ॥ दृष्ट्वायोध्यां जिगमिषुः पितरं द्रष्टुमिच्छ-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्ति॥१३॥इत्युक्ता दर्शयामास पूजार्हावतिपूजयन्॥पूजयामास धर्मज्ञो विधिदृष्टेन क-
र्मणा॥१४॥ततः संप्रेषयामास मंत्रिणं बुद्धिमत्तरं॥शीघ्रमानय विश्वेशचापं रामाय दर्श-
य॥१५॥ततो गते मंत्रिवरे राजा कौशिकमब्रवीत्॥यदि रामो धनुर्धृत्वा कोट्यामारो-
पयद्गुणं॥१६॥तदा मम सुता सीता दीयते राघवाय हि॥तथेति कौशिकोऽप्याह॥रामं
संवीक्ष्य सस्मितं॥१७॥शीघ्रं दर्शय चापाग्र्यं रामायामिततेजसे॥एवं ब्रुवति मौनीन्द्रा
आगताश्चापवाहकाः॥१८॥चापं गृहीत्वा बलिनः एवं साहस्रसंख्यकाः॥घंटाश-
तसमायुक्तं मणिवस्त्रैर्विभूषितं॥१९॥दर्शयामास रामाय मंत्री मंत्रवतां वरः॥दृष्ट्वा
रामः प्रहृष्टात्मा बध्वा परिकरं दृढं॥२०॥गृहीत्वा वामहस्तेन लीलया तोलयन् धनुः
आरोपयामास गुणं पश्यत्स्वखिलराजसु॥२१॥ईषदाकर्षयामास पाणिना दक्षिणे-
न सः॥बभंजाखिलहृत्सारो दिशः शब्देन पूरयन्॥२२॥दिशाश्च विदिशाश्चैव स्व-
र्गमर्त्यरसातलं॥तदद्भुतमभूत्तत्र देवानां दिवि पश्यतां॥२३॥आच्छादयंतः कुसु-
मैर्देवास्तुष्टुविरिडिरादिवदुंदुभयो नेदुर्ननृतुश्चाप्सरोगणाः॥२४॥द्विधाभग्नं ध-
रघुद्वहं नुर्दृष्ट्वा राजालिंगयद्रघूत्तमं॥विस्मयं लेभिरे सीतामातरोंऽतःपुराजिरे॥२५॥सीता
स्वर्णमयीं मालां गृहीत्वा दक्षिणे करे॥स्मितवक्त्रा स्वर्णवर्णा सर्वाभरणभूषिता
॥२६॥मुक्ताहारैः कर्णपत्रैः क्वणच्चरणनूपुरा॥दुकूलपरिसंवीता वस्त्रांतर्व्यं-
जितस्तनी॥२७॥रामस्योपरि निक्षिप्य स्मयमाना मुदं ययौ॥ततो मुमुदिरे सर्वे रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जदाराः सहस्त्वं॥ गवाक्षजालरंध्रेभ्यो दृष्टो लोकविमोहिनी॥ ततोऽब्रवीन्मुनिं राजा प १५
त्रं प्रेषय सत्वरं॥ २९॥ राजा दशरथः शीघ्रं आगच्छतु सपुत्रकः॥ विवाहार्थे कुमाराणां
सदारः सह मंत्रिभिः॥ ३०॥ तथेति प्रेषयामास दूतांस्त्वरितविक्रमान्॥ ते गत्वा राज
न्यादूतं रामस्य श्रेयोऽन्यवेदयन्॥ ३१॥ श्रुत्वा रामकृतं राजा हर्षेण महता प्लुतः॥ मिथिला
गमनोद्योगं त्वरयामास मंत्रिणो॥ ३२॥ गच्छंतु मिथिलां सर्वे गजाश्वरथपत्तयः॥
रथमानय मे शीघ्रं गच्छाम्यद्यैव मा चिरं॥ ३३॥ वसिष्ठस्त्वग्रतो यातु सदारः स
हितोऽग्निभिः॥ राममानरमादाय मुनिर्मे भगवान् गुरुः॥ ३४॥ एवं प्रस्थाप्य सकलं
राजर्षिर्विपुलं रथं॥ महत्या सेनया सार्द्धमारुह्य त्वरितो ययौ॥ ३५॥ आगतं राघवं श्रु
त्वा॥ तदा राजा हर्षसमाकुलः॥ प्रत्युज्जगाम जनकः शतानंदपुरोधसा॥ ३६॥ यथो
क्तपूजया पूज्यं पूजयामास संस्कृतं॥ रामस्तु लक्ष्मणोपेतो ववंदे चरणौ पितुः॥
॥ ३७॥ ततो हृष्टो दशरथो रामं वचनमब्रवीत्॥ दिष्ट्या पश्यामि ते राम मुखं स्फुरदं
बुजोपमं॥ ३८॥ मुनेरनुग्रहात्सर्वं संपन्नं मम शोभनं॥ इत्युक्त्वाघ्राय मूर्द्धान
मालिंग्य च पुनः पुनः॥ ३९॥ हर्षेण महताविष्टो ब्रह्मानंदं गतो यथा॥ ततो जन
कराजेन मंदिरे संनिवेशितः॥ ४०॥ शोभने सर्वभोगाढ्ये सदारः संस्थितः सुखी
१५ ततः शुभदिने लग्ने सुमुहूर्ते रघूत्तमं॥ ४१॥ आनयामास धर्मज्ञः सभ्रातृ
पितृकं तदा॥ रत्नस्तंभसुविस्तारसुवितानसुतोरणे॥ ४२॥ मंडपे सर्वशोभा

(४४)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेः

रुपमुक्तापुष्पफलान्विते ॥ वेदविद्भिः सुसंवासः ब्रांसणैः स्वर्णभूषितैः ॥४३॥ स्व
वासिनीभिः परिवृते निष्ककं टिप्पिरावृते ॥ भेरिदुंदुभिनिर्घोषगीतनृत्यसमाकु
ले ॥४४॥ दिव्यरत्नान्वितस्वर्णपीठे रामं निवेशयन् ॥ वसिष्ठकौशिकंश्चैव शता
नंदं पुरोहितं ॥४५॥ यथाक्रमं पूजयित्वा च रामस्योभयपार्श्वयोः ॥ स्थापइत्वा च त
त्राग्निं ज्वालइत्वा यथाविधिः ॥४६॥ सीतामानीय तत्रोस्माट्यां नानारत्नविभूषि
तां सभार्यो जनकः प्रादाद्रामं राजिवलोचनं ॥४७॥ पादौ प्रक्षाल्य विधिवत्त
दपो मूर्ध्नि धारयन् ॥ या धृता मूर्ध्नि रुद्रेण केवलं याभिर्मुनिसदा ॥४८॥ ततः सीतां क
रे धृत्वा साक्षतोदकपूर्वकं ॥ रामाय प्रददौ प्रीत्या पाणिग्रहविधानतः ॥४९॥ सी
ता कमलपत्राक्षी स्वर्णमुक्तादिभूषिता ॥ दीयते मम सत्तात्तु प्रीतो भव रघु
त्तम ॥५०॥ इति प्रीतमना मनसा सीतां रामकरेर्पयत् ॥ मुमोद जनको लक्ष्मीं क्षि
राब्धिरिव विष्णवे ॥५१॥ ऊर्मिलां चौरसीं कन्यां लक्ष्मणाय ददौ तदा ॥ त
थैव भ्रातृकीर्तिं च मांडवीं भ्रातृकन्यके ॥५२॥ भरताय ददौ वैकेन्यातु भ्रा
यापरां ददौ ॥ चत्वारो दारसंपन्ना भ्रातरः शुभलक्षणाः ॥५३॥ विरेजुः प्रभ
भयासर्वे लोकपाला इवापराः ॥ ततोब्रवीद्वसिष्ठश्च विश्वामित्राय मैथि
लः ॥५४॥ जनकः स्वसुतां दत्तां नारदेनाभिलाषितां ॥ यत्सप्तमी विशुद्ध
र्थैरिष्ट्वा तां गुणेनमे ॥५५॥ सीता सुखाय समुत्पन्ना कन्यका शुभलक्षणा ॥
त्रामद्रासं मया प्रीत्या पुत्रिका भावभाविता ॥५६॥ अर्पिता प्रियय त्वायी ये रान्त्रे द्र

२१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री

हुमानेनाथैकदा नारदोभ्यागात् दिवि तिष्ठतामध्यसंस्थितेः॥ रणायन्महतीं वीणां गा ॥१८
यन्नारायणं विभुं॥ पूजितः सुखमासीनो मामुवाच सुरेवान्वितः॥ ५८॥ शृणुष्व व
चनं गुह्यं तवाभ्युदयकारणं॥ परमात्मा हृषीकेशो भक्तानुग्रहकाम्यया॥ ५९॥
देवकार्यार्थसिध्यर्थं रावणस्य वधाय च॥ जातो राम इति ख्यातो मायामानुषवेष
धृक्॥ ६०॥ आस्ते दाशरथिर्भूत्वा चतुर्धा परमेश्वरः॥ योगमाया च सीतेति जा
ता जनकवेश्मनि॥ ६१॥ एतां राघवायैव वैदेहीं सीतां प्रयत्नतः॥ नान्येभ्यः नरस्तं
पूर्वमाद्येन रामस्य परमात्मनः॥ ६२॥ इत्युक्त्वा प्रययौ देवगतिं देवमुनिस्तदा॥ तदा
प्रभृति मया सीता विष्णोर्लक्ष्मीं विभाव्यते॥ ६३॥ कथं मया राघवाय जानकी दीय
ते शुभा॥ इति चिंतासमाविष्टः कार्यमेकं विचिंतयन्॥ ६४॥ मत्सीतामुहगेहे
धनुर्न्यासभूतं मे इदं धनुः॥ ईश्वरेण पुरा क्षिप्तं पुरदाहादनंतरं॥ ६५॥ धनुरेतेन स
ज्यं कार्यमिति चिंत्य सहतं तथा॥ सीतापाणिग्रहार्थाय सर्वेषां मानुनानां॥ ६६
त्वत्प्रसादान्मुनिश्रेष्ठ रामो राजीवलोचनः॥ आगतोऽत्र धनुर्द्रष्टुं फलितो मम
नोरथः॥ ६७॥ अद्य मे सफलं जन्म रामं त्वां सह सीतया॥ एकासनस्थं पश्यामि
भ्राजमानं रविं यथा॥ ६८॥ त्वत्पादांबुजसंस्पर्शाद् अहल्या भर्तृशापतः॥ सद्य
एव विनिर्मुक्ता कोन्यस्त्वत्तोधिरक्षिता॥ ६९॥ यत्पादपंकजपरागसरागयोगी
वृंदैर्जितं भवभयं जितकालचक्रैः॥ यन्नामकीर्तनपरा जितदुःखशोका

१८

30

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवास्तमेव नग्र्यां सततं प्रपेद्ये ॥७०॥ इति स्तुवान्नृपो प्रादाद्राघवाय महात्मने ॥ दा-
नूयादिनां कोटिशतं रथा ॥ नामयुतं तथा ॥७१॥ अश्वानां नियुतं प्रादाद्गजानामयुतं
तथा ॥ पत्तीनां लक्षमेकं च दासीनां त्रिशतं ददौ ॥७२॥ दिव्यांबराणि हारांश्च मुक्तारत्न
मयोज्वलान् ॥७३॥ सीतायै जनकः प्रादात्प्रीत्या दुहितृवत्सलः ॥७३॥ वशिष्ठादी
न्सुरं पूज्य भरतं लक्ष्मणं तथा ॥ पूजयित्वा यथान्यायं तथा दशरथं नृपं ॥७४॥ प्र
स्थापयामास नृपो राजानं रघुसत्तमं ॥ सीतामालिंग्य रूदती मातरः साश्रुलोच
नाः ॥७५॥ श्वश्रूः शुश्रूषणपरा नित्यं राममनुव्रता ॥ पातिव्रत्यमुपालंब्य त्वा
तिष्ठ वत्से यथासुखं ॥७६॥ प्रयाणकाले रघुनंदनस्य भेरीमृदंगानकतूर्यघो
षैः ॥ सर्वोस्मि भेरीघननूपुरैर्वाद्दुसंमर्धितो भूत्तनयं करोत्तु ॥७७॥ इति श्री
मध्यात्मरामायणे उमामहेश्वरसंवादे बालकांडे षष्ठमोध्यायः ॥६॥ श्री ॥ छ ॥
अथ गच्छति श्रीरामे मैथिलाद्योजनत्रयं ॥ निमित्तान्यति घोराणि ददर्श नृप
सत्तमः ॥१॥ नत्वा वशिष्ठं पप्रच्छ किमिदं मुनिपुंगव ॥ निमित्तानीह दृश्यंते
विषमानि समंततः ॥२॥ वसिष्ठस्तमथ प्राह भयमागामी सूच्यते ॥ पुनरप्यभ
यं तेद्य शीघ्रमेव भविष्यति ॥३॥ मृगाः प्रदक्षिणं यांति त्वां पश्य शुभसूचकाः ॥
इत्येवं वदतस्तस्य ववौ घोरतरोनिलः ॥४॥ मुष्णंश्चक्षूंषि सर्वेषां पांसुवृष्टिभिः ॥

31

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ददर्श

र्द्धयन्॥ ततो भीष्मभगवान् जमदग्निप्रतापवान्॥५॥ नीलमेघनिभः प्रांशुर्जटाम ९९
उलमंडितः॥ धनुःपरशुपाणिश्च साक्षात्काल इवांतकः॥६॥ कार्तवीर्यांतको रामो दृप्त
क्षत्रियमर्द्दनः॥ प्राप्तो दशरथस्याग्रे कालमृत्युरिवापरः॥७॥ तं दृष्ट्वा भयसंत्रस्तो राजा
दशरथस्तदा॥ अर्घ्यादिपूजां विस्मृत्य त्राहि त्राहीति चाब्रवीत्॥८॥ दंडवत्प्रणिप
त्याह पुत्रप्राणान्प्रयच्छ मे॥ इति ब्रुवंतं राजानं अनादृत्य रघूत्तमं॥९॥ उवाच निष्ठुरं
वाक्यं क्रोधात्प्रचलितेंद्रियः॥ त्वं राम इति नाम्ना मे चरसि क्षत्रियाधमः॥१०॥ द्वंद्वयु
द्धं प्रयच्छाशु यदि त्वं क्षत्रियोऽसि मे॥ पुराणं जर्जरं चापं भंक्त्वा त्वं कथ्यसे मुधा॥११॥ इदं
तु वैष्णवं चापं नारोपयसि चेत्गुणं॥ तदा युद्धं त्वया सार्द्धं करोमि रघुवंशज॥१२॥ न चेत्
त्सर्वान्हनिष्यामि क्षत्रियांतकरोऽस्म्यहं॥ इति ब्रुवति वै तस्मिन्प्रचचाल वसुधा भृशं॥१३॥
अंधकारो बभूवाथ सर्वेषामपि चक्षुषां॥ रामो दाशरथिर्वीरो वीक्ष्य तं भार्गवं रुषा
धनुराच्छिद्य तद्धस्तादारोप्य गुणमंजसा॥ तूणीराद्बाणमादाय संधायाकृष्य वी
र्यवान्॥१५॥ उवाच भार्गवं रामं शृणु ब्रह्मन्वचो मम॥ लक्ष्यं दर्शय बाणस्य ह्यमो
घो मम सायकः॥१६॥ लोकान्पादयुगं वापि वद शीघ्रं ममाज्ञया॥ एवं वदति श्रीरामे
भार्गवो विकृताननः॥१७॥ संस्मरन्पूर्ववृत्तांतमिदं वचनमब्रवीत्॥१८॥ राम राम
७७ महाबाहो जाने त्वां परमेश्वरं॥ पुराणपुरुषं विष्णुं जगत्सर्गलयोद्भवं॥ बाल्येऽहं

32

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तपसा विष्णुमाराधयितुमंजसा ॥ चक्रतीर्थे सुमहंगशात तपसा विष्णुमन्वहं ॥ अ
तोषयन्माहात्मान नायया मुनन्यधीः ॥ २० ॥ ततः प्रसन्नो देवेशः शंखचक्रगदाध
रः ॥ उवाच मां रघुश्रेष्ठ प्रसन्नमुखपंकजं ॥ २१ ॥ श्रीभगवानुवाच ॥ उत्तिष्ठ तपसा
ब्रह्मन् फलितं ते तपो महत् ॥ मच्चिदंशेन युक्तस्त्वं जहि हैहयपुंगवं ॥ २२ ॥ कार्त
वीर्यं पितृहणं यदर्थं तपसश्रमः ॥ ततस्त्रिःसप्तकृत्वस्त्वं हत्वा क्षत्रियमंडलं ॥ २३ ॥
कृत्स्नां भूमीं कश्यपाय दत्वा शान्तिमुपावह ॥ त्रेतायुगे दाशरथिर्भूत्वा रामोहमव्ययः ॥ २४
उत्पत्स्ये परयोत्पन्नो तदा द्रक्ष्यसि मां पुनः ॥ मत्तेजः पुनरादास्ये त्वयि दत्तं मया पुनः ॥ २५
तदा तपश्चरन् लोके तिष्ठ त्वं ब्रह्मणो दिनं ॥ इत्युक्त्वांतर्दधे देवस्तथा सर्वं कृतं मया ॥ २६ ॥
स एव विष्णुस्त्वं राम जातोसि ब्रह्मणार्थितः ॥ मयि स्थितं तु यत्तेजस्तत्त्वयैव पुनराहृतं ॥ २७ ॥
अद्य मे सफलं जन्म त्वं जातोसि मम प्रभो ॥ ब्रह्मादिभिरलभ्यस्त्वं प्रकृतेः पारगो
मतः ॥ २८ ॥ त्वयि जन्मादिषड्भावा न संत्यज्ञानसंभवाः ॥ निर्विकारोसि पूर्णस्त्वं ग
मनादिविवर्जितः ॥ २९ ॥ यथा जले फेनजालो धूमो वन्हौ तथा त्वयि ॥ त्वदाधारा
त्वद्विषया माया कार्यं सृजत्यहो ॥ ३० ॥ यावन्मायावृता लोकास्तावत्त्वां न विजा
नते ॥ अविचारितसिद्धैषा विद्याविद्यानिरोधनी ॥ ३१ ॥ अविद्याकृतदेहादि
संघातप्रतिबिंबिता ॥ चिच्छक्तिर्जीवलोकेस्मिन् जीव इत्यभिधीयते ॥ ३२ ॥ या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेदेहमनःप्राप्य बुध्यादिष्वभिमानवान्॥ तावत्कर्त्तृत्वभोक्तृत्वसुखदुःखादिभाग्भ १८
वेत्॥२३॥ आत्मनःसंसृतिर्नास्ति बुद्धेर्ज्ञानं नजात्विति॥ अविवेकाद्द्वयं युक्त्वा संसारि
ति प्रवर्त्तते॥२४॥ जडस्य चित्समायोगाच्चित्त्वं भूयाच्चितस्तथा॥ जडसंगाज्जड
त्वं हि जलाग्न्योर्मेलनं यथा॥२५॥ यावत्त्वत्पादभक्तानां संगसौख्यं न विंदति॥ ताव
रवो त्संसारदुःखौघान्न निवर्त्तेन्नरः सदा॥२६॥ सत्संगलब्धया भक्त्या यदा त्वां समुपासते॥
तदा माया शनैर्याति तानवं प्रतिपद्यते॥२७॥ ततस्त्वज्ञानसंपन्नः सद्गुरुस्तस्य लभ्य
ते॥ वाक्यज्ञानं गुरोर्लब्ध्वा त्वत्प्रसादाद्विमुच्यते॥२८॥ तस्मात्त्वद्भक्तिहीनानां कल्पको
टिशतैरपि॥ नमुक्तिशंका विज्ञानशंका नैव सुखं यथा॥२९॥ अतस्त्वत्पादयुगले भ
क्तिर्मे जन्मजन्मनि॥ स्यात्त्वद्भक्तिमतां संगो विद्या याभ्यां विनश्यति॥४०॥ लोके त्वद्भ
क्तिनिरतास्त्वद्धर्मामृतवर्षिणः॥ पुनंति लोकमखिलं किं पुनः स्वकुलं भवान्॥४१॥
नमोस्तु जगतां नाथ नमस्ते भक्तिभावन॥ नमः कारुणिकानंत रामचंद्र नमोस्तु ते॥४२॥
देव यद्यत्कृतं पुण्यं मया लोकजिगीषया॥ तत्सर्वं तव बाणाय भूयाद्राम नमोस्तु ते॥४३॥
ततः प्रसन्नो भगवान् श्रीरामः करुणाकरः॥ प्रसन्नोस्मि तव ब्रह्मन्यत्ते मनसि
वर्त्तते॥४४॥ दास्ये तदखिलं काममा कुरुष्वात्र संशयं॥ ततः प्रीतेन मनसा भार्ग
१८ वो राममब्रवीत्॥४५॥ यदि मेनुग्रहो राम तवास्ति मधुसूदन॥ त्वद्भक्तसंगस्तत्सा

(३५)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दप भक्तिः सदास्तु मे॥४६॥ स्तोत्रमेतत्पठेद्यस्तु भक्तिहीनोपि सर्वदा॥ बुद्धि-
स्तस्य विज्ञानं मर्यादं तेस्मृतिस्तव॥४७॥ तिथेविराघवेनोक्तः परिक्रम्य प्रणम्य तं॥
पूजितस्तदनुज्ञातो नामेहं द्राचलमन्वगात्॥४८॥ राजा दशरथो हृष्टो रामं मत्वा नमि
वागतं॥ आलिंग्य हर्षनेत्राभ्यां जलबिंदून्समुत्सृजन्॥४९॥ ततः प्रीतेन मनसा
स्वस्थचित्तः पुरं ययौ॥ रामलक्ष्मणशत्रुघ्नभरता देवसंमिताः॥५०॥ स्वां स्वां
भार्यामुपादाय रेमिरे स्वस्वमंदिरे॥ मातापितृभ्यां संहृष्टो रामः सीतासमन्वि-
तः॥५१॥ रेमे वैकुंठभवने श्रिया सह यथा हरिः॥ युधाजिन्नाम केकेयी भ्राता
भरतमातुलः॥५२॥ भरतं नेतुमागच्छत् स्वं राज्यं प्रीतिसंयुतं॥ प्रेषयामास भर-
तं॥ राजा स्नेहसमन्वितः॥५३॥ शत्रुघ्नं चापि संपूज्य युधाजिन्नमरिंदमः॥ कौ-
शल्या सस्नुषा देवी रामेण सह सीतया॥५४॥ देवमातेव पौलोम्या शच्या श-
क्रेण शोभिता॥५५॥ साकेते लोकनाथप्रथितगुणगणो लोकसंगीतकीर्तिः
श्रीरामः सीतयास्ते रविकुलसुरनिकरानंदसंदोहमूर्तिः॥ नित्यश्रीर्निर्विका-
रो निरवधिविभवो नित्यमायानिरासो मायाकार्यानुसारी मनुजइव स-
दा भाति देवो रविकुलत्रः॥५६॥ इतिश्रीमदध्यात्मरामायणे ब्रह्मांडपु० उमा० बाल-
कांडे सप्तमोध्यायः॥७॥ बालकांड समाप्तः॥ श्लोकसंख्या ४४५ सप्तेरामभुवनौ

द्दष्टाच स्तुनरत्रिशत श्लोका मोक्षप्रदा नृणां॥
बालकांड समाप्तः॥(६५)

३५

श्रीमादेवउवाच॥एकदासुखमासीनं रामं स्वांतःपुराजिरे॥सर्वाभरणसंपन्नं ॥१९
रत्नसिंहासनेस्थितं॥१॥नीलोत्पलदलश्यामं कौस्तुभामुक्तकंधरं॥सीतया
रत्नदंडेनचामरेणविराजितं॥२॥विनोदयंतं तांबूलचर्वणादिभिरादरात्॥
नारदोवतरद्द्रष्टुमंबराद्यत्रराघवः॥३॥शुद्धस्फटिकसंकाशंशरच्चंद्रइवा
मलं॥अतर्कितमुपायातोनारदोदिव्यदर्शनः॥४॥तं दृष्ट्वासहसोत्थायरामः
प्रीत्याकृतांजलिः॥ननामसीरसाभूमौसीतयासहभक्तिमान्॥उवा
चनारदंरामःप्रीत्यापरमयायुतः॥संसारिणांमुनिश्रेष्ठदुर्लभंतवदर्श
नं॥६॥अस्माकंविषयासक्तचेतसांनितरांमुने॥अथवामेपूर्वजन्म
कृतंजन्ममहोदयं॥७॥संसारेनापिहिमुनेलभ्यतेसत्समागमः॥अ
तस्त्वद्दर्शनादेवकृतार्थोस्मिमुनीश्वर॥८॥किंकार्यंतेमयाकार्यंब्रूहि
तत्करवाणिभो॥अथतंनारदोप्याहराघवंभक्तवत्सलं॥९॥किंमोहयसि
१२ह मांरामवाक्यैर्लोकानुसारिभिः॥संसार्यहमितिप्रोक्तंसत्यमेवत्वयावि
भो॥१०॥जगतामादिभूतायासामायागृहिणीतव॥त्वत्संनिकर्षाज्जायं
॥१९ तेतस्यांब्रह्मादयःप्रजाः॥११॥त्वदाश्रयासदाभातिमायायात्रिगुणात्मिका॥

38

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूते जगत्त्रयमुक्तं सा लोहिता सर्वदा प्रजाः ॥१२॥ लोकत्रयमहागेहे गृहस्थस्त्वमुदाहृतः ॥
त्वं विष्णुर्जानकी लक्ष्मीः शिवस्त्वं जानकी शिवा ॥१३॥ ब्रह्मा त्वं जानकी वाणी सूर्यस्त्वं जा
नकी प्रभा ॥ भवान् शशांकः सीता तु रोहिणी शुभलक्षणा ॥१४॥ शक्रस्त्वमेव रामो सि पौलो
मी जानकी शुभा ॥ रामस्त्वं वरुणो भार्गवी जानकी शुभा ॥१५॥ वायुस्त्वं राम सीता तु सदा
गतिरितीरिता ॥ कुबेरस्त्वं राम सीता सर्वसंपत्प्रकीर्त्तिता ॥१६॥ रुद्राणी जानकी प्रोक्ता रुद्र
स्त्वं लोकनाशकृत् ॥ लोके स्त्रीवाचकं यद्यत्तत्सर्वं जानकी शुभा ॥१७॥ पुन्नामवाचकं या
वत्सर्वं त्वं हि राघव ॥ तस्माल्लोकत्रये देव युवाभ्यां नास्ति किंचन ॥१८॥ तदाभासो हि
तज्ञानमव्याकृतमितीर्यते ॥ तस्मान्महांस्ततः सूत्रं लिंगं सर्वात्मकं ततः ॥१९॥ अहंकार
श्च बुद्धिश्च पंच प्राणेन्द्रियाणि च ॥ लिंगमित्युच्यते प्राज्ञैर्जन्ममृत्युसुखादिमत् ॥२०॥
स एव जीवसंज्ञश्च लोके भाति जगन्मयः ॥ अवाच्यानाद्यविद्यैव कारणोपाधिरु
च्यते ॥२१॥ जाग्रत्स्वप्नसुषुप्त्याख्यसंसृतिर्या निवर्त्तते ॥ तस्या विलक्षणः साक्षी चि
न्मात्रस्त्वं रघूत्तमः ॥२२॥ स्थूलसूक्ष्मकारणाख्य उपाधित्रितयं चितेः ॥ एतैर्विशिष्टो
जीवः स्याद्वियुक्तः परमेश्वरः ॥२३॥ त्वत्त एव जगज्जातं त्वयि सर्वं प्रतिष्ठितं ॥ त
एव लीयते कृत्स्नं तस्मात्त्वं सर्वकारणं ॥२४॥ रज्जावहिमिवात्मानं जीवो ज्ञात्वा भ
यं वहेतु ॥ परात्माहमिति ज्ञात्वा भयदुःखैर्विमुच्यते ॥२५॥ चिन्मात्रज्योतिषाः
सर्वाः सर्वदेहेषु बुद्धयः ॥ त्वया यस्मात्प्रकाश्यन्ते सर्वस्यात्मा ततो भवान् ॥२६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अज्ञानाद्दृश्यते सर्वं त्वयि रज्जुभुजंगवत्॥ तज्ज्ञानाल्लीयते सर्वं तस्माज्ज्ञानं सदाभ्य ॥२०॥
सेत्॥२७॥ त्वत्पादभक्तियुक्तानां विज्ञानं भवति क्रमात्॥ तस्मात्त्वद्भक्तियुक्ता ये मु
क्तिभाजस्त एव हि॥२८॥ अहं त्वद्भक्तभक्तानां तद्भक्तानां च किंकरः॥ अतो माम
नुगृह्णीष्व मोहयस्व न मां प्रभो॥२९॥ त्वन्नाभिकमलोत्पन्नो ब्रह्मा मे जनकः
प्रभो॥ अतस्तवाहं पौत्रोऽस्मि भक्तं मां पाहि मे प्रभो॥३०॥ इत्युक्त्वा बहुशो न
त्वा॥ ध्यानंदाश्रुपरिप्लुतः॥ उवाच वचनं रामं ब्रह्मणा चोदितोऽस्म्यहं॥३१॥ राव
णोऽस्य वधार्थाय जातोऽसि रघुसत्तम॥ इदानीं राज्यरक्षार्थं पिता त्वामभिषेक्ष्य
ति॥३२॥ यदि राज्याभिसंसक्तो रावणं न हनिष्यसि॥ प्रतिज्ञा ते कृता राम भू
भारहरणाय वै॥३३॥ तत्सर्वं कुरु राजेन्द्र सत्यसंधस्त्वमेव हि॥ श्रुत्वैतदुदितं
रामो मुनिनाप्राह सस्मितं॥३४॥ शृणु नारद मे किंचिद्विद्यते विहितं क्वचित्॥
प्रतिज्ञातं च यत्पूर्वं करिष्ये तन्न संशयः॥३५॥ किंतु कालानुरोधेन तत्तत्प्रार
ब्धसंक्षयात्॥ हरिष्ये सर्वभूभारं क्रमेणासुरमंडलं॥३६॥ रावणस्य वधा
र्थाय योगं तावद्दंडकानने॥ चतुर्दशसमास्तत्र ह्युषित्वा मुनिवेषधृक्॥३७॥
सीतामिषेण तं दुष्टं सकुलं नाशयाम्यहं॥ एवं रामे प्रतिज्ञाते नारदः प्रमुमोद ह॥३८॥

॥२०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रदक्षिणात्रयं कृत्वा दंडवत्प्रणिपत्य तं ॥ अनुज्ञातश्च रामेण ययौ देवगतिं मु-
निः ॥ ३९ ॥ संवादं पठति श्रृणोति संस्मरेद्वा यो नित्यं मुनिवररामयोः सभक्त्या ॥ सं-
प्राप्नोत्यमरसुदुर्लभं विमोक्षं कैवल्यं विरतिपुरःसरं क्रमेण ॥ ४० ॥ इति श्रीअ-
मदध्यात्मरामायणे उमामहेश्वरसंवादे अयोध्याकांडे प्रथमः सर्गः ॥ श्रीराम ॥
अथ राजा दशरथः कदाचिद्रहसि स्थितः ॥ वसिष्ठं स्वकुलाचार्यमाहूयेदमभाषत ॥ १ ॥
भगवन्रामममखिलाः प्रशंसंति मुहुर्मुहुः ॥ पौराश्च नैगमा वृद्धा मंत्रिणश्च विशेषतः ॥ २ ॥
ततः सर्वगुणोपेतं रामं राजीवलोचनं ॥ ज्येष्ठं राज्येऽभिषेक्ष्यामि वृद्धोऽहं मुनिपुंगव ॥ ३ ॥
भरतो मातुलं द्रष्टुं गतः शत्रुघ्नसंयुतः ॥ अभिषेक्ष्यामहे वा श्रु भवांस्तत्रानुमो-
दितः ॥ ४ ॥ संभारान्संभ्रियतां च गच्छ मंत्रय राघवं ॥ उच्छ्रायंतां पताकाश्च
नानावर्णाः समन्विताः ॥ ५ ॥ तोरणानि विचित्राणि स्वर्णमुक्तामयानि वै ॥ आहूय
मंत्रिणं राजा सुमंत्रं मंत्रिसत्तमं ॥ ६ ॥ आज्ञापयति यत्त्वां मुनिस्तत्तत्समाश्रये ॥
यौवराज्येऽभिषेक्ष्यामि श्वोभूते रघुनंदनं ॥ ७ ॥ तथेति हर्षात्स मुनिः किं करोमीय म्मीत
भाषत ॥ तमुवाच महातेजा वसिष्ठो ज्ञानिनां वरः ॥ ८ ॥ श्वः प्रभाते मध्यकक्षे तु
कन्यकाः स्वर्णभूषिताः ॥ तिष्ठंतु षोडश गजाः स्वर्णरत्नादिभूषिताः ॥ ९ ॥ चतु-
र्दंतसमायो. तुरैरावतकुलोद्भवः ॥ नानातीर्थोदकैः पूर्णाः स्वर्णकुंभाः सह

(39)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तराः॥१०॥ छाद्यतां तत्र वै व्याघ्रचर्माणि चित्राणि चानया॥ स्वीनछत्रं रत्नदंडं मु ॥२१॥
क्तामणिविराजितं॥११॥ दिव्यमाल्यानि वस्त्राणि दिव्यान्याभरणानि च॥ मुनय
स्तल्तास्तत्र तिष्ठंतु कुलोपाध्यायः॥१२॥ नर्त्तक्यो वारमुख्याश्च गायका वेदिका
स्तथा॥ नानावादित्रकुशला वादयंतु नृपांगणे॥१३॥ हस्त्यश्वपत्तिरथयो ब
हिस्तिष्ठंतु सायुधाः॥ नगरे यानि तिष्ठंति देवनायतनानि च॥१४॥ तेषु प्रवर्त्तंतां
पूजां नानाबलिभिरादृता॥ राजानःसीमायां तु नानोपायनपाणयः॥१५॥ इ
त्यादिश्य मुनिः श्रीमान्सुमंतं नृपमंत्रिणं॥१६॥ स्वयं जगाम भवनं राघवस्या
तिभास्वरं॥ रथमारुह्य भगवान् वसिष्ठो मुनिसत्तमः॥१७॥ त्रीणि कक्ष्याण्यति
क्रम्य रथात्क्षितिमवातरत्॥ अंतःप्रविश्य नृपभवनं स्वाचार्यं तद्वागतं॥१८॥
गुरुमागतमाज्ञाय रामस्तूर्णं कृतांजलिः॥ प्रत्युद्गम्य नमस्कृत्य सदउ वद्भक्ति
संयुतः॥१९॥ स्वर्णपात्रेण पानीयमानीनाय स्वजानकी॥ रत्नासने समावे
श्य पादौ प्रक्षाल्य भक्तितः॥२०॥ तदापः शिरसा धृत्वा सीतया सह राघवः॥
धन्योस्मीति ह्यब्रवीद्रामस्तव पादांबुधारणात्॥२१॥ श्रीरामेणैवमुक्तस्त
प्रहसन्मुनिरब्रवीत्॥ त्वत्पादसलिलं धृत्वा धन्योस्मि नृद्विजापतिः॥२२॥
ग्रं श्लाघितम श्रितातेहं पादतीर्थहताशुभः॥ यदिदानीं भाषसे यत्त्वं लोकानामु

॥२१॥

40

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदे नारद तू॥२३॥ जानामि त्वां परात्मानं लक्ष्मी संजानकी श्वरं॥ देवकार्यार्थसिध्यर्थं भ
क्तानां भक्तिसिद्धये॥२४॥ रावणस्य वधार्थाय जातं जानामि राघवं॥ तथापि देवकार्यार्थं
गुह्यं नोद्घाटयाम्यहं॥२५॥ यथा त्वं मायया सर्वं करोषि रघुनंदन॥ तथैवानुविधास्येहं शि
ष्यस्त्वं गुरुमीस्वहं॥२६॥ गुरुर्गुरूणां त्वं देवः पितॄणां त्वं पितामहः॥ अंतर्यामी जगद्यंत्रवा
चकस्य जगोद्भवं॥२७॥ शुद्धसत्त्वमयं देहं धृत्वा स्वाधीनसंभवं॥ मनुष्य इह लोकेस्मि
न्भासि त्वं योगमायया यागपे रोहि त्वं समयं जाने विगर्हं दुष्टजीवनं॥२९॥ इक्ष्वाकूनां कुले
राम परमात्मा जनिष्यते॥ इति ज्ञातं मया पूर्वं ब्रह्मणा कथितं पुरा॥३०॥ ततोहं मानुषाया
रामतत्त्वसंबोधकांक्षया॥ आकर्षे गर्हितमपि त्वयाचार्य वसिष्ठये॥३१॥ ततो मनोरथा
मेघफलितो रघुनंदन॥ त्वदधीना महामाया सर्वलोकैकमोहिनी॥ मां यथा मोह
येनैव तथा कुरु रघूद्वह॥ गुरुनिष्कृतिकामस्त्वं यदि तर्हि देव मे॥३३॥ शास्त्रसंगात्स
विमुक्तं न वाच्यं कुत्रचिन्मया॥ राज्ञा दशरथेनाहं प्रेषितोस्मि रघूद्वह॥३४॥
त्वामामंत्र्य पितुं राज्ये श्वोभिषेक्ष्यति राघव॥ अद्य त्वं सीतया सार्द्धमुपवासं
यथाविधि॥३५॥ सत्वाशुचि भूमीशायी भव राम जितेंद्रियः॥ गच्छामि राजसान्नि
ध्यं त्वं तु प्रातर्गमिष्यसि॥३६॥ इत्युक्त्वा रथमारुह्य ययौ राज्ञे गुरुर्द्रुतं॥ रामोपि ल
णं दृष्ट्वा प्रसहन्निदमब्रवीत्॥३७॥ सौमित्रे यौवराज्ये मे श्वोभिषेको भविष्यति॥
निमित्तमात्रमेवाहं कर्ता भोक्ता त्वमेव हि॥३८॥ मम त्वं हि बहिः प्राणा नात्र कार्य

51

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विचारणा॥ ततो वसिष्ठेन यथा भाषितं तत्तथाकरोत्॥ ३९॥ वसीष्ठोपि नृपं गत्वा नत्वा ॥२२॥
वचनिवेदयत्॥ वसीष्ठस्य पुरोगास्ताह्वयन्तं राममभिषेचनं॥ ४०॥ यदा ते देवनगरे सु
त्वाकर्ण्य सुमानुजं गो॥ कौशल्यायै राममात्रे सुमित्रायै तथैव च॥ ४१॥ श्रुत्वा ते हर्ष
संपूर्णे ददतु हेममुत्तमं॥ तस्मै ततः प्रीतमनाः कौशल्यापि तु वत्सला॥ ४२॥ लक्ष्मीं प
र्यचरेद्देवीं रामस्यार्थप्रसिद्धये॥ सत्यवादी दशरथः करोत्येवं प्रतिश्रुतं॥ ४३॥ कैकयी
वन्नागः किंनु कामुकः किं करिष्यति॥ इति व्याकुलितात्मा सा दूर्गादेवीमपूजयत्॥ ४४॥
एतस्मिन्नन्तरे देवा देवीं वाणीमचोदयन्॥ गच्छ देवि भुवो लोकं मयाख्यायां प्रय
लतः॥ ४५॥ रामाभिषेकविघ्नार्थं यस्त्वं त्रैलवाक्मलः॥ मंथरां प्रविश्याद्य द्रौ कैकयीं
चततः परं॥ ४६॥ ततो विघ्ने प्रयुक्ते च पुनरेहि दिवं शुभे॥ तथेत्युक्त्वा तथा चक्रे
प्रविवेशाथ मंथरां॥ ४७॥ सापि कुब्जा त्रिवक्रा तु प्रासादाग्रमथारुह्य तु नग
रं परितो दृष्ट्वा सर्वतः समलंकृतं॥ ४८॥ नानातोरणसंबद्धं पताकाभिरलंकृ
तं॥ सर्वोत्सवसमायुक्तं विस्मिता पुनरागमत्॥ ४९॥ धात्रीं प्रपच्छ मातः किं नग
रं समलंकृतं॥ नानोत्सवसमायुक्ता कौशल्या चापि हर्षिता॥ ५०॥ ददाति विप्र
मुख्येभ्यो वस्त्राणि विविधानि च॥ तामुवाच तदा धात्री रामचंद्राभिषेचनं॥ ५१॥
श्वो भविष्यति तेनाद्य सर्वतोऽलंकृतं पुरं॥ तच्छ्रुत्वा हरिनागस्य कैकयीं वाकप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाक्यमब्रवीत् ॥ ५२ ॥ पर्यंकस्थां विशालाक्षीमेकांतपर्यवस्थितां ॥ किं शेते दुर्भ
गे मूढे महद्भयमुपस्थितं ॥ ५३ ॥ न जानीषेऽतिसौंदर्यमानिनी मत्तगामिनी ॥ राम
स्य राज्ञानुग्रहाद्वाभिषेको भविष्यति ॥ ५४ ॥ तच्छ्रुत्वा सहसोत्थाय कैकेयी प्रियवादि
नी ॥ तस्यै दिव्यं ददौ स्वर्णनूपुरं रत्नभूषितं ॥ ५५ ॥ हर्षस्थाने किमिति कथ्यसे भ
यमागतं ॥ भरतादधिको रामः प्रियकृन्मे प्रियंवदः ॥ ५६ ॥ कौशल्यां मां समं पश्यन्
सदा शुश्रूषते हि मां ॥ रामाद्भयं किमापन्नं तव मूढे वदस्व मे ॥ ५७ ॥ तच्छ्रुत्वा विषसा
दाथ कुब्जा कारणवैरिणी ॥ ५८ ॥ शृणु मद्वचनं देवी यथार्थं ते महद्भयं ॥ त्वां तोष
यन् सदा राजा प्रियवाक्यानि भाषते ॥ ५९ ॥ कामुकोऽतथ्यवादी च त्वां वाचा परितो
षयन् ॥ कार्यं करोति तस्या वै राममातुः सुपुष्कलं ॥ ६० ॥ मनस्येतन्निधायैव प्रे
षयामास ते सुतं ॥ भरतं मातुलकुलं प्रेषयामास सानुजं ॥ ६१ ॥ सुमित्रायां समी
चीनं भविष्यति न संशयः ॥ लक्ष्मणो राममन्वेति राज्यं सोऽनुभविष्यति ॥ ६२ ॥
भरतो राघवस्याग्रे किंकरो वा भविष्यति ॥ विवास्यते वा नगरात् प्राणैर्वा हीयते
ऽचिरात् ॥ ६३ ॥ त्वं तु दासीव कौशल्यां नित्यं परिचरिष्यसि ॥ ततोऽपि मरणं श्रेयो
यत्सापत्न्यपराभवात् ॥ ६४ ॥ अतः शीघ्रं यतस्वाद्य भरतस्याभिषेचने ॥ रामस्य
वनवासाय वर्षाणि नव पंच च ॥ ६५ ॥ ततो रूढो भवेत्पुत्रस्तव राज्ये भविष्यति ६६
उपायं ते प्रवक्ष्यामि पूर्वमेव विनिश्चितं ॥ पुरा देवासुरे युद्धे राजा दशरथः स्वयं ॥ ६७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२७॥

रुद्रेणा याचितो धन्वी सहायार्थं महारथः ॥ जगाम सेनया सार्द्धं त्वया सह शुभानने ॥६७॥
युद्धं प्रकुर्वतस्तस्य राक्षसैः सह धन्विनः ॥ तदाक्षकिलोप्यपतच्छिन्नस्तस्यैव वेदसः ॥६८॥
त्वं तु हस्तं समावेश्य कीलरंध्रे निधेयितः ॥ स्थितवत्यमितापांगी पतिप्राणपरीप्सया ॥६९
ततो हत्वासुरान्सर्वान्नृपो ददर्श वामरिंदमः ॥ आश्चर्यं परमं लेभे वामालिंग्य मुदान्वि
तः ॥७०॥ वृणुष्व यत्ते मनसि वांछितो वरदोस्म्यहं ॥ वरद्वयं वृणीष्व त्वमेवं राज्ञी वदस्म
पि ॥७१॥ त्वयोक्तं वरदो राजन्यदि दत्तं वरद्वयं ॥ त्वय्येव तिष्ठतु चिरं न्यासभूतं ममान
घ ॥७२॥ यदा मे वसरो भूयात्तदा देहि वरद्वयं ॥ तथेत्युक्त्वा ययौ राजा मंदिरं तव सु
व्रते ॥७३॥ त्वं तु विस्मृतं पूर्वमिदानीं स्मृतिमागता ॥ अतः शीघ्रं प्रविश्याद्य क्रो
धागारं रुषान्विता ॥७४॥ विमुच्य सर्वाभरणे सर्वं लोविनिकीर्य च ॥ भूमावेव श
याना त्वं तद्वी मारिष्टभामिनी ॥७५॥ यावत्सत्यं प्रतिज्ञाय राजाभीष्टं करोति
ते ॥ श्रुत्वा त्रिवक्रयोक्तं तत्तदा केकयनंदिनी ॥७६॥ तथ्यमेवाखिलं मेने दुः
संगोहितविभ्रमा ॥ तामाह केकयी हृष्टा कुतस्ते बुद्धिरीदृशी ॥७७॥ एवं त्वां
बुद्धिसंपन्नां मंथरां वक्रसुंदरीं ॥ भरतो यद्राज्यं मे भविष्यति सुतप्रियः ॥७८
ग्रामान्नूत्नं प्रदास्यामि मम त्वं प्राणवल्लभा ॥ इत्युक्त्वा कोपभवनं प्रविश्य
॥२७॥ सहसा रुषा ॥७९॥ विमुच्य सर्वाभरणं परिकीर्य समंततः ॥ भूमौ शयाना नाम

55

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लिनामलीनांबरधारिणी ॥८०॥ श्रीवाच शृणु मे कुब्जे यावद्रामो वनं व्रजेत् ॥ प्राणां
स्त्यक्ष्येथ वा चेत्के तु यास्येऽनावदेव हि ॥ ८१ ॥ निश्चयं कुरु कल्याणि कल्याणं ते भविष्य
ति ॥ इत्युक्त्वा प्रययौ कुब्जा गृहे सापि तथाकरोत् ॥ ८२ ॥ धीरोत्तमं तदयान्विता पि सुगुणा
न्वितान्वितो वाथ वानीतिज्ञो विधिवाददैशिकपरो विद्याविवेकोथवा । दुष्टानामति
पापचुम्बितधियामासंगचके चिद्गुणं जेतुं व्यापरिभाविनोत्र जगति तत्साम्यं क्रमेणो-
स्फुरं ॥ ८३ ॥ इति श्रीमद्व्यास० उमामहेश्वरसं० अयोध्या० द्वितीयोध्यायः ॥ २ ॥
ततो राजा दशरथो रामाभ्युदयकारणात् ॥ अतिरम्यमंत्री प्रहृतौ स्नानंरागृहमागम
तु ॥ १ ॥ न तत्र दृष्ट्वा प्रियां पराज्ञीं किमेतदिति विह्वलः ॥ या पुरा मंदिरं तस्मात्प्रविष्टाम
भ्यन्तरोत्तमा ॥ २ ॥ हसंती मामुपायांती सा किं नैव तत्र दृश्यते ॥ इत्यासन्यवन्तांश्चिंस
मनसाति विदूयता ॥ ३ ॥ पप्रच्छ दासीनिकरं कुत्र वः स्वामिनी शुभा ॥ नोयाति
मोयया पूर्वमप्रियाप्रियदर्शनः ॥ ४ ॥ ताधुक्तः क्रोधभवनं प्रविष्टा सैव
त्विम्हो कारणं तत्र देव बंगता निश्चितुमर्हसि ॥ ५ ॥ इत्युक्तो भयसंत्र
स्तो राजो तस्याः समीपगः ॥ उपविश्यासने देहं विमृश्य पाणिनाब्रवीत् ॥ ६ ॥
क्लिष्टोऽलं वसुधापृष्ठे पर्यंकादिं विहाय च ॥ मां वै खेदयसे भीरु यातो मानो
भिभाषसे ॥ ७ ॥ अलंकारं परित्यज्य नूनं मामलिनेवाससा ॥ किमर्थं ब्रूहि सक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२४

विधास्यन वांछितं ॥ ८ ॥ को वा न वहितं कर्त्ता नारी वा पुरुषोपि वा ॥ समेदं उपभ्रवव्य
म्म भविष्यति न संशयः ॥ ९ ॥ ब्रूहि देवी यथा प्रीतिस्तव वर्त्तयं ममागतः ॥ न दिदानीं
साधयिष्ये दुर्लभं यदपि न कथा नु ॥ १० ॥ जानासि त्वं मम स्वांतं प्रिये मां न ह्यनोस्थि
तं ॥ यथापि मो रवे दयसे वृथा न वपरिश्रमः ॥ ११ ॥ ब्रूहि किं निधनं कुर्यां नु दरिद्रं ते प्रि
यंकरं ॥ धनिनं क्षणमात्रेण निर्धनं न वाहितं ॥ १२ ॥ ब्रूहि कं वा वधिष्यामि वधार्हं
किं विमोक्ष्यते ॥ किमत्र बहुनोक्तेन प्राणानु दास्ये स्यात्ते प्रिये ॥ १३ ॥ मम प्राणास्त्रि
यतमो रामः सत्यपराक्रमः ॥ तस्यापि रोपै ब्रूहि यद्धितं तत् करोम्यहं ॥ १४ ॥ इति ब्रु
वाणं राजानं रुपं तं राघवोपरि ॥ नैर्विमज्यनेत्रे सा राजनं प्रत्यभाषत ॥ १५ ॥
यदि सत्यप्रतिज्ञोसि शपथं कुरुषे यदि यांचामे सफलां कर्त्तुं शीघ्रं मे वक्तुमर्हसि ॥
॥ १६ ॥ पूर्वं देवासुरे युद्धे मया त्वं परिरक्षितः ॥ तदा वरद्वयं दत्तं त्वया मे तुष्टचेतसा
॥ १७ ॥ तद्वयं न्यासभूतं मे स्थापितं न वसुव्रत ॥ तत्रैकेन वरेणाभिषिक्तं मे प्रि
यं सुतं ॥ १८ ॥ एभिः संभृतसंभारैर्यौवराज्याभिषेचय ॥ अपरेण वरेणाशु रा
मो गच्छतु दंडकान् ॥ १९ ॥ मुनिवेषधरः श्रीमान् जटावल्कलभूषणः ॥ चतु
॥२४॥ र्दश समास्तत्र कंदमूलफलाशनः ॥ २० ॥ पुनरायांतु तस्यां तेवने वा तिष्ठे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वयं॥ प्रभाते गच्छतु वनं रामो राजीवलोचनः॥२१॥ यदि किंचिद्विलंबेन प्रा
णांस्त्यक्षे तवाग्रतः॥ एवं सत्यप्रतिज्ञस्त्वमेतदेव मम प्रियं॥२२॥ श्रुत्वैतद्दा
रुणं वाक्यं कैकेय्या रोमहर्षणं॥ निपपात महीपालो वज्राहत इव द्रुमः॥
॥२३॥ शनैरुन्मिल्य नयनैर्विघूर्णन् परया भिया॥ दुःस्वप्नं वा मया दृष्टं भ्रमो
वा चित्तविभ्रमः॥२४॥ इत्यालोक्य पुनः पत्नीं व्याघ्रीमिव पुरस्थितां॥ किं
मिदं भाषसे भद्रे मम प्राणहरं वचः॥२५॥ रामः किमपराधं ते कृतवान् कमले
क्षणः॥ मम माग्रे राघवगुणान् वर्णयास्यनिशं शुभान्॥२६॥ कौसल्यां मां समं
पश्यन् शुश्रूषां कुरुते सदा॥ इति ब्रुवंती त्वं पूर्वमिदानीं भाषसे वृथा॥२७॥
राज्यं गृहाण पुत्राय रामस्तिष्ठतु मंदिरे॥ जनुगन्तीष्टु मां रामे रामान्नास्ति
भयं तव॥२८॥ इत्युक्त्वाश्रुपरीताक्षः पादयोर्निपपात ह॥ कैकेयी प्रत्युवा
च्चेदं सापि रक्तांतलोचना॥२९॥ उवाच किं त्वं भ्रांतोसि राजंस्त्वं भाषसे
वृथा॥ मिथ्या करोषि चेद्राजन् भाषितं नरकं भवेत्॥३०॥ वनं न गच्छेद्य
दि रामचंद्रः प्रभातकाले जिनचीरयुक्तः॥ उद्बंधनेन वा विषभक्षणं
वा ज्वालामरिष्ये पुरतस्तवाहं॥३१॥ सत्यप्रतिज्ञोहमितीह लोके विडंब
सेश सर्वसभांतरेषु॥ रामोपरि त्वं त्रापयं च छलसा मिथ्याप्रतिज्ञो नरकं
प्रयाहि॥३२॥ इत्युक्तः प्रियया दीनामग्नो दुःखार्णवे नृपः॥ मूर्छितो

57

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पतितापक्रमोऽपि संज्ञामृतकोयथा ।।३३।। एवंरात्रिर्गतातस्य दुःखात्संवत्सरो
यथा अरुणोदयकालेऽनुबंदिपोगायकागुः ।।३४।। निरैवाद्दृष्टानोन्सर्वी
नृकैकेयीरोषमास्थिता ।। ततः प्रभातेसमये मध्यकक्षामुपस्थिता ।।३५।।
ब्राह्मणाःक्षत्रियावैश्याःसर्वेप्रकृतयस्तथा ।। छत्रंचचामरंदिव्यंग
जोवाजीतथैवच ।।३६।। अन्येचवारमुख्याश्चपौराजानपदास्त
था ।। वसिष्ठेनयथाज्ञप्तं तत्सर्वंतत्रसंस्थितं ।।३७।। स्त्रियोबालाश्च
वृद्धाश्चरात्रौनिद्रांनलेभिरे ।। कदाद्रक्ष्यामहेरामंपीतकौशेयवाससं ।।
३८।। सर्वाभरणसंपन्नंकिरीटकटकोज्वलं ।। कौस्तुभाभरणंश्यामं
कंदर्पशतसुंदरं ।।३९।। अभिषिक्तंसमायांतंगजारूढंस्मिताननं ।। श्वे
तच्छत्रधरं[illegible] लक्ष्मणेनलक्षणान्वितं ।।४०।। रामंकदाद्रक्ष्यामःप्र
भातंवाकदाभवेत् ।। इत्युत्कधियःसर्वेबभूवुःपुरवासिनः ।।४१।।
नेदानीमुत्थितोराजाकिमर्थंचेत्यचिंतयन् ।। सुमित्रःज्ञात्वाकेप्रा
याद्यत्रराजावतिष्ठते ।।४२।। वर्द्धयन्नुजयेत्युक्त्वाप्रणमन्शिरसा
नृपं ।। अतिखिन्नंनृपंदृष्ट्वाकैकेयींसमपृच्छत ।।४३।। देवीकैके
यीवर्द्धस्वकिंराजाहृदयेनतथा ।। तमाहकैकेयीराजारात्रौनिद्रां

।।२५।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नलब्धवान्॥४४॥ रामरामेति रामेति राममेवानुचिंतयन्॥ प्रजागरस्ततो राजा दु
खस्तत्र न लक्ष्यते॥४५॥ राममानय सीघ्रं हि राजा द्रष्टुमिहेच्छति॥ सुमंतउवाच॥
अश्रुत्वा राजवचनं कथं गच्छामि भामिनी॥४६॥ तच्छ्रुत्वा मंत्रिणो वाक्यं राजा वच
नमब्रवीत्॥ सुमंत्र रामं द्रक्ष्यामि शीघ्रमानय सुंदरं॥ इत्युक्तस्त्वरितं गत्वा सुमंत्रो रा
ममंदिरं॥४७॥ अवारितं प्रविश्यायं राममंतरिनमब्रवीत्॥४८॥ शीघ्रमागच्छ भ
द्रं ते राम राजीवलोचन॥ पितुर्गृहं मया सार्द्धं राजा त्वां द्रष्टुमिच्छति॥४९॥ इत्यु
क्तो रथमारुह्य संभ्रमं त्वरितो ययौ॥ रामः सारथिना सार्द्धं लक्ष्मणेन समं
न्वितः॥५०॥ मध्यकक्ष्ये वशिष्ठादीन् पश्यन्नेव वरान्वितः॥ पितुः समीपे सं
गम्य ननाम चरणौ पितुः॥५१॥ राममालिंगितुं राजा समुत्थाय ससंभ्रमः॥
बाहू प्रसार्य रामेति दुःखान्मध्ये पपात ह॥५२॥ हाहेति रामस्तं शीघ्रमालि
ग्यांके निवेश्य च॥ राजानं मूर्च्छितं दृष्ट्वा चुक्रुशुः सर्वयोषितः॥५३॥ कि
मेतद्रोदनमिति वसिष्ठोऽपि समाविशत्॥ रामः पप्रच्छ किमिदं राज्ञो दुःखस्य
कारणं॥५४॥ एवं पृच्छति रामे सा कैकयी राममब्रवीत्॥५४॥ [illegible]
[illegible] त्वमेव कारणं ह्यत्र राज्ञो दुःखोपशांतये॥५५॥ किंचित्कार्यं त्वया राम
कर्त्तव्यं नृपतेर्हितं॥ कुरु सत्यप्रतिज्ञस्त्वं राजानं सत्यवादिनं॥५६॥ [illegible]
वरद्वयं दत्तं मम संतुष्टचेतसा॥ त्वदधीनं च तत्सर्वं वक्तुं वो लज्जते नृपः॥५७॥

सत्यपाशेन संबद्धं पितरं त्रातुमर्हसि॥पुत्रशब्देन चैतद्धि नरकात्त्रायते पिता॥५८॥राम
स्त्वयायोदितं श्रुत्वा शुभेनाभिहतोयथा॥अपितं कैकेयीं प्राह किं मामेवं प्रभाषसे॥५९॥
पित्रार्थं जिवितं दास्ये पिबेयं विषमुल्बणं॥सीतां त्यक्ष्येथ कौशल्यां राज्यं चापि त्यजाम्यहं॥६०॥
अनाज्ञप्तोपि कुरुते पितुः कार्यं स उत्तमः॥उक्तः करोति यः पुत्रः स मध्यम उदाहृतः॥६१॥
उक्तोपि कुरुते नैव स पुत्रो मल उच्यते॥अतः करोमि तत्सर्वं यन्मामाह पिता मम॥६२॥सत्यं
सत्यं करोम्येवं रामो मिथ्या न भाषते॥इति रामप्रतिज्ञां च श्रुत्वा वक्तुं प्रचक्रमे॥६३॥रा
मत्वदभिषेकार्थं संभाराः संभृताश्च ये॥तैरेव भरतोवश्यमभिषेकः प्रियो मम॥६४॥
अपरेण वरेणाशु चीरवासा जटाधरः॥वनं प्रयाहि शीघ्रं त्वमद्यैव पितुराज्ञया॥६५॥
चतुर्दशसमास्तत्र वसन्संस्तक्तभोजनः॥एवमेव पितुस्तेद्य कार्यं त्वं कर्तुमर्हसि॥६६॥
राज्ञा तु लज्जते वक्तुं त्वामेव रघुनंदन॥श्रीराम उवाच॥भरतस्यैव राज्यं स्यादहं गच्छामि
दंडकान्॥६७॥किंतु राजा न वक्तीह मां न जाने त्र कारणं॥श्रुत्वैतद्रामवचनं दृष्ट्वा
मंतःपुरस्थितं॥६८॥आह राजा दशरथो दुःखितो दुःखितं वचः॥स्त्रीजितं भ्रांत
हृदयं॥उन्मार्गपरिवर्त्तिनं॥६९॥निगृह्य मां गृहे पादं राज्यं प्रतिनयो भयात्॥ए
वं चेत्तान नमिवमास्थ्नो रघुनंदन॥७०॥इत्युक्त्वा दुःखसंततो विल्लापनृ
पस्तदा॥हा राम हा जगन्नाथ हा राम प्राणवल्लभ॥७१॥मां विसृज्य कथं घोर
विपिनं गंतुमिच्छसि॥इति रामं समालिंग्य मुक्तकंठं रुरोद ह॥७२॥विसृज्य नय
ने रामः पितुः सजलपिणा ना॥आश्वासयामास नृपं शनैः स नयकोदयः॥७३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किमत्र दुखेन विभो राज्यं शास्तु ममेनुजः॥ अहं प्रतिज्ञां निस्तीर्य पुनर्यास्यामि ते पुरं॥७४॥
राज्यात्कोटिगुणं सौख्यं मम राजन् वने सतः॥ नत्सत्यपालनं देवकार्यं चापि भविष्यति॥७५॥
कैकेय्याश्च प्रियो राजन्वने वासो महान्गुणः॥ इदानीं गंतुमिच्छामि क्षेतु मातुश्च हृज्ज्वरं॥७६॥
संभाराश्चोपनीयंतामभिषेकार्थमागताः॥ मातरं च समाश्वास्य अनुनीय च जान
कीं॥७७॥ अगस्त्यपादौ वंदित्वा ततो यास्ये सुखं वनं॥ इत्युक्त्वा तु परिक्रम्य मातरं दृष्टु
माययौ॥७८॥ कौशल्याऽपि हरेः पूजां कुरुते रामकारणात्॥ होमं च कारयामास ब्रा
ह्मणेभ्यो धनं ददौ॥७९॥ ध्यायंती विष्णुमेकाग्रमनसा मौनमास्थिता॥ अंतस्थमेकं
घनचित्प्रकाशं निरस्तसर्वातिशयस्वरूपं॥ विष्णुं सदानंदमयं हृदब्जे सा भावयंती
न ददर्श रामं॥८०॥ इतिश्रीमदध्यात्मरामायणे उमा॰ आयोध्याकांडे तृतीयसर्गः॥३॥
ततः सुमित्रा दृष्ट्वैव रामं राज्ञी ससंभ्रमं॥ कौशल्यां बोधयामास रामोऽयं समुपस्थितः॥
॥१॥ श्रुत्वैवं राम नामैषा बहिर्दृष्टिप्रवाहिता॥ रामं दृष्ट्वा विनिर्गत्याश्लिष्य मालिंग्यांके न्य
वेशयत्॥२॥ मूर्ध्न्यवघ्राय सुस्निग्धगात्रं नीलोत्पलछवीं॥ भुंक्ष्व पुत्रेति च प्राह मि
ष्टमन्नं क्षुधार्दिता॥३॥ रामः प्राह न मे मातः भोजनावसरः कृतः॥ दंडकागमनं शीघ्रं
मम कालोद्य निश्चितः॥४॥ कैकेयीवरदानेन सत्यसंधः पिता मम॥ भरताय ददौ
राज्यं ममाप्यारण्यमुत्तमं॥५॥ चतुर्दशसमास्तत्र ह्युषित्वा मुनिभिः सह॥ आग
मिष्ये पुनः शीघ्रं चिंतां मा कर्तुमर्हसि॥६॥ तच्छ्रुत्वा सहसोद्विग्ना मूर्छिता पुनरुत्थि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ता आह रामं स दुखार्त्तो दुखसागरसंप्लुता॥७॥यदि राम वनं सत्यं यासि चेन्न ॥२७॥
यमामपि॥त्वद्विहीना क्षणार्द्धं च जीवितं धारये कथं॥८॥यथा गौर्वत्सकं वत्सं संसक्ता
तिष्ठेन्न कुत्रचित्॥तथैव त्वं न शक्नोमि त्यक्तुं प्राणात्प्रियं सुतं॥९॥भरताय प्र
सन्नश्चेद्राज्यं राजा प्रयच्छतु॥किमर्थं वनवासाय रामाज्ञापयति प्रिया॥१०॥के
कयी वरदो राजा सर्वस्वं वा प्रयच्छतु॥त्वया किमपराद्धं हि केकेय्याश्च नृप पश्य च॥११॥
पिता गुरुर्यथा राम न वाहमधिका ततः॥पित्राज्ञप्तो वनं गंतुं वारयेम महं ततः॥१२॥
यदि गच्छसि महाबाहो मुल्लंघ्य नृपवाक्यतः॥तदा प्राणान्परित्यज्य गच्छामि यमसाद
नं॥१३॥लक्ष्मणोपि ततः श्रुत्वा कोशल्यावचनं रुषा॥उवाच राघवं वीक्ष्य दहन्नि
व जगत्त्रयं॥१४॥उवाच भ्रातर्मनसे केकयीवृत्तवर्ज्जितं॥बध्वा निहन्मि भरतं
तद्बंधून्मातुलानपि॥१५॥अद्य पश्यंतु मे शौर्यं लोकान्प्रदहतः पुरि॥रामस
म्भिषेकाय कुरु यत्नं मरिंदम॥१६॥धनुःपाणिरहं तत्र निहन्म्येव विघ्नकारिणः॥
इति ब्रुवंतं सौमित्रिमालिंग्य रघुनंदनः॥१७॥शृणु मे रघुशार्दूल मम मतं दु
हितेरतः॥जानामि सर्वं ते सत्यं किंतु ते समयो नहि॥यदिदं दृश्यते सर्वं
विश्वं राज्यदेहादिकं च तत्॥१८॥यदि सत्यं भवेत्तन्न आभ्यासः सफ
॥२७॥ श्च ते॥१९॥भोगा मेघवितानस्थ विद्युल्लेखेव चंचला॥आयुरप्यग्नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संतप्तं लोहस्थ जलबिंदुवत्॥२०॥ यथा व्यालगलस्थोपि भेको दंशानपेक्ष
ते। तथा कालाहिनाग्रस्तो लोको भोगाननुगाम्यतामू॥२१॥ करोति दुःखेन हि क
र्मसाधनं नारी रभोगार्थमहर्निशं नरः॥ देहस्तु भिन्नः पुरुषो समीक्ष्यते
को वात्र भोग्यः पुरुषेण भुज्यते॥२२॥ पितृमातृसुतभ्रातृदारबंधा
दिसंगमः॥ प्रपायामिव जंतूनां नद्यां काष्ठौघवच्चलः॥२३॥ छायेव ल
क्ष्मीश्चपला प्रतीता नानारूपमंबुमिवाभ्रवंचा॥ स्वप्नोपस्त्री सुखमायुनुर्लं
यथापि जंतोरभिमानएषेते॥२४॥ संसृतिः स्वप्नसदृशा सदा रोगादिसं
कुला गंधर्वनगरप्रख्या मूढस्तामनुवर्तते॥२५॥ आयुर्व्यं क्षियते य
स्मादादित्यस्य गतागतैः॥ दृष्ट्वान्येषां जरामृत्यू कथंचिन्न तु बुध्य
ते॥२६॥ स एव दिवः सैव रात्रिरित्येव मूढधीः॥ भोगानापतितं संत्येव
कालवेगं न पश्यति॥२७॥ प्रतिक्षणं क्षरत्येतदायुरामघटांबुवत्॥ स
पत्नीद्व वैरी घोघा नारी रैप्रहरंत्यभो॥२८॥ जराव्याधिवपुरतस्तज्जैर्य
त्यवतिष्ठते॥ मृत्युः सहैव यात्येष समयं संप्रतीक्षते॥२९॥ देहेहंभाव
मान्तो राजाहं लोकविश्रुतः॥ इत्यस्मिन्मनुते जंतुरंतेविड्भस्मसंज्ञिते॥३०॥

53

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वगस्थिमांसविण्मूत्ररेतोरक्तादिसंयुते॥ विकारीपरिणामीच्चदेहआत्माकथं ॥२८॥
वद॥३१॥यमास्थायभवांल्लोकंदग्धुमिछसिलक्ष्मण॥देहाभिमानिनःसर्वे
दोषाःप्रादुर्भवंतिहि॥३२॥देहोहमितियाबुद्धिरविद्यासाप्रकीर्तिता॥नाहंदे
हश्चिदात्मेतिबुद्धिर्विद्येतिमन्यते॥३३॥अविद्यासंसृतेर्हेतुर्विद्यातस्यानि
वर्तिका॥तस्माद्यत्नस्त्वयाकार्योविद्याभ्यासेमुमुक्षुभिः॥३४॥कामक्रो
धादयस्तस्यत्रशत्रवःशत्रुसूदन॥तत्रापिक्रोधएवालंमोक्षविघ्नायसर्व
दा॥३५॥येनाविष्टःपुमान्हंतिपितृभ्रातृसुहृत्सखीन्॥क्रोधएवमनःस्तापः मूलो
क्रोधःसंसारबंधनः॥३६॥धर्मक्षयकरःक्रोधस्तस्मात्क्रोधंपरित्यजेत्॥
क्रोधएवयमःसाक्षात्तृष्णावैतरणीनदी॥३७॥संतोषोनंदनवनंशांति
रेवहिकामधुक्॥३७॥तस्माच्छांतिंभजस्वद्यशत्रोरेवभयंनते॥देहेंद्रि
यमनःप्राणबुध्यादिभ्योविलक्षणः॥३८॥आत्माशुद्धःस्वयंज्योतिरवि
कारीनिराकृतिः॥यावद्देहेंद्रियप्राणेभ्भिन्नत्वंनात्मनोविदुः॥३९॥ताव
त्संसारदुःखौघेपीड्यनेमृत्युसंयुतः॥तस्मात्त्वंसर्वदाभिन्नमात्मानंहृदि
भावय॥४०॥बुध्यादिभ्योबहिःसर्वमनुवर्तस्वमाखिदः॥भुंजन्प्रारब्ध
॥२८॥ मखिलंसुखंवादुःखमेववा॥४१॥प्रवाहपतितंकार्यंकुर्वन्नपिनलिप्यते॥

55

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बाह्यस्सर्वत्र कर्त्तृत्वमावहन्नयि राघव ॥४२॥ अतः शुद्धस्वभावस्त्वं लिप्यसेन
च कर्मभिः ॥ एतन्मयोदितं रामस्ते हृदि भावय सर्वदा ॥४३॥ संसारदुःखैर
खिलैर्बाध्यसे न कदाचन ॥ त्वमप्येवं मया दिष्टं हृदि भावय नित्यदा ॥४४॥ म
मागमप्रतिक्षस्व न दुःखैर्विद्यसे चिरं ॥ न सदैकत्र संवासः कर्ममार्गानुव
र्तिनां ॥४५॥ यथा प्रवाहपतितनद्यवानां सरितां यथा ॥ चतुर्दश समाः संख्या
क्षणार्द्धमिव जायते ॥४६॥ अनुमन्यस्व मामंब दुःखं संत्यज्य दूरतः ॥ एवं
चेत्सुखसंवासो भविष्यति वने मम ॥४७॥ रूक्षकादंडवन्मातुः पादयोरप
तन्स्थिरं ॥ उत्थाप्यांके समावेश्य स्नानैर्गिरभिनंदयन् ॥४८॥ सर्वे देवाः स
गंधर्वाप्सरसो ह्याविद्युत्रिवादयः ॥ रक्षंतु त्वां सदा यांतं तिष्ठंतं निद्रयायुतं ॥४९॥
इति प्रस्थापयामास लथालिंग्य पुनः पुनः ॥ लक्ष्मणोप्यितदा रामं नत्वा
हर्षाश्रुगद्गदः ॥५०॥ अह राम ममासंस्था संत्राय्येयं यलयाद्भुतः यास्यामि पृ
ष्ठतो रामसेवां कुर्वन्तु तदादिश ॥५१॥ अनुगच्छ महाराम नोचेल्लाणान्
त्स्यजाम्यहं ॥ तथेति राघवः प्राह लक्ष्मणायाहि मा चिरं ॥५२॥ प्रस्थितो नां
समाप्यायगतिः सीतापतिर्विभुः ॥ आगतं राममालोक्य सीतासस्मि-
तभाषिणी ॥५३॥ स्वर्णपात्रस्थसलिले पादौ प्रक्षाल्य भक्तितः ॥ पप्रच्छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पतिमासीनं दृष्ट्वा किं सेनया विना ॥५४॥ अगतोसि कुतः त्र[illegible] न छत्रं च वा
कुतः ॥ वा[illegible]न वाद्यं ने किरीटादिविवर्जितः ॥५५॥ सामंतराजसहितः
संभ्रमान्नागतोसि किं ॥ इति सस्मितया दृष्टो रामः सस्मितमब्रवीत् ॥५६॥ राज्ञो
मदंडकारण्यराज्यं दत्तं शुभमखिलं ॥ अतस्तत्पालनार्थाय तत्रैव यास्यामि भा
मिनि ॥५७॥ अद्यैव यास्यामि वनं त्वं तु श्वश्रूसमीपगा ॥ शुश्रूषां कुरु मे मातुः
न मिथ्यावादिनो वयं ॥५८॥ इति ब्रुवंतं श्रीरामं सीतापि ताब्रवीद्वचः ॥ किमर्
थं वनराज्यं ते पित्रा दत्तं महात्मने ॥५९॥ तामाह रामः कैकेय्यै राजा प्रीतो व
रं ददौ ॥ भरताय ददौ राज्यं वने वासं ममानघे ॥६०॥ चतुर्दशा समास्तत्र वा
सो मे कल्पितः ॥ तया देव्या ददौ राजा सत्यवादी दयापरः ॥६१॥ अतः शी
घ्रं गमिष्यामि मा विघ्नं कुरु भामिनि ॥ श्रुत्वा तद्रामवचनं जानकी प्रीति
संयुता ॥६२॥ अहमग्रे गमिष्यामि वनं पश्चात्त्वमेव हि ॥ इत्याह मां विना
गंतुं तव राघव नोचितं ॥६३॥ तामाह राघवः प्रीतः स्वप्रियां प्रियवादिनीं ॥
कथं वनं त्वां नेष्येहं बहुव्यालमृगाकुलं ॥६४॥ राक्षसा घोररूपाश्च सं
ति मानुषभोगिनः ॥ सिंहव्याघ्रवराहाश्च संचरंति समंततः ॥६५॥ कटू

मूफलमूलानि भोजनार्थं सुमध्यमे ॥ अपूपान्नं व्यंजनादि विद्यते न के

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दाचन॥६६॥काले काले फलं नापि विद्यते कुत्र सुंदरी॥मार्गो न दृश्यते का
पि शर्करा कंटकान्वितः॥६७॥गुहागह्वरसंबाध झिल्लिदंशादिनिर्युतं॥
एवं बहुविधं दोषं वनं दंडकसंज्ञिकं॥६८॥पादचारेण गंतव्यं शीतवा
तातपादिमत्॥राक्षसादिनू वने दृष्ट्वा जीवितं हास्यसे चिरात्॥६९॥त
स्माद्गृहे तिष्ठ शीघ्रं द्रक्ष्यामि मां पुनः॥रामस्येय च वचनं श्रुत्वा सीता
दुःखसमन्विता॥७०॥प्रत्युवाच स्फुरद्वक्त्रं किंचित्कोपसमन्विता॥
कथमामिच्छसे त्यक्तुं धर्मपत्नीं पतिव्रतां॥७१॥वदेनन्यामे दोषाणां
धर्मज्ञोसि दयापरः॥त्वदेहमिपरस्थितां रामको वा मां धर्षयद्वने॥७२॥
फलमूलादिकं यद्यत् वन्यं तावद्रोचितं॥तदेवामृतं तु लंमे तेन तु
ष्टा चराम्यहं॥७३॥त्वया सह च रंस्यामि कुशाकाशाश्च कंटकाः॥पु
ष्पास्तरणतुल्या मे भविष्यंति न संशयः॥७४॥अहं त्वाक्रंदनेनैव
न भवे क्लेशकारिणी॥बाल्येपि कश्चिन्मां वीक्ष्य ज्योतिःशास्त्रवि
शारदः॥७५॥प्राह ते विपिने वासः पत्या सह भविष्यति सत्यवादिद्वि
जोभूर्या कुर्मि व्याप्तिं त्वया सह॥७६॥अन्यत्किंचिद्धारक्ष्यामि श्रुत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३०॥

मां नय काननं॥ रामायणानि बहुशः श्रुतानि बहुभिर्द्विजैः॥७७॥ सीतां
विना वनं रामो गतः किं कुत्रचिद्वद॥ अतस्त्वया गमिष्यामि सर्वथा त्वत्सहा
यनी॥७८॥ यत्र गछसि मां सह का प्राणांस्त्यक्ष्यामि ते यतः॥ इति तं निश्च
यं ज्ञात्वा सीतायाः रघुनंदनः॥७९॥ अब्रवीद्देवी गछ त्वं वने शीघ्रं मया
सह॥ अरुंधत्यै प्रयछाशु मुख्यान्याभरणानि च॥८०॥ ब्राह्मणेभ्यो ध
नं सर्वं दत्वा गछामहे वनं गरस्य काल्लक्ष्मणेनाशु द्विजानाहूय भक्ति
तः॥८१॥ ददौ गवां वृंदशतं धनानि वस्त्राणि दिव्यानि विभूषणानि
कुटुंबवृद्धेभ्यः श्रुतसीलवद्भ्यो मुदा द्विजेभ्यो रघुवंशकेतुः॥८२॥
अरुंधत्यै ददौ सीता मुख्यान्याभरणानि च॥ रामः मातुः सेवकेभ्यो
ददौ धनमनेकधा॥८३॥ स्वकांतःपुरवासिभ्यः सेवकेभ्यस्तथैव च॥
पौरजानपदेभ्यश्च ब्राह्मणेभ्यः सहस्रशः॥८४॥ लक्ष्मणोपि सु
मित्रां तु कौसल्यायै समर्चयत॥ धनुःपाणिः समागत्य रामस्याग्रे
व्यवास्थितः॥८५॥ रामः सीतालक्ष्मणाभ्यां जग्मुः सर्वे नृपालयं॥८६॥

॥३०

58

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीरामः सहसीतया नृपथि गच्छन्शनैः सानुजः पौरानूजानपदानू कुतुहल
दृग्गसानंद मुद्वीक्ष्ययनू ॥ रामः कामसहस्रसुंदरवपुः कांत्यादिशोभायनू
पादन्यासपवित्रताखिलजगत्यापालयन्नहितुः ॥ ८ ॥ इ श्रीमदध्यात्म
रामायणे उमा० अयोध्या० चतुर्थ सर्गः ॥ ४ ॥ आयांतं नागराः दृष्टा मार्गे रा
मं सजानकीं ॥ लक्ष्मणेन समं वीक्ष्य उचुः सर्वे परस्परं ॥ १ ॥ कैकय्या वरदा
नान्निमित्ताद्दुःखसमाहृताः ॥ बलराजा दशरथः सत्यसंधं प्रियसुतं ॥ २ ॥
स्त्रीहेतोरत्यजत्कामी तस्य सत्यवता कुतः ॥ कैकयी वा कथं दृष्टा रामं स त्वं
प्रियंकरं ॥ ३ ॥ विवासयामास कथं क्रूरकर्माधिमूढधीः ॥ हे जना नात्र वस्तव्यं ग
च्छामो ह्येव काननं ॥ ४ ॥ यत्र रामः सभार्यश्च सानुजो गंतुमिच्छति ॥ पश्यंतु जा
नकीं सर्वे पादचारेण गच्छति ॥ ५ ॥ पुंभिः कदाचिद्दृष्टा वा जानकी लोकसुं
दरी ॥ सापि पादेन गंछंती जनसंघेष्वनावृता ॥ ६ ॥ रामोऽपि पादचारेण
गजाश्वादिविवर्जितः ॥ गच्छति द्रक्ष्य विभुं सर्वलोकैकसंमतं ॥ ७ ॥
राक्षसी कैकयी नाम नाम्ना जातिविनाशिनी ॥ रामस्यापि भवेद्दुःखं
सीतायाः पादचारणं ॥ ८ ॥ बलवानूविधिरेवात्र पुंप्रयत्नो हि दुर्लभः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३१

इति दुखाकुले वृंदे साधूनां मुनिपुंगवः ॥१॥ अब्रवीद्वामदेवोथ साधूनां
गणमध्यगः ॥२॥ मानुशोचथ रामं वासीनो वा रघ्वीनवनः ॥ एष रामः
परो विष्णुरादिनारायणः स्मृतः ॥ एषा सा जानकी लक्ष्मीर्योगमाये
ति विश्रुता ॥११॥ असौ शेषस्तदन्वेति लक्ष्मणाख्योपि सांप्रतं ॥ एषा
मायागुणैर्युक्तस्तत्तत्कारीव ॥१२॥ एष एव रजोयुक्तो ब्रह्मा सृष्टि
५५ विभावनः ॥ सत्वाविष्टस्तथा विष्णुस्त्रिजगत्प्रतिपालकः ॥१३॥ एष रुद्र
तमस्यंते जगत्प्रलयकारणः ॥ एष मत्स्यः पुराभूत्वा भक्तं वैवस्वतं मनुं ॥१४॥
नावारोप्य लयस्यांते पालयामास राघवः ॥ समुद्रमथने पूर्वं मंद
रं सुतलं गते ॥१५॥ आधायैरस्य पृष्ठेनं कुर्मरूपोरथ पुत्तमः ॥ मही
रसातलं यातां पातात्ले सूकरोभवत् ॥ तोलयामास दंष्ट्राग्रे तां क्षोणीं
रघुनंदनः ॥१६॥ नारसिंहवपुः कृत्वा प्रह्रादवरदः पुरा ॥ त्रिलोककंटकं रक्षः
पाटयामास तं नखैः ॥१७॥ पुत्रराज्यप्रदं नंदं भ्रात्रादित्यायाचितः पुरा ॥१८॥
वामनत्वमुपागम्य यांचाहेनोरसुनः ॥ दुष्टक्षत्रियभूभारनिरस्ये भा
र्गवोभवत् ॥१९॥ स एव जगतां नाथ इदानीं रामतां गतः ॥ रावणादीन्निरक्षां

३१

(60)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिकोटीन्रोगनिहनिष्यसि ॥२०॥ मानुषेणैव मरणं तस्य दिष्टं दुरात्मनः ॥ राजा
दशरथेनापि तपसाराधितो हरिः ॥२१॥ पुत्रत्वकांक्षया विष्णोस्तथा पुत्रोऽभव
द्धरिः ॥ स एव विष्णुः श्रीरामो रावणादिवधाय वै ॥२२॥ गंतासौ वनं रामो लक्ष्म
णेन सहायवान् ॥ एषा सीता हरेर्माया सृष्टिस्थित्यंतकारिणी ॥२३॥ राजा
कैकयी वापि नात्र कारणमेव वा ॥ पूर्वेद्युर्नारदः प्राह भूभारहरणाय च ॥२४॥
रामोऽप्याह स्वयं साक्षाद्गमिष्याम्यहं वनं ॥ अंतरा मां समुद्दिश्य चिंतां सज
त्य बालिशाः ॥२५॥ राम रामेति ये नित्यं जपंति मनुजा भुवि ॥ तेषां मृत्युभ
यादीनि न भवंति कदाचन ॥२६॥ किं पुनस्तस्य रामस्य दुःखशंका महा
त्मनः ॥ रामनाम्नैव मुक्तिः स्यात् कलौ नान्यद्धि कुत्रचित् ॥२७॥ मायामा
नुषरूपेण विडंबयति लोककृत् ॥ भक्तानां रंजनार्थाय रावणस्य वधा
य च ॥२८॥ राज्ञश्चाशिष्टसिध्यर्थं मानुषं वपुराश्रितः ॥ इत्युक्तो विरमौरोथ
वामदेवो महामुनिः ॥२९॥ श्रुत्वा तेऽपि द्विजाः सर्वे रामं ज्ञात्वा हरिं विभुं ॥ ज
हुर्हृत्संशयग्रंथिं राममेवान्वचिंतयन् ॥३०॥ य इदं चिंतयेन्नित्यं रहस्यं रा
मचिंतया ॥ तस्य रामे दृढा भक्तिर्भवेत् ज्ञानपूर्वकं ॥३१॥ रहस्यं गोपनीयं
वो यूयं वै राघवप्रियाः ॥ इत्युक्त्वा प्रययौ विप्रास्तेऽप्यरामं परं विदुः ॥३२॥ ततो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रामः समाविश्य पित्रगेहं मवारितः॥ सानुजः सीतया गत्वा कैकेयीमिदमब्रवी ॥३२॥
त्॥३३॥ अगतोस्मो वयं मातस्त्रयस्ते संमतं वनं॥ गंतुं कुरु नृपः शीघ्रं मामा
पयतु नः पिता॥३४॥ इत्युक्ता सहसोत्थाय चीराणि प्रददौ स्वयं॥ रामाय लक्ष्म
णायाथ सीतायै च पृथुक् पृथुक्॥३५॥ रामस्तु वस्त्राण्युत्सृज्य वन्यचीराणि
पर्यधात्॥ लक्ष्मणोपि तथा चक्रे सीता तन्नैव जानती॥३६॥ हस्ते गृहीत्वा
रामस्य लज्जया मुखमीक्षती॥ रामो गृहीत्वा तच्चीरमंशुकोपर्यवेष्टयत्॥३७॥
तं दृष्ट्वा रुरुदुः सर्वे राजदाराः समंततः॥ वसिष्ठस्तु तदाकर्ण्य रुदितं त्वयनू रु
षा॥३८॥ कैकेयीं प्राह दुर्वृत्ते राम एव वया हृतः॥ वनवासाय दुष्टे त्वं सीतायै किं
प्रदास्यति॥३९॥ यदि रामं समन्वेति सीता भक्त्या पतिव्रता॥ अर्थांबरधरा
नित्यं सर्वाभरणभूषिता॥४०॥ रमयत्वनिशं नित्यैः शं मै रोवनदुःखनिवा
रिणी॥ राज्ञा दत्तो रथोप्याह सुमंत्र रथमानय॥४१॥ रथमारुह्य गच्छंतु व
नं वनरप्रियाः॥ इत्युक्ता रामममालोक्य सीतां चैव सलक्ष्मणं॥४२॥ दुःखान्नि
पतितो भूमौ रुरोदाश्रुपरिप्लुतः॥ आरुरोह रथं सीता त्वराग्रं रामं प्रपन्नयनः॥४३
रामः प्रदक्षिणं कृत्वा पितरं रथमारुहत्॥ लक्ष्मणः खङ्गयुगुलं धनुस्तूणी
॥३२ युगं तथा॥४४॥ गृहीत्वा रथमारुह्य चोदयामास सारथिं॥ तिष्ठ तिष्ठ सु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मित्रेति राजा दशरथो ब्रवीत् ॥४५॥ गच्छ गच्छेति रामेण चोदितो चोदयद्रथं ॥ रा
मे दूरंगते राजा मूर्छितापतनद्भुवि ॥४६॥ पौरास्तु बालवृद्धाश्च वृद्धा ब्राह्मणसं
सत्त२ त्तमाः ॥ तिष्ठ तिष्ठेति रामेति क्रोशंतो रथमन्वयुः ॥४७॥ राजा रुदित्वा सुचिरं मा
नयं तु गृहं प्रति ॥ कौसल्याया राममातुर्यस्याः परिचारकाः ॥४८॥ किंचित्कालं
भवेच्च त्वं जीवनं दुःखितस्य मे ॥ अत ऊर्ध्वं न जीवामि चिरं रामं विना सुतं ॥४९॥
ततो गृहं प्रविश्यैव कौसल्यायाः पपात ह ॥ मूर्छितस्तु चिराद्ध्यात्वा तूष्णीमेवा
वतस्थिवान् ॥५०॥ रामस्तु तमसातीरं गत्वा तत्रावसत्सुखी ॥ जलं प्राश्यैव निरा
हारो वृक्षमूले स्वपत्प्रभुः ॥५१॥ सीतया सह धर्मात्मा धनुःपाणिस्तु लक्ष्म
णः ॥ पालयामास धर्मज्ञः सुमित्रेण समन्वितः ॥५२॥ पौराः सर्वे समागत्य
स्थितास्तस्याविदूरतः ॥ त्यक्त्वा रामं पुरं नेतुं नो चेदृच्छामहे वयं ॥५३॥ इति
निश्चित्य समास्थाय तेषां रामोऽतिविस्मितः ॥ नाहं गच्छामि नगरमेते वैक्ले
शभागिनः ॥५४॥ प्रविश्यंतीति निश्चित्य सुमंत्रमिदमब्रवीत् ॥ इदानीमे
व गच्छामः सुमंत्र रथमानय ॥५५॥ इत्याज्ञप्तः सुमंत्रोपि रथं वाहैरयोजय
त् ॥ आरुह्य रामः सीता च लक्ष्मणोपि ययुर्द्रुतं ॥५६॥ अयोध्याभिमुखं ग

63

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वा किंचिद्दूरं पुरं ययुः ॥ तेपि रामं समं दृष्ट्वैव प्रातरुत्थाय दुःखिताः ॥ ५७ ॥ रथनेमिग
तं मार्गं पश्यंतस्ते पुरं ययुः ॥ हृदिस्थं रामं ससीतं वै ध्यायंतस्तस्थुरन्वहं ॥ ५८ ॥ सुपथेपि
रथं शीघ्रं चोदयामास सादरं ॥ स्फीतान् जनपदान् पश्यन् रामः सीतासमन्वि
तः ॥ ५९ ॥ गंगातीरं समागच्छन् शृंगवेराद्दूरतः ॥ गंगां दृष्ट्वा नमस्कृत्य स्ना
त्वा सानंदमानसः ॥ ६० ॥ शिंशपावृक्षमूलेसौ निषसाद रघूत्तमः ॥ ततो गुहो ज
ने श्रुत्वा रामागमं महोत्सवं ॥ ६१ ॥ सखायं स्वामिनं द्रष्टुं हर्षात् तूर्णं समापतत् ॥
फलानि तानि मधूनि पुष्पाणि गृहीत्वा भक्तिसंयुतः ॥ ६२ ॥ रामस्याग्रे विनिक्षिप्य
दंडवत् पतितो भुवि ॥ गुहमुत्थाप्य तूर्णं राघवः परिषस्वजे ॥ ६३ ॥ संपृष्टकुशलो
रामं गुहः प्रांजलिरब्रवीत् ॥ धन्योहमद्य मे जन्म नैषादं लोकपावनं ॥ ६४ ॥ ब
भूव परमानंदः स्पृष्ट्वा तेंगं रघूत्तम ॥ नैषादं राज्यमेतत्ते किंकरस्य रघूत्त
म ॥ ६५ ॥ त्वदधीनं वसन्नत्र पालयास्मान् रघूद्वह ॥ अगच्छ राम नगरं पा
वनं कुरु मे गृहं ॥ ६६ ॥ गृहाण फलमूलानि त्वदर्थं संचितानि मे ॥ अनुगृ
हीष्व भगवन् दासस्तेहं रघूत्तम ॥ ६७ ॥ रामस्तमाह सुप्रीतो वचनं शृणु मे
सखे ॥ न वेक्ष्यामि गृहं तेद्य वर्षाणि नव पंच च ॥ ६८ ॥ दत्तमन्येन नो भुंक्ते फ

॥२२॥

(६९)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न

फलमूलादिकंचयत्॥राज्यंममैतत्तेसर्वंत्वंसखामेतिवल्लभः॥६९॥वटक्षीरंसमा
नीयजटामुकुटमादरात्॥बबंधलक्ष्मणेनाथसहितोरघुनंदनः॥७०॥जलमा
त्रंतुसंप्राश्यसीतयासहराघवः॥अस्तीर्णंकुशपर्णाद्यैःशयनंलक्ष्मणाहृतं॥७१॥
उवासतत्रनगरप्रासादाग्रेयथापुरा॥सुष्वापतत्रवैदेह्यापर्यंकइवसंस्कृते॥७२॥
ततोविदूरेपरिगृह्यचापंसबाणतूणीरसलक्ष्मणःस्म॥ररक्षरामंपरितोविप
श्यन्गुहेनसार्द्धंसशरासनेन॥७३॥इश्री० अयोध्याकांडेपंचमोध्यायः॥५॥७
सुप्तंरामंसमालोक्यगुहःसाश्रुपरिप्लुतः॥लक्ष्मणंप्राहविनयाद्भ्रातःपश्यसिराघ
वं॥१॥शयानंकुशपत्रौघसंस्तरेसीतयासह॥यःशेतेस्वर्णपर्यंकेस्वास्तीर्णेभ
वनोत्तमे॥२॥कैकयीरामदुःखस्यकारणंविधिनाकृता॥मंथराबुद्धिमास्थाय
कैकयीपापमाचरत्॥३॥तच्छ्रुत्वालक्ष्मणःप्राहसखेशृणुवचोमम॥कःकस्यहेतुर्दुःख
स्यहेतुःसुखस्यच॥४॥स्वपूर्वार्जितकर्मैतत्कारणंसुखदुःखयोः॥५॥सुखस्यदुःख
स्यनकोपिदातापरोददातीतिकुबुद्धिरेषा॥अहंकरोमीतिवृथाभिमानःस्व
कर्मसूत्रग्रथितोहिलोकः॥६॥सुहृन्मित्रार्युदासीनद्वेष्यमध्यस्थबांध
वाः॥स्वयमेवाचरन्कर्मसूत्रग्रथितोहिलोकः॥७॥सुखंवायदिवादुःखंस्व
कर्मवशगोनरः॥नद्यथास्वागतंतत्रभुंजानःस्वस्थमनाभवेत्॥८॥नतेभो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गागमेवांछाननेभोगविवर्जनः॥आगछत्यथनागछत्भोगवन्नागोभवेत्॥९॥
यस्मिन्देशेचकालेचयस्माद्वायेनकेनवा॥कृतंशुभाशुभंकर्मभोज्यंतत्तत्र
नान्यथा॥१०॥अलंहर्षविषादाभ्यांशुभाशुभफलोदये॥विधात्राविहितं
यद्यत्तदलंघ्यंसुरासुरैः॥११॥सर्वदासुखदुखाभ्यांनरःप्रत्यवरुध्यते॥श
रीरंपुण्यपापाभ्यांमुत्पन्नंसुखदुःखमत्॥१२॥सुखस्यानंतरंदुखंदुःख
स्यानंतरंसुखं॥द्वयमेतद्धिजंतूनामलंघ्यंदिनरात्रिमत्॥१३॥सुखमध्ये
स्थितंदुःखंदुखःमध्येस्थितंसुखं॥द्वयमन्योन्यसंयुक्तंप्रोच्यतेजलपंक
वत्॥१४॥तस्माद्धैर्येणविद्वांसइष्टानिष्टोपपत्तिषु॥नहृष्यंतिनदह्यंति
सर्वंमायेतिभावनात्॥१५॥गुहलक्ष्मणयोरेवंभाषतोर्विमलेनभः॥
बभूवरामःसलिलंस्पृष्ट्वाप्रातःसमाहितः॥१६॥उवाचसीघ्रंसुदृढंना
वमानयमेसखे॥श्रुत्वारामस्यवचनंनिषादाधिपतीर्गुहः॥१७॥स्व
यमेवदृढांनावमानीयशुभलक्षणां॥स्वामिन्नारुह्यतांनौकासीतयाल
क्ष्मणेनच॥१८॥वाहयेज्ञातिभिःसार्द्धमहमेवसमाहितः॥तथेतिराघवः
सीतामारोप्यशुभेलक्षणां॥१९॥गुहस्यहस्तावालंब्यस्वयंचारुरुहद
च्युतः॥आयुधादीन्समानीयलक्ष्मणोभ्यारुरोहच॥

३४

66

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुहस्तं वाहयामास ज्ञातिभिः सहितः स्वयं॥ गंगामध्ये गता गंगां प्रार्थयामास जानकी॥
॥२१॥ देवी गंगे नमस्तेस्तु निवृत्ता वनवासतः॥ रामेण सहितोहं त्वा लक्ष्मणेन च पूजयि
त्वा॥२२॥ सुरामांसोपहारैश्च बलिभिर्मंगलाहृता॥ इत्युक्त्वा परकूलं ते शनैरुत्तीर्य ते गमु
लुः॥२३॥ गुहोपि राघवं प्राह गमिष्यामि त्वया सह॥ अनुज्ञां देहि राजेंद्र नो चेत्प्राणांस्त्यजाम्य
हं॥२४॥ अयास्याम्युदितं सत्यं नासत्यं रामभाषितं॥ इत्युक्त्वालिंग्य तं भक्तं समाश्वास्य पुन
पुनः॥२५॥×श्रुत्वा रामस्य वचनं श्रीरामस्तमथाब्रवीत्॥ चतुर्दश समास्थित्वा दंडके पुनरप्य
हं॥२६॥ निवर्त्तयामास गुहं सोपि कृच्छ्राद्ययौ गृहं॥ तत्र मध्यमहं हत्वास्य तादृसा चैतत्र यः
॥२७॥ भुक्त्वा वृक्षतले सुप्त्वा सुखमासत तां निशां॥ ततो रामस्तु वैदेह्या लक्ष्मणेन समन्वि
तः॥२८॥ भरद्वाजाश्रमपदं गत्वा बहिरुपस्थितः॥ तत्रैकं बटुकं दृष्ट्वा रामः प्राह च मे बटो॥
॥२९॥ रामो दाशरथिः सीतालक्ष्मणाभ्यां समन्वितः॥ आस्ते बहिर्वनस्येति ह्युच्यतां मुनि
संन्निधौ॥३०॥ तच्छ्रुत्वा सहसागत्य पादयोः पतितो मुनेः॥ स्वामिन्रामः समागत्य वनाद्बहि
रयस्थितः॥३१॥ सभार्यः सानुजः श्रीमानाह मां देवसंन्निभः॥ भरद्वाजाय मुनये ज्ञापयस्वस्व
वोदितौ॥३२॥ तच्छ्रुत्वा सहसोत्थाय भरद्वाजो मुनीश्वरः॥ गृहीत्वार्घ्यं च पाद्यं च रामस्वामी नमा
ययौ॥३३॥ दृष्ट्वा रामं यथान्यायं पूजयित्वा सलक्ष्मणं॥ आह मे पर्णशालां भो राम राजीवलो
चन॥३४॥ आगच्छ पादरजसा पुनीहि रघुनंदन॥ इत्युक्त्वोटजमानीय सीतया सह राघ
वौ॥३५॥ भक्त्या पुरः पूजयित्वा चकारातिथ्यमुत्तमं॥ अद्याहं तमसः पारं गतोस्मि तव सं
गमात्॥३६॥ ज्ञातं राम तवोदितं भूतं चागमिकं च यत्॥ जानामि त्वां परात्मानं मायया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कार्यमानुषः ॥ ३७ ॥ यदर्थमवनीपोसि प्रार्थितो ब्रह्मणा पुरा ॥ यदर्थं वनवासस्ते स करिष्यामि ॥ ३५ ॥
वै पुरः ॥ ३८ ॥ जानामि ज्ञानदृष्ट्याहं जानन्याहदुपासनात् ॥ इतः परं च यो वस्येत्र नाथोहं रघु
त्तम ॥ ३९ ॥ यं त्वां पश्यामि काकुत्स्थ पुरुषं प्रकृतेः परं ॥ रामस्त्वमभिवाद्याहं सीतालक्ष्मणो
संयुतः ॥ ४० ॥ अनुज्ञाप्य ह्यास्त्वयात्रेलेन वयं क्षत्रियबांधवाः ॥ इति संभाषितो न्योन्यमुषि
त्वा मुनिसंनिधौ ॥ ४१ ॥ प्रातरुत्थाय यमुनां मुनीर्यमुनिदारकैः ॥ कृतप्रणामं मुनीनां दृ
ष्टमार्गेण राघवः ॥ ४२ ॥ प्रययौ चित्रकूटाद्रिं वाल्मीके यत्र चाश्रमः ॥ स राघमोथ वाल्मी
किराश्रमं मुनिसंकुलं ॥ ४३ ॥ नानामृगद्विजाकीर्णं नित्यपुष्पफलादिकं ॥ तत्र दृष्ट्वा समा
सीनं वाल्मीकं मुनिसत्तमं ॥ ४४ ॥ ननाम सिरसा रामो लक्ष्मणेन च सीतया ॥ दृष्ट्वा रामं
रमानाथं वाल्मीकिर्लोकसुंदरं ॥ ४५ ॥ जानकीलक्ष्मणोपेतं जटामुकुटमंडितं ॥ कं
दर्पसदृशाकारं कमनीयांबुजेक्षणं ॥ ४६ ॥ दृष्ट्वैव सहसोत्तस्थे विस्मयं निमिषेक्षणः ॥
आलिंग्य परमानंदं रामं हर्षाश्रुलोचनः ॥ ४७ ॥ पूजयित्वा जगत्पूज्यं भक्त्यार्घ्यादिभि
रादृतः ॥ फलपुष्पैः समधुरैः भोजयित्वा च लालितः ॥ ४८ ॥ राघवः प्रांजलिः प्राह वाल्मी
किं विनयान्वितः ॥ पितुराज्ञां नम [illegible] स्त्रं दंडकानागतो वयं ॥ ४९ ॥ त्वं नायद्विजानंति
किं वक्ष्यामोत्र कारणं ॥ यत्र मे सुखवासाय भवेत्स्थानं वद स्व नतु ॥ ५० ॥ सीतया सहितः
कालं किंचित्तत्र नयाम्यहं ॥ इत्युक्तो राघवेनासौ मुनिः सस्मितमब्रवीत् ॥ ५१ ॥ त्वमेव स
र्वलोकानां निवासस्थानमुत्तमं ॥ तवापि सर्वभूतानि निवाससदनानि हि ॥ ५२ ॥
एवं साधारणं स्थानमुक्तं ते रघुपुंगव ॥ सीतया सहितस्येति विशेषं पृष्टतस्तव ॥ ५३ ॥
तद्वक्ष्यामि रघुश्रेष्ठ यत्ते नियतमंदिरं ॥ शांतानां समदृष्टीनां मद्वेष्टृणां च जंतुषु ॥ ५४ ॥
त्वामेव भजतां नित्यं हृदयं तेहि मंदिरं ॥ धर्माधर्मे परित्यज्य त्वामेव भजतो निशं ॥ ५५ ॥

॥ ३५ ॥

69

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मे
सीतया सहितो राम तस्य हृत्सुखमंदिरं ॥ तन्मंत्र जापकोयस्तु त्वामेव शरणं गतः ॥५६॥
निर्द्वंद्वो निस्पृहस्तस्य हृदयं ते सुमंदिरं ॥ निरहंकारिणच्छांता रागद्वेषविवर्जिताः ॥५७॥
समलोष्टाश्मकनकास्तेषां वै हृदयं गृहं ॥ ये न द्वेष्या प्रियं प्राप्य प्रियं प्राप्य न हृष्य
ति ॥५८॥ सर्वं मायेति निश्चित्य त्वां भजेत्तन्मनो गृहं ॥ षड्भावादिविकारान्यो देहे पश्यं
ति नात्मनः ॥५९॥ क्षुत्तृट्सुखं न वे दुखं प्राणबुध्यानिरीक्षते ॥ संसारधर्मैर्निर्मुक्तस्त
स्यातं मनो न संगृहं ॥६०॥ पश्यंति सर्वान्य संस्थितं नाहि त्वां चिद्घनं सत्यमनंतमेकं ॥
अलेपकं सर्वगतं वरेण्यं तेषां हृदब्जे सह सीतया वस ॥६१॥ निरंतराभ्यासदृढी
कृतानां त्वत्पादसेवापरिनिष्ठितानां ॥ त्वन्नामकीर्त्याहतकल्मषाणां सीतासमेतस्य
गृहं हृदब्जे ॥६२॥ राम त्वन्नाममहिमा वर्ण्यते केन वा कथं ॥ यत्प्रभावादहं राम ब्रह्मर्षित्वमवा
प्नुयात् ॥६३॥ अहं पुरा किरातेषु किरातैः सह वर्द्धितः ॥ जन्ममात्रद्विजत्वं मे शूद्राचा
ररतः सदा ॥६४॥ शूद्रायां बहवः पुत्रा उत्पन्ना मेऽजितात्मनः ॥ ततः चोरैश्च संग
म्य चोरोहमभवत्पुरा ॥६५॥ धनुर्बाणधरो नित्यं जीवानामंतकोपमः ॥ एकदा मु
नयः सप्त दृष्टा महति कानने ॥६६॥ साक्षान्मया प्रकाशंतो ज्वलनार्कसमप्रभाः ॥
तानन्वधावल्लोभेन तेषां सर्वपरिछदान् ॥६७॥ गृहीतकामस्तत्राहं तिष्ठ ति
ष्ठेति चाब्रुवन् ॥ दृष्ट्वा मां मुनयो पृच्छन् किमयासि द्विजाधम ॥६८॥ अहं तानब्रु
वं किंचिदादातुं मुनिसत्तमाः ॥ पुत्रदारादयः संति बहवो मे बुभुक्षिताः ॥७०॥
तेषां संरक्षणार्थाय चरामि गिरिकानने ॥ ततो मामूचुरव्यग्राः पृच्छ गत्वा कुटुंबि
नः ॥७०॥ यो यो मया प्रतिदिनं क्रियते पापसंचयः ॥ यूयं तद्भागिनः किं वा नेति वै

69

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति एषु कदथुकः॥७१॥ वयं स्थास्यामहे तावद्यावत्त्वं चागमिष्यसि॥ तथेत्युक्त्वा गृहं गत्वा ॥३६
तेषां मुनिभिर्यदुदीरितं॥७२॥ अपृच्छं सुत्रदारादीन् तैरुक्तोहं रघूत्तम॥ पापं तवैव तत्सर्वं
नैव वयं फलभागिनः॥७३॥ तच्छ्रुत्वा जातनिर्वेदो विचार्य पुनरागमं॥ मुनयस्तत्र तिष्ठं
ति करुणापूर्णमानसाः॥७४॥ मुनीनां दर्शनादेव शुद्धांतःकरणोऽभवं॥ धनुरादी
न्परित्यज्य दंडवत्प्रणतास्म्यहं॥७५॥ रक्षध्वं मां मुनिश्रेष्ठा गच्छंतं निरयार्णवं॥
इत्यग्रे पतितं दृष्ट्वा मामूचुर्मुनिसत्तमाः॥७६॥ उत्तिष्ठोत्तिष्ठ भद्रं ते सफलः सत्स
मागमः॥ उपदेक्ष्यामहे तुभ्यं किंचित्तेनैव मोक्ष्यसे॥७७॥ परस्परं समालोच्य दु
६९ त्तोयं द्विजाधमः॥ उपेक्ष्या एवासौ [illegible]ज्ञास्तथापि शरणागतान्॥७८॥ रक्षणीय
प्रयत्नेन मोक्षमार्गोपदेशतः॥७९॥ इत्युक्तो राम ते नाम व्यस्तमाक्षररूपकं॥ एकाग्र
मनसात्रैव सुगतिं जप सर्वदा॥८०॥ आगच्छाम पुनर्यावत्तावदुक्त्वा सदा जप॥ इत्यु
क्त्वा प्रययुः सर्वे मुनयो दिव्यदर्शनाः॥८१॥ आहं यथोपदिष्टं तैस्तथाकरवमंजसा॥
जपन्नेकाग्रमनसा बाह्यं विस्मृतवानहं॥८२॥ एवं बहुतिथे काले गते निश्चलरू
णः॥ सर्वसंगविहीनस्य वल्मीकोऽभून्ममोपरि॥८३॥ ततो युगसहस्रांते ऋषयः
पुनरागमन्॥ मामूचुः निष्क्रम स्वेति तच्छ्रुत्वा तूर्णमुत्थितः॥८४॥ वल्मीकान्निर्ग
तश्चाहं नीहारमिव भास्करः॥ ममाप्याहुर्मुनिगणा वाल्मीकिस्त्वं मुनीश्वर॥८५॥
वाल्मीकात्संभवो यस्माद्द्वितीयं जन्म तेऽभवत्॥ इत्युक्त्वा ते ययुर्दिव्यां मतिं र
॥३६ घुकुलोत्तमाः॥८६॥ अहं तु रामनाम्नस्तव प्रभावादीदृशोऽभवं॥ अद्य साक्षात्त्व प

70

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यामि ससीतं लक्ष्मणेन च ॥ ७ ॥ रामराजीवपत्राक्ष त्वां मुक्त्वा नात्र संशयः ॥ आग
छ राम मंद्रं ते स्थलं वेदनीयाम्यहं ॥ ८ ॥ एवमुक्त्वा मुनिः श्रीमान् लक्ष्मणेन समन्वि
तः ॥ त्रिभिः परिवृतो गत्वा मध्ये पर्वतगंगयोः ॥ ९ ॥ तत्र शाला सुविस्तीर्णा कारयामा
सवासमः ॥ शाकपुष्पैर्मदक्षिणोदकं शोभनं मंदिरद्वयं ॥ १० ॥ जानक्या सहितो रा
मो लक्ष्मणेन समन्वितः ॥ तत्रैनं देवसंघाश्च वसन्नूपवनोत्तमे ॥ ११ ॥ वाल्मी
किना नित्यसुपूजितोयं रामः ससीतः सहलक्ष्मणेन ॥ देवैर्मुनीन्द्रैः सहितो मु
दास्ते स्वर्गे यथा देवपतिः सुसेव्यः ॥ १२ ॥ इति श्रीमद० उमा० जयो० षष्ठः सर्गः ॥ ६ ॥
सुमंत्रोपि तदायोध्यां दिनांते प्रविवेश ह ॥ वस्त्रेण मुखमाच्छाद्य बाष्पाकुलितलोच
नः ॥ १ ॥ बहिरेव रथं स्थाप्य राजानं द्रष्टुमाययौ ॥ जयत्वाद्य नराजानं स्तुत्वा तं प्रणा
नाम च ॥ २ ॥ ततो राजा नमंतं तं सुमंत्रं विह्वलोऽब्रवीत् ॥ सुमंत्र राम कुत्रास्ते सी
तया लक्ष्मणेन च ॥ ३ ॥ कुत्र त्यक्तः त्वया रामः किमायाति नमब्रवीत् ॥ सीता वा
लक्ष्मणो वापि निर्दयं मां किमब्रवीत् ॥ ४ ॥ हा राम हा गुणनिधे हे सीते प्रियवादिनी ॥
दुःखार्णवे निमग्नं मां म्रियमाणं न पश्यसि ॥ ५ ॥ विलप्यैवं चिरं राजा निमग्नो दु
खसागरे ॥ एवं मंत्री रुदंतं तं प्रांजलिर्वाक्यमब्रवीत् ॥ ६ ॥ रामः सीता च सौमित्रि
मया नीता रथेनैव ॥ श्टंगवेरपुरासन्ने गंगाकूलमवस्थिताः ॥ ७ ॥ गुहेन किं
थे विदानीतं फलमूलादिकं चयत् ॥ स्पृष्ट्वा हस्तेन संप्रीत्या नागृहीद्विससर्ज हि ॥ ८ ॥
वटक्षीरं समानीय गुहेन रघुनंदनः ॥ सुमंत्र ब्रूहि राजानं शोकस्ते मास्तु मत्कृते ॥ ९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आश्वासयामास तदा स शोकपरिप्लुतः॥ साकेतादधिकं सौख्यं विपिने नो भवि-
ष्यति॥१०॥ मातुर्मे वचनं ब्रूहि शोकं त्यज तु महत्तेः॥ सीता चाश्रुपरीताक्षी मम्मा
हरेधु मन्तम॥११॥ दुःखशोकोदयाद्वाचा रामं किंचिदवेमति॥ साष्टांगं प्रणिपातं
मे ब्रूहि श्वश्रोः पदांबुजे॥१२॥ इति प्ररुदती सीता गता किंचिदवाङ्मुखी॥ ततः
साश्रुपरीताक्षी नावमारूढ दुःखदा॥१३॥ यावद्गंगां समुत्तीर्य गता स्तावदहं
स्थितः॥ ततो दुःखेन महता पुनरेवाहमागतः॥१४॥ कैकेय्यै प्रियभार्यायै प्रसन्नो
दत्तवान् वरं॥ त्वं राज्यं देहि तस्यै च मत्पुत्रः किं विवासितः॥१५॥ स्वासमेव तत्सर्व
मिदानीं किं तु रोदसी॥ कौशल्या वचनं श्रुत्वा ताक्षतेस्पृष्टरिवाग्निना॥१७॥ पुनः
शोकाश्रुपूर्णाक्षः कौशल्यामिदमब्रवीत्॥ दुःखेन म्रियमाणं मां किं पुनर्दु-
खयास्यसे॥१८॥ इदानीमेव मे प्राणा उत्क्रमिष्यन्ति निश्चलं॥ शप्तोऽहं बाल्ये
भावेन केनचिन्मुनिना पुरा॥१९॥ पुराहं यौवने भद्रे चापबाणधरो निशि॥
जलचरान् मृगया सक्तो नद्यास्तीरे महावने॥२०॥ तत्रार्द्धरात्रसमये मुनिक-
श्चितृषार्दितः॥ पिपासार्दितयो पुत्र जलमानेतुमुद्यतः॥२१॥ अपूरयज्ज-
ले कुंभं तदा शब्दोऽभवन्महान्॥ गजः पिबति पानीयमिति मत्वा महानिशि॥२२॥
बाणं धनुषि संधाय शब्दवेधिनमक्षिपं॥ आहतोऽस्मीति तत्राशु शब्दो मानु-
षसूचकः॥२३॥ कस्यापि न हतो दोषो मया केन हतो वधे॥ प्रतीक्षते मां मा

ततो रुदंती कौशल्या राजानमिदमब्रवीत्॥ २५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाच्च पीताञ्च जलकांक्षया ॥२४॥ न घृत्वा जलसंत्रस्तो ततोहं पौरुषं वच्च ॥
रानैगवाथ न सार्द्धं स्वामिन् दशरथोस्म्यहं ॥२५॥ आज्ञानमामयाविद्धः स्त्वं तु मा-
हस्ति मां मुने ॥ इत्युक्त्वा पादयोस्तस्य पतितो गद्गदाक्षरः ॥२६॥ न दशामामाह च मुनिः मी
त्तै विविन पसत्तमा ॥ अहं हत्वा स्त्रोन ब्रह्म वै रयहं तपसि स्थितः ॥२७॥ पितरो मां प्र
तीक्षेते तद्दुन त्वां परिपीडितौ ॥ तयोस्त्वमुदकं देहि शीघ्रमेवाविचारतः ॥२८॥ नोचे
त्तां भस्मसात्कुर्यात्पिता मे यदि कुप्यति ॥ जलं दत्वा च ततो न वार्त्तं सर्वं न्यवेदयत्
॥२९॥ शरमुद्धर मे देहात् प्राणं त्यक्षामि पिडितः ॥ इत्युक्तो मुनिना शीघ्रं बाणमु
सार्य देहतः ॥३०॥ सज्जस्तं कलशं गृह्य गतोहं यत्र दंपती ॥ श्रांतौ वृद्धावंधदत्तौ
क्षुत्पिपासार्दितौ निरी ॥३१॥ न याति सलिलं गृह्य पुत्रः किं वात्र कारणं ॥ अ
नन्यगतिकौ वृद्धौ चान्धौ तद्धृतिपीडितौ ॥३२॥ अंबामुपेक्षते किं वा भक्तिमाना
वयोर्हि सः ॥ इति चिंताविचारौ तौ मत्पादन्यासजं ध्वनिं ॥३३॥ श्रुत्वा प्राह पिता पु
त्रं किं विलंबः कृतस्त्वया ॥ देह्यावयोः सुपानीयं पिबावमपि पुत्रक ॥३४॥ इ
त्थं किं विलंबः ... पादयोः प्रणिपत्याहमब्रुवं विनयान्वि
खेवलपत्नोभीत्यासकान्तामगमच्छने ॥ पापोहं मृगयासक्तो [illegible] नैम
नः ॥३५॥ नाहं पुत्रस्तवमोध्यायां [illegible] दशरथोस्म्यहं ॥ पापोहं मृगयासक्तो ... श्रुत्वाहं शब्दवेधिबा
गविहिंसकः ॥३६॥ जलमव्यतारा दूरे [illegible] गजगतिं ध्वनिं ॥ श्रुत्वाहं शब्दवेधि बा
देक बाणमथात्यजं ॥३७॥ हतोस्मीति ध्वनिं [illegible] भयात्तत्राहमागतः ॥ जटावि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जलाविकीर्णपतितं दृष्ट्वा मुनिदारकं ॥३८॥ भीतो गृहीत्वा तत्पादौ रक्ष रक्षेति चाब्रु ॥३८॥
वं ॥ मा भैषीरिति मां प्राह ब्रह्महत्याभयं न ते ॥३९॥ मत्पित्रोः सलिलं दत्वा नत्वा प्रार्थ्य
य जीवितं ॥ इत्युक्त्वा मुनिना तेन आगतो मुनिसन्नमं ॥४०॥ रक्षतां मां समायुक्तौ दया
युवां सच्छरणागतं ॥ इति स्मृत्वा तदुत्पात्रौ विलप्य बहुशोऽधमं ॥४१॥ पतितो नौ सुतो यत्र न
यतत्र विलम्बय नु ॥ नीतो नितौ सुतौ यत्र मया तौ वृद्धदंपती ॥४२॥ स्पृष्ट्वा सुतं तं हस्ताभ्यां
बहुशोऽथ विलेपतुः ॥ ततो मामूचतुः सीघ्रं चितिं रचय भूपते ॥४३॥ मया दैवेन वरचि
तां चितिं तत्र निवेशितौ ॥ यत्र तत्राग्निरुत्सृष्टो दग्धास्ते त्रिदिवं ययुः ॥४४॥ तत्र
वृद्धपिता प्राह मां वय्येवं भविष्यति ॥ पुत्रशोकेन मरणं प्राप्स्यसे वचनान्मम ॥४५॥
सईदानीं मम प्राप्तः शापकालो निवारितः ॥ इत्युक्त्वा विललापाथ राजा शोकसमा
कुलः ॥४६॥ हा राम हा चन्द्रहासी ते हा लक्ष्मण यानुगामिने ॥ त्वद्वियोगादहं प्राप्तो मृत्युं कै
कयसंभवं ॥४७॥ वदन्नेवं दशरथो प्राणांस्त्यक्त्वा दिवं गतः ॥ कौशल्या च सुमि
त्रा शोचन्तौ राजयोषितः ॥४८॥ चुक्रुशुस्त्र विलेपुश्च उरःस्ताडनपूर्वकं ॥ व
सिष्ठः प्रययौ तत्र प्रातर्मंत्रिभिरावृता ॥४९॥ तैलद्रोण्यां दशरथं क्षिप्त्वा दूता
न्यथाब्रवीत् ॥ गच्छन्तस्त्वरितं भ्रात्रा युधाजिन्नगरं प्रति ॥५०॥ तत्रास्ते भर
॥३८॥ तः श्रीमान् शत्रुघ्नसहितप्रभुः ॥ उच्यतां भवतः शीघ्रं आगच्छतु ममाज्ञ
या ॥५१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अयोध्यां प्रति राजानं कैकयीं चापि वर्त्तयतु ॥ इत्युक्तास्त्वरिता दूता गत्वा भरतमातुलं ॥५२॥
युधाजितं प्रणम्योचुस्तेनं रे सानुजं प्रति ॥ वसिष्ठस्त्वब्रवीद्राजन्भरतः सानुजं प्रभो ॥५३॥
सीघ्रमागछतु पुरीमयोध्यामविचारयन् ॥ इत्याज्ञप्तो भरतस्त्वरितं भयविह्वलः ॥५४॥
अययो गुरुणादिष्टः सह दूतैस्तु सानुजः ॥ राज्ञो वा राघवस्याप्युदुःखं किंचिदुपस्थि
तं ॥५५॥ इति चिंतापरो मार्गे चिंतयन्नगरं ययौ ॥ नगरं भ्रष्टलक्ष्मीकं जनसंबाधव
र्जितं ॥५६॥ उत्सवैश्च परित्यक्तं दृष्ट्वा चिंतापरोभवत् ॥ प्रविश्य राजभवनं राजल
क्ष्मीविवर्जितं ॥५७॥ अपश्यत्कैकयीं तत्र मेकामेवावनिस्थितं ॥ ननाम शिरसा
पादौ मातुर्भक्तिसमन्वितः ॥५८॥ आगतं भरतं दृष्ट्वा कैकयी प्रेमसंभ्रमा उत्थाया
लिंग्य शिरसा स्वांकमारोप्य संस्थिता ॥५९॥ मूर्ध्न्यवघ्राय पप्रच्छ कुशलं स्वकु
लस्य सा ॥ पिता मे कुशली भ्राता माता वा शुभलक्षणा ॥६०॥ दिष्ट्या समद्य कु
शलीमद्दृष्टोसि पुत्रक ॥ इति पृष्टः स भरतो मात्रा चिंताकुलेंद्रियः ॥६१॥ दूय
मानेन मनसा मातरं समपृच्छत ॥ मातः पिता मे कुत्रास्ते एकाहमिह संस्थि
ता ॥६२॥ त्वया विना न मे तातः कदाचिद्रहसि स्थितः ॥ इदानीं दृश्यते नैव कुत्र
तिष्ठति मे वद ॥६३॥ अदर्शनात्पितुर्मेद्य भयं दुःखं च जायते ॥ तथाह कैक
यी पुत्रं किं दुःखेन तवानघ ॥६४॥ या गतिर्धर्मशीलानां अश्वमेधादि
याजिनां ॥ तां गतिं गतवानद्य पिता ते पितृवत्सल ॥६५॥ न छलानि पपातो

75

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभरतः शोकविह्वलः ॥ हा तात क्व गतोसी त्वं सक्त्वा मां वृजिनार्णवे ॥६६॥ असम
र्प्य वरामाय राज्ये मां क्व गतोसि भो ॥ इति विह्वलितं पुत्रं पतितं मुक्तमूर्द्धजं ॥६७॥
उत्थाप्यामृज्य नयने कैकयी पुत्रमब्रवीत् ॥ समाश्वासिहि भद्रं ते सर्वं संपादि
तं मया ॥६८॥ तामाह भरतस्तात म्रियमाणः किमब्रवीत् ॥ तमाह कैकयी
देवी भरतं भयवर्जिता ॥६९॥ हा राम राम सीतेति लक्ष्मणेति पुनः पुनः ॥ वि
लपन्नेव सुचिरं देहं त्यक्त्वा दिवं ययौ ॥७०॥ तामाह भरतो हं च रामः संनिहि
तो न किं ॥ तदानीं लक्ष्मणो वापि सीता वा क्व नु ते गताः ॥७१॥ कैकयी उवाच ॥
रामस्य यौवराज्यार्थे पिता ते संभ्रमाकुलः ॥ तव राज्यप्रदानाय तदाहं विघ्न
माचरं ॥७२॥ राज्ञा दत्तं हि मे पूर्वं वरदेन वरद्वयं ॥ याचितं तदिदानीं मे तयो
रेकेन ते खिलं ॥७३॥ राज्यं रामस्य मे चैकेन मुनिवासो मुनिव्रतं ॥७३॥ त
तः सत्यपरो राजा राज्यं दत्वा तथैव हि ॥ रामं संप्रेषयामास वनमेव पिता तव ॥७४॥
सीताप्यनुगता रामं पातिव्रत्यमपाश्रिता ॥ सौभ्रात्रं दर्शयन् राममनुयातोपि
लक्ष्मणः ॥७५॥ वनं गतेषु सर्वेषु राजा तानेव चिंतयन् ॥७६॥ प्रलपन् राम
रामेति ममार नृपसत्तमः ॥ इति मातुर्वचः श्रुत्वा वज्राहत इव द्रुमः ॥७७॥
पपात भुमौ निःसंज्ञस्तं दृष्ट्वा दुखिता तदा ॥ कैकयी पुनरप्याह वत्स त्वं शो
केन किं तव ॥७८॥ राज्ये महति संप्राप्ते दुःखस्यावसरः कुतः ॥ इति ब्रूव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निकृवंती मां लोकमातरं प्रदहन्ति वा ॥ ७९ ॥ असंभाव्यापि पापा मे घोरे संभर्तृ
घातिनी ॥ पापे त्वद्गर्भजातोहं पापवानस्मि सांप्रतं ॥ ८० ॥ अहमग्निं प्रवेक्ष्या
मि विषं वा भक्षयाम्यहं ॥ खड्गेन वाथ चात्मानं हत्वा यामि यमालयं ॥ ८१ ॥ भ
र्तृघातिनी दुष्टे त्वं कुंभीपाकं गमिष्यसि ॥ इति निर्भर्त्स्य कैकेयीं कौशल्या
भुवनं ययौ ॥ ८२ ॥ सापि तं भरतं दृष्ट्वा मुक्तकंठा रुरोद ह ॥ पादयोः पतित
स्तस्या भरतोपि तदा रुदन् ॥ ८३ ॥ आलिंग्य भरतं साध्वी राममाता यश
स्विनी ॥ कृशातिदीनवना सोश्रुनेत्रेदमब्रवीत् ॥ ८४ ॥ पुत्रत्वयि गते दू
रं एवं सर्वमभूदिदं ॥ उक्तं मात्रा श्रुतं सर्वं त्वया ते मातृचेष्टितं ॥ ८५ ॥ पु
त्रः सभार्यो विनमेव यातः सलक्ष्मणो मे रघुरामचंद्रः ॥ चिरांबरो बद्धजटा
कलापः संत्यज्य मां दुःखसमुद्रमग्नां ॥ ८६ ॥ हा मे रो हा मे रघुवंशनाथः जा
तोसि मे त्वं परतः परात्मा ॥ तथापि दुःखं न जहाति मां वै विधिर्बलीयानिति
मे मनीषा ॥ ८७ ॥ स एवं भरतो वीक्ष्य विलपंतीं भृशं पुनः ॥ पादौ गृहीत्वा
प्राहेदं शृणु मातर्वचो मम ॥ ८८ ॥ कैकेय्या यत्कृतं कर्म मम राज्याभिषेचने ॥
अन्यद्वा यदि जानामि सा मया नोदिता यदि ॥ ८९ ॥ पापं मेस्तु तदा मातर्ब्रह्म
हत्याशतोद्भवं ॥ हत्वा वसिष्ठं खड्गेन अरुंधत्या समन्वितं ॥ ९० ॥ भूयात्तत्पाप
मखिलं मम जानामि यद्यपि ॥ इत्येवं शपथं कृत्वा रुरोद भरतस्तदा ॥ ९१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कोशल्यासुतमथालिंग्य पुत्र जानामि मा मुच ॥ एतस्मिन्नंतरे प्राप भरतं च समागतं ॥ ९२
वसिष्ठो मंत्रिभिः सार्द्धं प्रययौ राजमंदिरं ॥ रुदंतं भरतं दृष्ट्वा वसिष्ठः प्राह सादरं ॥ ९३ ॥
वृद्धो राजा दशरथो ज्ञानी सत्यपराक्रमः ॥ भुक्त्वा मर्त्यसुखं सर्वं यष्ट्वा विपुलदक्षणैः ॥ ९४
अश्वमेधादिभिर्यज्ञैर्लब्ध्वा रामं हरिं सुतं ॥ अंते जगाम त्रिदिवं देवेंद्रार्द्धासनं विभुः
॥ ९५ ॥ तं शोचसि वृथैव त्वं अशोच्यं मोक्षभाजनं ॥ आत्मा नित्योऽव्ययः शुद्धो जन्म
नाशादिवर्जितः ॥ ९६ ॥ शरीरं जडमत्यर्थमपवित्रं विनश्वरं ॥ विचार्यमाणे शो
कस्यावकाशः कथं च न ॥ ९७ ॥ पिता वा तनयो वापि यदि मृत्योर्वशं गतः ॥
मूढास्तमनुशोचंति स्वात्मताडनपूर्वकं ॥ ९८ ॥ निःसारे खलु संसारे वियोगो
ज्ञानिनां सदा ॥ भवेद्वैराग्यहेतुः शांतिसौख्यं तनोति च ॥ ९९ ॥ जन्मवान्य
दि लोकेस्मिन् तर्हि तं मृत्युरन्वगात् ॥ तस्मादपरिहार्योयं मृत्युर्जन्मवतां
सदा ॥ १०० ॥ स्वकर्मवशतः सर्वजंतूनां प्रभवाप्ययौ ॥ विजानन्नपि विद्वांसः
कथं शोचतु बांधवान् ॥ १ ॥ ब्रह्मांडाः कोटिशो नष्टाः सृष्टयो बहुशो गताः
शुष्यंति सागराः सर्वे कैवास्था क्षणजीविते ॥ २ ॥ चलपत्रांतलग्नांबु
बिंदुवत् क्षणभंगुरं ॥ आयुस्त्यजत्यवेलायां कस्तत्र प्रत्ययस्तव ॥ ३ ॥
देही प्राक्तनदेहोत्थकर्मणा देहवान् पुनः ॥ तद्देहोत्थेन च पुनः एवं देहस

॥४०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सदात्मनः ॥४॥ यथा त्यजति वै जीर्णं वासो गृह्णाति नूतनं ॥ तथा जीर्णं परित्यज्य
देही देहं पुनर्नवं ॥५॥ अजस्यैव सदा तत्र शोकस्यावसरः कुतः ॥ आत्मा न म्रि
यते जातु जायते वर्द्धते न च ॥६॥ षड्भिर्विरहितोऽनंतः सत्यप्रज्ञानविग्रहः ॥
आनंदरूपो बुध्यादिसाक्षी लयविवर्जितः ॥७॥ एको ह्येव परो ह्यात्मा ह्यद्विती
यः समस्थितः ॥ इत्यात्मानं दृढं ज्ञात्वा त्यक्त्वा शोकं कुरु क्रियां ॥८॥ तैलद्रो
ण्यां पितुर्देहमुद्धृत्य सचिवैः सह ॥ कृत्स्नं कुरु यथान्यायमस्माभिः कुल
नंदन ॥९॥ इति संबोधितः साक्षाद्गुरुणा भरतस्तदा ॥ विसृज्य ज्ञानजं
शोकं चक्रे सविधवक्रियां ॥१०॥ गुरुणोक्तप्रकारेण अहिताग्नेर्यथावि
धिः ॥ संस्कृत्य स पितुर्देहं विधिदृष्टेन कर्मणा ॥११॥ एकादशेऽहनि प्राप्ते
ब्राह्मणान्वेदपारगान् ॥ भोजयामास विधिवत् रा[illegible]शोऽथ सहस्रशः
१२॥ उद्दिश्य पितरं तत्रैव राममेवानुचिंतयन् ॥ वसिष्ठेन सह भ्रात्रा मंत्रि
भिः परिवारितः ॥१४॥ रामेऽरण्यं प्रयाते सह जनकसुतालक्ष्मणाभ्यां
सुघोरं माता मे राक्षसी वा प्रदहति हृदयं दर्शनादेव सद्यः ॥ गच्छाम्यारण्यप
मद्यं स्थिरमतिरखिलं दूरतोपास्य राज्यं रामं सीतासमेतं स्मितरुचि
रमुखं नित्यमेवानुसेवे ॥ इति श्रीमदध्या० उम० उ० अया० सप्तमोऽध्यायः ॥
॥७॥

× श्रीं लपोभ्यो धनं ददौ । ददौ गवां सहस्राणि
११ × ग्रामान् रत्नं वराणि च ॥१३॥ अश्वसहेच गृहेनगृ

वसीष्टो मुनिभिः सार्द्धं मंत्रिभिः पौरवासिभिः राज्ञः सभां देवसभां संन्निविष्टाम ॥८१
विशुद्धिलुः॥१॥ तत्रासने समासीनश्च तु सुखरतापरः॥ अनीयभरतं तत्र
उपविश्य साह नुजं॥२॥ अब्रवीद्वचनं दत्त्रा कालोचितमरिंदमं॥ वत्स राज्ये
भिषेक्ष्यामि त्वामद्य पितृत्रासनात्॥३॥ केकय्यायाचितं राज्यं तदर्थं पुरा
वर्षभा॥ सत्यसंधीदशरथः॥ प्रतिज्ञाय ददौ किल॥४॥ अभिषेको भवे
त्तव मुनिभिर्मंत्रपूर्वकं॥ तच्छुत्वा भरतो प्याह मम राज्येन किं मुने॥५॥
रामो राजाधिराजश्च वयं तस्यैव किंकराः॥ श्वः प्रभाते गमिष्यामि राम
मानेतुमंजसा॥६॥ अहं यूयं मातरश्च केकयीं राक्षसीं विना हनिष्याम
मुनेवाहं कैकयीं मातृगंधिनीं॥७॥ किं तु मां नो रघुश्रेष्टस्त्रीहं तारं सहि
ष्यते॥ ततः श्वोप्यहं गमिष्यामि पादचारेण दंडकान्॥८॥ शत्रुघ्नः सहि
तस्तूर्णं पर्यमायो तु वानरा॥ रामो वनं यथायातः सेव्याहं वल्कलांबे
रः॥९॥ फलमूलकृताहारः शत्रुघ्नसहितो मुने॥ भूमीशायी जटा
धारी यावद्रामो निवर्त्तते॥१०॥ इति निश्चित्य भरतस्तूष्णीमेवावत
स्थीवान्॥ साधु साधु त्वीति सर्वे तं प्रशंसुस्तं मुदान्विताः॥११॥ ततः
प्रभाते भरतं गच्छंतं सर्वसैनिकाः॥ अनुजग्मुः सुमंत्रेणाचोदिताः

॥८१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

साश्वकुंजराः ॥ कोशल्याद्या राजदाराः वसिष्ठप्रमुखा द्विजाः ॥ छादयंतो भुवं सर्वे पृ
ष्ठतः पार्श्वयोरग्रतः ॥१३॥ शृंगवेरपुरं गत्वा गंगाकूले समंततः ॥ उवास महती सेना शत्रु
घ्नपरिचोदिता ॥१४॥ आगतं भरतं श्रुत्वा गुहः शंकितमानसः ॥ महत्या सेनया सार्द्धं आग
तो भरतः किल ॥१५॥ पापं कर्तुं न यात्यत्र रामस्य विदितात्मनः ॥ मत्वा न हृयं देयं यदि
प्रदूस्तरिष्यसि ॥१६॥ गंगां नो चेत्समारुह्य नावस्तिष्ठंतु सायुधाः ॥ ज्ञातयो मे समाया
ताः पश्यंतो सर्वे तोदिष्णुगं ॥१७॥ इति सर्वान्समादिश्य गुहोभरतमागतः ॥ उपायनानि
संगृह्य विविधानि बहून्यपि ॥१८॥ प्रययौ ज्ञातिभिः सार्द्धं बहुभिर्विविधायुधैः ॥ निवे
द्योपायनान्यग्रे भरतस्य समंततः ॥१९॥ दृष्ट्वा भरतमासीनं सानुजं सह मंत्रिभिः ॥ चि
रांबरं घनश्यामं जटाकुकुटधारिणं ॥२०॥ राममेवानुशोचंतं रामरामेतिवादिनं ॥ न
नाम शिरसा भूमौ गुहोहमिति चाब्रवीत् ॥२१॥ भ्रातस्त्वं राघवेनात्र समेतः स
मवस्थितः ॥ रामे पालिंग्यतः सार्द्धं नयने नामसत्सनो ॥२२॥ शीघ्रमुत्थाप्य भ
तो गाढमालिंग्य सादरं ॥ पृष्ट्वानामयमव्यग्रं सखायमिदमब्रवीत् ॥२३॥ अपि
धन्योसि हृतदृष्टोसि यस्त्वया परिभाषितः ॥ रामो राजीवपत्राक्षो लक्ष्मणेन
च सीतया ॥२४॥ यत्र रामस्त्वया दृष्टः तत्र मां नय सुव्रत ॥ सीतया सहितो य
त्र सुप्तस्तद्दर्शय सखे मे ॥२५॥ एवं रामस्य प्रियतमोपन्क्तवानसि भाग्यवान् ॥ इ
ति संस्मृत्य संस्मृत्य रामं साश्रुविलोचनः ॥२६॥ गुहेन सहितस्तत्र यत्र राम

त्रा१५

(८१)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्ततो निशि ॥ ययौ दर्शनायनस्थलं कुशैः समास्तृतं ॥ २७ ॥ सीताभरणसं ॥ ४२ ॥
संलग्नं स्वर्णबिंदुभिरंकितं ॥ दुःखसंतप्तहृदयो भरतः पर्यदेवयत् ॥ २८ ॥ अ
होति सुकुमारी या सीता जनकनंदनी ॥ प्रासादे रत्नपर्यंके कोमलास्तरणे
शुभे ॥ २९ ॥ रामेण सहिता नित्यं सा कथं कुशविष्टरे ॥ सीता रामेण सहिता दु
खेन मम दोषतः ॥ ३० ॥ धिग्मां जातोस्मि कैकय्या पापराशिः समागतः ॥ मन्नि
मित्तमिदं क्लेशं रामस्य परमात्मनः ॥ ३१ ॥ अहोति सफलं जन्म लक्ष्मणस्य महा
त्मनः ॥ राममेवानुसदान्वेति वनेप्यनिपि दृष्टधीः ॥ ३२ ॥ अहं रामस्य दासा ये ते
षां दासस्य किंकरः ॥ यदि स्यां सफलं जन्म मम भूयान्न संशयः ॥ ३३ ॥ भ्रा
तर्जीनासि यदि तत् कथयस्व ममाखिलं ॥ यत्र तिष्ठति तत्राहं गच्छाम्या
न्वनुमंजसा ॥ ३४ ॥ गुहस्तं मृदुहृदयं गत्वा सस्नेहमब्रवीत् ॥ देव राम वध
न्योसि यस्य ते भक्तिरीदृशी ॥ ३५ ॥ रामे राजीवपत्राक्षे सीतायां लक्ष्म
णे तथा ॥ चित्रकूटाद्रिनिकटे मंदाकिन्याविदूरतः ॥ ३६ ॥ मुनीनामाश्र
मपदे रामस्तिष्ठति सानुजः ॥ जानक्या सहितो नंतः सुखमास्ते किल
प्रभुः ॥ ३७ ॥ तत्र गच्छामहे सीघ्रं गंगां तर्तुमिहार्हसि ॥ इत्युक्त्वा हरिनं ग
तानावः पंच शतानि विहा ॥ ३८ ॥ समाययौ स सैन्यस्य तर्तुं गंगां महान

॥४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नदीं॥ स्वयमेवाभिनीयैकं राजनावं गुहस्तदा॥३९॥ आरोप्य भरतं तत्र शत्रु
घ्नं राममातरं॥ वसिष्ठं च तथान्यत्र कैकेयीं चान्ययोषितः॥४०॥ नीलीगंगो
ययौ रात्रं भरद्वाजाश्रमं प्रति॥ दूरस्स्थाप्य महासैन्यं भरतस्सानुजो ययौ
॥४१॥ आश्रमे मुनिमासीनं ज्वलंतमिव पावकं॥ दृष्ट्वाननाम भरतः साष्टां
गमपि भक्तितः॥४२॥ ज्ञात्वा दाशरथिं प्रीत्या पूजयामास मौनिराट्॥ पप्र
च्छ कुशलं दृष्ट्वा जटावल्कलचीरिणं॥४३॥ राज्यं प्रशासतस्तस्य किमेतद्व
ल्कलादिकं॥ आगतोसि किमर्थं च विपिनं मुनिसेवितं॥४४॥ भरद्वाजं
वच्च मुक्त्वा भरतः साश्रुलोचनः॥ सर्वं जानासि भगवन् सर्वभूतानुग
यस्थितः॥४५॥ तथापि पृच्छसे किंचित्त्वदनुग्रह एव मे॥ कैकेय्या यत्कृतं क
र्म रामराज्यविघातकं॥४६॥ वनवासादिकं वापि नहि जानामि किंच
न॥ त्वत्प्रसादयुगं मेद्य प्रमाणं मुनिसत्तम॥४७॥ इत्युक्त्वा पादयुगलं
मुनेस्पृष्ट्वार्त्तमानसः॥ ज्ञातुमर्हसि मां देव शुद्धो वा शुद्ध एव च॥४८॥
मम राज्येन किं स्वामिन् रामे तिष्ठति राजनि॥ किंकरोस्मीह मुनिश्रे
ष्ठ रामचंद्रस्य शासतः॥४९॥ अतो गत्वा मुनिश्रेष्ठ रामस्य चरणां
तिके॥ पतितो राज्यसंभारान् समर्प्यात्रैव राघवं॥५०॥ अथ सेवे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८७

वसिष्ठाद्यैर्पौराजानपदैः सह ॥ नेष्येयोध्यां रमानाथं दासः सेवेति नि ॥४३

श्चयवत् ॥ ५१ ॥ इत्कदीतमाकर्ण्य भरतस्य वचो मुनिः आलिंग्य मूर्ध्नि

वघ्राय प्रेम्णा सैः ससुविस्मयः ॥ ५२ ॥ वत्स ज्ञातं पुरैवैतद्भविष्यं ज्ञानच

क्षुषा ॥ मा शुचस्त्वं परो भक्तः श्रीरामे लक्ष्मणादपि ॥ ५३ ॥ आतिथ्यं क

र्तुमिच्छामि ससैन्यस्य तवानघ ॥ अद्य भुक्त्वा ससैन्यस्त्वं श्वो गंतारामस

सन्निधौ ॥ ५४ ॥ यदाज्ञापयती भवांस्तत्तथेति भरतोऽब्रवीत् ॥ भरद्वा

जऽपः स्पृष्ट्वा मौनी होमगृहे स्थितः ॥ ५५ ॥ दध्यौ कामदुघां कामवर्षि घं

णीं कामदो मुनिः ॥ असृजत्कामधुक्सर्वं यथाकाममलौकिकं ॥ ५६ ॥

भरतस्य ससैन्यस्य यथेष्टं चेम नोरथं ॥ ततश्च वर्षसकलं तत्र स्तास्ते

सर्वसैनिकाः ॥ ५७ ॥ वसिष्ठप्रजरहिताग्रेणास्त्र दृष्टेन कर्मणा ॥ पश्चा

त्ससैन्यं भरतं तर्पयामास गोऽयी राट् ॥ ५८ ॥ उषित्वादिनमेकं ते आश्र

मे सर्वसंन्निभे ॥ अभिवाद्य पुनः प्रोर्न भरद्वाजं सहानुजः ॥ ५९ ॥ भर

तस्तत्कृतानुज्ञः प्रययौ रामसंन्निधिं ॥ चित्रकूटमनुप्राप्य दूरे संस्थो

प्य सर्ववत् ॥ ६० ॥ रामसंदर्शनाकांक्षी प्रययौ भरतः स्वयं ॥ शत्रु

घ्नेन सुमंत्रेण गुहेन च परंतप ॥ ६१ ॥ तापसीमंडलं सर्वं विदि

८७ हातान्यवर्त्तत(व) ॥ अद्दष्टारामभवनं मटछद्दषिमंडलं ॥ ६२ ॥ कुत्रा

84

6

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्नात्वा सीतया सार्द्धं लक्ष्मणेन रघूत्तमः ॥ उषुरत्र गिरेः पश्चाद्गंगाया उ
त्तरे तटे ॥८३॥ विविक्तं रामसदनं रम्यं काननमंडितं ॥ सफलैः शाम्र
फणसैः कदलीखंडसंवृतं ॥८४॥ चंपकैः कोविदारैश्च पुंनागैर्बकु
लैस्तथा ॥ एवं दर्शितमालोक्य मुनिभिर्भरतोऽग्रतः ॥८५॥ हर्षाद्ययौ
रघुश्रेष्ठभवनं मंत्रिणा सह ॥८६॥ ददर्श दूराद्दतिभासुरं शुभं रामस्य
गेहं मुनिवृंदसेवितं ॥ वृक्षाग्रसंसक्तसुवल्कलाजिनं रामाभिरामं
भरतः सहानुजः ॥८७॥ इति श्री ब्र० आ० उ० म० अष्टमः सर्गः ॥ ८ ॥ श्री
अथ गत्वाश्रमपदं समीपं भरतो मुदा ॥ सीतारामपदैर्युक्तं पवित्रमति
ति शोभनं ॥१॥ स तत्र वज्रांकुशवारिजांचितध्वजादिचिन्हानि
पदानि सर्वतः ॥ ददर्श रामस्य भुवोऽतिमंगलान्यवेष्टयत्पादरजः
सहानुजः ॥२॥ अहो सुधन्योऽहमिमानि रामपादांकितं पश्यति भूतलस्थानि
पश्यामि यत्पादरजो विमृग्यं ब्रह्मादिदेवैः श्रुतिभिश्च नित्यं ॥३॥ ति
इत्यद्भुतप्रेमरसप्लुताशयो विगाह्यमानो रघुनाथभावने ॥ आनं
दजाश्रुस्नपितस्तनांतरः शनैरगामाश्रमसंनिधिं हरेः ॥४॥
स तत्र दृष्ट्वा रघुनाथमासीनं दूर्वादलश्याममायतेक्षणं ॥ ज
टाकिरीटं वनवल्कलांबरं प्रसन्नवक्त्रं तरुणारुणद्युतिं ॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विनोदयंतं जनकात्मजां तदा सौमित्रिणा सेवितपादपंकजं ॥ तदाभिदुद्रा
व रघुत्तमं शुचा ॥ हर्षाच्च तत्पादयुगं त्वराग्रहात् ॥६॥ रामस्तमालक्ष्य सुदी
र्घबाहुर्दोर्भ्यां परिष्वज्य निषेच नेत्रजैः ॥ जलैस्तथांको परिसंन्निवेश्यातं
पुनः पुनः संपरिषस्वजे विभुः ॥७॥ अथ तामातरः सर्वाः समाजग्मुः स्वरा
न्विताः ॥ राघवं दृष्टुकामास्तास्तृषार्त्ता गौ यथा जलं ॥८॥ रामः स्वमातरं
वीक्ष्य द्रुतमुत्थाय पादयोः ॥ ववंदे साश्रु सा पुत्रमालिंग्यातिव दुःखिताः ॥९
इतराश्च तथा नत्वा जननीः रघुनंदनः ॥ ततः समागतं दृष्ट्वा वसिष्ठं र
घुनंदनः ॥१०॥ साष्टांगं प्रणिपत्याह धन्योस्मीति पुनः पुनः ॥ यह मु
पविश्याह सर्वानेव रघूद्वहः ॥११॥ पिता मे कुशली किं वा माता किं वा
त्तिदुःखितो ॥ वसिष्ठस्तमुवाचेदं पिता ते रघुनंदन ॥१२॥ त्वद्वियो
गाग्निनतप्तास्मा तामेव परिचिंतयन् ॥ रामरामेति सीतेति लक्ष्म
णेति ममार ह ॥१३॥ श्रुत्वा तत्कर्णशूलाभं पुरोधोवचनं मंजसा ॥ हा
हतोस्मीति पतितो रुदन् रामः सलक्ष्मणः ॥१४॥ ततो नुरुरुदुः
सर्वा मातरश्च तथापरे ॥ हा तात मां परित्यज्य क्व गतोसि घृ
॥४४॥ णाकर ॥१५॥ अनाथोस्मि महाबाहो मां को वा लालयेदितः ॥ सीता च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लक्ष्मणश्चैव विलेपतुरथो भरतं ॥१६॥ वसीष्टः शांतवचनै रामयामास तान्
सुतान् ॥ ततो मंदाकिनी गत्वा स्नात्वा तेवीलकल्मषाः ॥१७॥ राज्ञे ददुर्जलं तत्र
सर्वे ते जलकांक्षिणे ॥ पिंडान्निर्वापयामास रामो लक्ष्मणसंयुतः ॥१८॥ इंगु
दी फलपिण्याकरचितानन्न समधुप्लुतान् ॥ वयं यदन्नपितरं स्तदन्नं स्मृति
चोदितं ॥१९॥ इति दुःखाश्रुपूर्णाक्षः पुनः स्नात्वा गृहं ययौ ॥ सर्वे रुरुदुः
सुचिरं ॥ स्नात्वा जग्मुः स्वधाश्रमं ॥२०॥ तस्मिंस्तु दिवसे सर्वे उपवासं प्र
चक्रिरे ॥ ततः परेद्यु विमले स्नात्वा मंदाकिनीजले ॥२१॥ उपविष्टं समालिं
ग्य भरतो राममब्रवीत् ॥ राम राम महाभाग स्वात्मानमभिषेचय ॥२२॥ रा
ज्यं पालय पैत्रं ते ज्येष्टं त्वं मे पिता यथा ॥ क्षत्रियाणामयं धर्मो यत्प्रजापरि
पालनं ॥२३॥ इष्ट्वा यज्ञैर्बहुविधैः पुत्रानुत्पाद्य तंतवे ॥ राज्ये पुत्रं समा
रोप्य गमिष्यसि ततो वनं ॥२४॥ इदानीं वनवासस्य कालो नैव प्रसीद मे
मातुर्मे दुष्कृतं किंचित् स्मर्तुं नार्हसि पाहि मे ॥२५॥ इत्युक्त्वा चरणौ भ्रा
तुः शिरस्याधाय भक्तितः ॥ रामस्य पुरतः साक्षाद्दंडवत्पतितो भुवि ॥२६॥
उत्थाप्य राघवः शीघ्रमारोप्यांके तिभक्तितः ॥ उवाच भरतं रामः स्नेहार्द्र

87

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नयनः ज्ञानैः।।२७।। शृणु वत्स प्रवक्ष्यामि यथोक्तं यत्तथैव तत्।। किंतु मामवद
त्तातो नव वर्षाणि पंच च।।२८।। उषित्वा दंडकारण्ये पुरे पश्चात्समाविश।। इ
नीं भरतायेदं राज्यं दत्तं मयाखिलं।।२९।। तत्पित्रैव सुव्यक्तं राज्यं दत्तं न वै ब
हि।। दंडकारण्यराज्यं दंडकारण्यराज्यं च दत्तं पित्रा तथैव च।।३०।। अतः पि
तुर्वचः कार्यमवाप्यामिति यत्नः।। पितुर्वचनमुल्लंघ्य स्वतंत्रो यस्तु वर्त्तते।।३१
स जीवन्नेव मृतको देहांते निरयं व्रजेत्।। तस्माद्राज्यं प्रशाधि त्वं वयं दंडकपा
लकाः।।३२।। भरतस्त्वब्रवीद्रामं कामुको मूढधीः पिता।। स्त्रीजितोऽभ्रांतहृद
य उन्मत्तो यद्वक्ष्यते।।३३।। तत्सत्यमपि नो ग्राह्यं भ्रांतवाक्यं यथा सुधीः।।
श्रीराम उवाच।। न स्त्रीजितः पिता ब्रूयान्न कामी नैव मूढधीः। पूर्वं प्रतिश्रु
तं तस्मै सत्यमेव न संशयः।।३४।। असत्याद्भीतिरधिका महती नरकादपि।।
करोमि सह मत्पिता तत्सत्यं तस्मै प्रतिश्रुतं।।३५।। अथ वाक्यमहं कुर्याम
सत्यं राघवोऽपि सन्।। इत्युदीरितमाकर्ण्य रामस्य भरतोऽब्रवीत्।।३६।।
तथैव चीरवसनो वत्स्याम्यहं सुव्रत।। चतुर्दश समास्त्वं तु राज्यं कुरु य
थासुखं।।३७।। श्रीराम उवाच।। पित्रा दत्तं तवैवेदं राज्यं मह्यं वनं ददौ।।
व्यत्ययं यद्यहं कुर्यामसत्यं पूर्ववत्स्थितं।।३८।। भरत उवाच।। अहमप्या

88

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥मिष्यामि सेवे त्वां लक्ष्मणो यथा॥ नो चेत्प्रायोपवेशेन सज्जाम्येतत्कलेवरं॥३९॥
इत्येवं निश्चयं कृत्वा दर्भानास्तीर्य चातपे॥ मनसापि विनिश्चित्य स प्राङ्मुख उपा
विवेशासः॥४०॥ भरतस्यापि निर्बंधं दृष्ट्वा रामोऽपि विस्मितः॥ नेत्रांतसंज्ञां
गुरवे च चकार रघुनंदनः॥४१॥ एकांते भरतं प्राह वसिष्ठो ज्ञानिनां वरः॥ वत्स
गुह्यं शृणु त्वं च मम वाक्यात्सुनिश्चितं॥४२॥ रामो नारायणः साक्षाद्ब्रह्म
णा याचितः पुरा॥ रावणस्य वधार्थाय जातो दशरथात्मजः॥४३॥ योगमाया
पि सीतेति जाता जनकनंदिनी॥ शेषोऽपि लक्ष्मणो जातो राममन्वेति सर्वदा॥४४॥
रावणं हंतुकामस्ते गमिष्यंति न संशयः॥ कैकेय्या वरदानादि यद्दिनिष्ठुर
भाषणं॥४५॥ सर्वं देवकृतं नो चेदेवं सा भाषयेत्कथं॥ तस्मात्त्यजाग्रहं तात
रामस्य विनिवर्त्तने॥४६॥ निवर्त्तस्व महासेन्य मातृभिः सहितः पुरं॥ रावणं
सकुलं हत्वा रामः शीघ्रमेवागमिष्यति॥४७॥ इति श्रुत्वा गुरोर्वाक्यं भरतो विस्म
यान्वितः॥ गत्वा समीपं रामस्य विस्मयोत्फुल्ललोचनः॥४८॥ पादुके देहि
राजेंद्र राज्याय तव पूजिते॥ तयोः सेवां करोम्यहं यावदागमनं तव॥४९॥
इत्युक्त्वा पादुके दिव्ये योजयामास पादयोः॥ राम पदस्य ते ददौ रामो
भरतायातिभक्तितः॥५०॥ गृहीत्वा पादुके दिव्ये भरतो रत्नभूषिते॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रामं पुनः परिक्रम्य प्रणम्य च पुनः पुनः ॥५१॥ भरतः पुनराहेदं भक्त्या गद्गदया
गिरा ॥ नव पंच समांते तु प्रथमे दिवसे यदि ॥५२॥ नागमिष्यसि चेद्राम प्रविश्यामि
महानलं ॥ बाढमित्येव तं रामो भरतं सन्यवर्त्तयत् ॥५३॥ ससैन्यः सवसिष्ठश्च
शत्रुघ्नसहितः सुधीः ॥ मातृभिर्मंत्रिभिः सार्द्धं गमनायोपचक्रमे ॥५४॥ कैक
यी राममेकांते त्रुवन्येवजलाकुला ॥ प्रांजलिः प्राह हे राम तव राज्यविघा
तनं ॥५५॥ कृतं मया दुष्टधीया माययालिप्तिमोहितं ॥ क्षमस्व मम दौरात्म्यं क्ष
मासारा हि साधवः ॥५६॥ त्वं साक्षाद्विष्णुरव्यक्तः परमात्मा सनातनः ॥
मायामानुषरूपेण मोहयस्यखिलं जगत् ॥५७॥ त्वयैव प्रेरितो लोकः कु
रुते साध्वसाधु वा ॥ त्वदधीनमिदं विश्वमस्वतंत्रं करोति किं ॥५८॥ यथा कृत्रि
मनर्त्तक्यो नृत्यंति कुहकेच्छया ॥ त्वदधीना तथा माया नर्त्तकी बहुरूपिणी ॥५९॥
त्वयैव प्रेरिताहं च देवकार्यं करिष्यता ॥ पापिष्ठा पापमनसा कर्माचरमरिंदम ॥६०॥
अद्य प्रतीतोसि मम देवानामप्यगोचरः ॥ पाहि विश्वेश्वरानंत जगन्ना
थ नमोस्तु ते ॥६१॥ छिंधि स्नेहमयं पाशं पुत्रवित्तादिगोचरं ॥ त्वज्ज्ञानामल
खड्गेन त्वामहं शरणं गता ॥६२॥ कैकेय्या वचनं श्रुत्वा रामः सस्मितमब्रवी
त् ॥ यदाह मां महाभागे नानृतं सत्यमेव तत् ॥६३॥ मयैव प्रेरिता वाणी त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नवक्रो। द्विमिर्गता॥ देवकार्यार्थसिध्यर्थं मत्र दोषः कुतस्तव॥ ६४॥ गच्छ स्वहृ
द्द मो नित्यं भावयन्ती दिवानिशं॥ सर्वत्र विगतस्नेहा मद्भक्त्या मोक्षसे चिरात्
॥ ६५॥ अहं सर्वत्र समदृक् द्वेष्यो वा प्रिय एव वा॥ नास्ति मे कल्पकस्येव भ
जतोनुभजाम्यहं॥ ६६॥ मन्मायामोहितधियो मामंब मनुजाकृतिं॥ सुखदु
खाद्यनुगतं जानंति न तु तत्वतः॥ ६७॥ दिष्ट्या मद्गोचरं ज्ञानं उत्पन्नं ते भजा
म्यहं॥ स्मरंती तिष्ठ भुवने लिप्यसे न च कर्मभिः॥ ६८॥ इत्युक्ता कोसा परिक्र
म्य रामं सानंदविस्मयं॥ प्रणतानुज्ञातश्रीरामः मोययौ गेहं मुदान्विता॥ ६९॥ भ
रतस्तु महात्मासौ मातृभिर्गुरुणा सह॥ अयोध्यामगमच्छीघ्रं राममेवानु
चिंतयन्॥ ७०॥ पौराञ्जानपदान्सर्वानयोध्यायामुदारधीः॥ प्रवेश्य दुःखि
तान्सर्वान् नंदीग्रामं स्वयं ययौ॥ ७१॥ तत्र सिंहासने नित्यं पादुके स्था
प्य सत्कृतः॥ पूजयित्वा यथा रामं गंधपुष्पाक्षतादिभिः॥ ७२॥ राजोपचारा
रेखिलैः प्रत्यहं नियतव्रतः॥ फलमूलाशनो दांतो जटावल्कलधार
कः॥ ७३॥ अधःशायी ब्रह्मचारी शत्रुघ्नसहितस्तदा॥ राजकार्याणि स
र्वाणि यावंति पृथिवीतले॥ ७४॥ तानि पादुकयोः सम्यक् निवेद्य यतिराघ
वः॥ गणयन्दिवसान्नेव रामागमनकांक्षया॥ ७५॥ स्थितो रामार्पितमना॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथा
साक्षाद्ब्रह्मा मुकुंदं मुकुंदः ॥ रामस्तु चित्रकूटाद्रौ वसन्मुनिनिराकृता ॥ ७६ ॥ सी
तया लक्ष्मणेनापि कंचित्कालं मुदावसन् ॥ नागराश्च सदा यांति रामदर्श ॥४७॥
नलालसाः ॥ ७७ ॥ चित्रकूटस्थितं ज्ञात्वा सीतया लक्ष्मणेन तु ॥ दृष्टान
ज्जनसंबाधं रामस्तस्मा जतं गिरीं ॥ ७८ ॥ दंडकारण्यगमनं कार्यम
प्यनुचिंतयन् ॥ अन्वया सीतया भ्रात्रा ह्यत्र राश्रममुत्तमं ॥ ७९ ॥ स
र्वत्र सुखसंबाधं जनसंबाधवर्जितं ॥ गत्वा मुनिमुपासीनं भासयं
तं तपोवनं ॥ ८० ॥ दंडवत्प्रणिपत्याह रामोहमभिवादये ॥ पितुराज्ञां
पुरस्कृत्य दंडकाननमागतः ॥ ८१ ॥ वनवासमिषेणापि धन्योहं द
र्शनात्तव ॥ श्रुत्वा रामस्य वचनं ज्ञात्वा रामं स्वयं हरिं ॥ ८२ ॥ पूजयामा
स विधिवद्भक्त्या परमया मुनिः ॥ वन्यैः फलैः कृतातिथ्यं सोपविष्टं
रघूत्तमं ॥ ८३ ॥ सीतां च लक्ष्मणं चैव संतुष्टो वाक्यमब्रवीत् ॥ ना
र्या मेति वसंवृद्धा ह्यनुसूयेति विश्रुता ॥ ८४ ॥ तपश्चरंती सुचिरं ध
र्मज्ञा धर्मवत्सला ॥ अंतस्तिष्ठति तां सीते पश्य त्वं चात्तिशोभने ॥ ८५ ॥
॥४७॥ तथेति जानकी प्राह रामो राजीवलोचनः ॥ गच्छ देवी नमस्कृत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रीघ्रमेहि पुनः शुभे॥ ८६॥ तथेति रामवचनं सीताचापि तथाकरोत्॥ दंड
वत्प्रति तारण्ये सीतां दृष्ट्वा तिहृष्टधीः॥ ८७॥ अनुसूयासमालिंग्य वत्से सी
तेति सादरं॥ दिव्ये ददौ कुंडले द्वे निर्मिते विश्वकर्मणा॥ ८८॥ कुंडले द्वे द
दौ तस्यै निर्मले भक्तिसंयुता॥ अंगरागं च सीतायै ददौ दिव्यं शुभानना॥
॥ ८९॥ न त्यक्ष्यत्यंगरागेण शोभा हा कमलानने॥ पातिव्रत्यं पुरस्कृत्य
राममन्वेति जानकी॥ ९०॥ कुशली राघवो यातु त्वया सह पुनर्गृहीं॥ भो
जयित्वा यथान्यायं रामं सीतासमन्वितं॥ ९१॥ लक्ष्मणं च तदा रामं पुनः
प्राह कृतांजलिः॥ ९२॥ राम स्वमेव भवनानि विधाय तेषां संरक्षणाय
सुरमानुषतीर्यगादीन्॥ देहान्बिभर्षि न च देहगुणैर्विलिप्तस्त्वत्तो बि
भेत्यखिलमोहकरी च माया॥ ९३॥ इति श्रीब्रह्मांडपुराणे उ
त्तरखंडे अध्यात्मरामायणे उमामहेश्वरसंवादे अयोध्याकांडे
नवमोध्यायः॥ ९॥ अध्यात्मरामचरिते अयोध्याकांडेनवैव स
र्गाणां सप्ततिः श्लोकाः पुण्यं मोक्षप्रदाः पुंसां॥ इति अयोध्याकांडं समाप्तं॥
अथ त्रिदिवसं स्थित्वा प्रभाते रघुनंदनः॥ स्नात्वा मुनिं समामंत्र्य
प्रयाणायोपचक्रमे॥ १॥ मुने गच्छामहे सर्वे मुनिमंडलमंडितं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विपिनं दंडकं यत्र त्वमाशु गंतुमिहार्हसि ॥२॥ मार्गप्रदर्शनार्थाय शिष्यानाज्ञा ॥४८॥
तुमर्हसि ॥ श्रुत्वा रामस्य वचनं प्रहस्यात्रिर्महायशाः ॥३॥ सर्वस्य मार्गद्रष्टा त्वं
तव को मार्गदर्शकः ॥ तथापि दर्शयिष्यंति तव लोकानुसारिणः ॥४॥ इति शि
ष्यान्समादिश्य स्वयं किंचित्तमन्वगात् ॥ रामेण वारितः प्रीत्या अत्रिः स्वभ
वनं ययौ ॥५॥ क्रोशमात्रं ततः गत्वा ददर्श महतीं नदीं ॥ अत्रिशिष्याननुवाचेदं
रामो राजिवलोचनः ॥६॥ नद्याः संतरणे कश्चिदुपायो विद्यते न वा ॥ ऊचुः
स्ते विद्यते नौका सुदृढा रघुनंदन ॥७॥ तारयिष्यामहे युष्मान् वयमेव क्ष
णादिह ॥ ततो नावि समारोप्य सीतां राघवलक्ष्मणौ ॥८॥ क्षणात्संतारया
मासुर्नदीं मुनिकुमारकाः ॥ रामाभिनंदिताः सर्वे ययुरत्रेराश्रमं ॥९॥
ततोऽतिविपिनं घोरं झिल्लीझंकारनादितं ॥ नानामृगगणाकीर्णं सिंह
व्याघ्रादिभिषणं ॥१०॥ राक्षसैर्घोररूपैश्च सेवितं रोमहर्षणं ॥ प्रवि
श्य विपिनं घोरं रामो लक्ष्मणमब्रवीत् ॥११॥ अतः परं प्रयत्नेन गंतव्यं
सबलेन मे ॥ धनुर्गुणेन संयोज्य शरेणापि करे धृतं ॥१२॥ चस्तुश्चार
य सर्वत्र दृष्टं रक्षो भयं महत् ॥ विद्यते दंडकारण्ये श्रुतं पूर्वमरिंदम ॥१४×२
॥४८॥ अग्रे चराम्यहं पश्चात्त्वमेव हि धनुर्धर ॥ अवयोर्मध्यगा सीता मायेवात्मप
रात्मनोः ॥१३×१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्येवं भाषमाणौ तौ जग्मतुः सार्द्धयोजनं॥ तत्रैका पुष्करिण्यास्ते कल्हारकु
मुदोत्पलैः॥१५॥ अंबुजैः शीतलोदेन शोभमाना व्यदृश्यत॥ तत्समीपम
थागत्वा प्राप्य तत्सलिलं शुभं॥१६॥ ऊषुस्ते सलिलाभ्यासे वृक्षाणां छायामु
पाश्रिताः तत्रोदद्दृशुरायांतं महाहासं भयानकं॥१७॥ करालदंष्ट्रवदनं
भीषयंतं स्वगर्जितैः॥ वामांसे न्यस्तशूलाग्रग्रथितानेकमानुषं॥१८॥
भक्षयंतं गजं व्याघ्रं महिषं वनगोचरं॥ आरोपितधनुर्धर्त्ता रामो लक्ष्म
णमब्रवीत्॥१९॥ पश्यायाति महाकायो राक्षसोयमुपागतः॥ आयात्य
भिमुखं नो गत्वा भीरूणां भयमावहं॥२०॥ सज्जीकृत्य धनुस्तिष्ठ मा भै
र्जनकनंदिनी॥ इत्युक्त्वा बाणमादाय स्थितो राम उवाच तं॥२१॥ स तु दृ
ष्ट्वा रमानाथं लक्ष्मीं च जानकीं मुदा॥ आट्टहासं ततः कृत्वा भीषयन्निद
मब्रवीत्॥२२॥ कौ युवां चापतूणीरजटावल्कलधारिणौ॥ मुनिवेषध
रौ बालौ स्त्रीसहायौ सुदुर्मदौ॥२३॥ सुंदरं वनमेवाक्षं प्रविष्टौ कुलो
त्तमौ॥ किमर्थमागतौ घोरं वनं व्यालनिषेवितं॥२४॥ श्रुत्वा राक्षसो वचो
रामः स्मयमान उवाच तं॥ अहं रामस्त्वयं भ्राता लक्ष्मणो मम संगतः॥२५
एषा सीता मम प्राणवल्लभा वयमागताः॥ पितुर्वाक्यं पुरस्कृत्य शिक्षि

९५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना[?]र्थे भवादृशां ॥ श्रुत्वा रामस्य वचनं अट्टहासमथाकरोत् ॥ व्यादाय व ॥४९॥
क्त्रं बाहुभ्यां शूलमादाय सत्वरः ॥ २७ ॥ मां न जानासि राम त्वं विराधं लोक
विश्रुतं ॥ मद्भयान्मुनयः सर्वे त्यक्त्वा वनमितो गताः ॥ २८ ॥ इतो जीवितु
मिच्छास्ति त्यक्त्वा सीतां निरायुधौ ॥ पलायतं न चेच्छीघ्रं भक्षयामि यु
वामहं ॥ २९ ॥ इत्युक्तो राक्षसेनाथ व्यादातुमभि दुद्रुवे ॥ राम छित्त्वा द तं
द्वाकुसारेण प्रसहन्निव ॥ ३० ॥ ततः क्रोधपरीतात्मा व्यादाय विकटं मु
खं ॥ राममभ्यद्रवद्रामश्चिच्छेद परिधावतः ॥ ३१ ॥ पदद्वयं विराधस्य
तद्द्रुतमिवाभवत् ॥ ततः सर्प इवास्येन ग्रसितुं राममापतत् ॥ ३२ ॥
ततोर्धचंद्राकारेण बाणेनास्य महच्छिरः ॥ चिच्छेद रुधिरौघेन पपा
त धरणीतले ॥ ३३ ॥ ततः सीता समालिंग्य प्रशशंस रघूत्तमं ॥
ततो दुंदुभयो नेदुर्दिवि देवगणेरिताः ॥ ३४ ॥ ननृतुश्चाप्सरो हृष्टाः
जगुर्गंधर्वकिंनराः ॥ विराधकायादति सुंदराकृतिर्विभ्राजमा
नो विमलांबरावृतः ॥ प्रतप्तचामीकरचारुभूषणो व्यदृश्य
॥४९॥ ताग्रे गगने रविर्यथा ॥ ३५ ॥ प्रणम्य रामं प्रणतार्तिहारिणं भवं

58

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रवाहोपरमं घृणाकरं ॥ प्रणम्य भक्त्या यः प्रणाम दंडवत् प्रसन्न सर्वांनि
हरं प्रसन्नधीः ॥३६॥ श्रीरामराजीवदलायताक्ष विद्याधरोहं विमलप्रका
शः ॥ दुर्वाससा कारणकोपमूर्त्तिना नाम्ना तुंबुरा सोद्य विमोचितस्त्वया ॥३७॥
अतःपरस्त्वच्चरणे रतिर्दयास्मृतिः सदा मेस्तु भवोपशांतये ॥ त्वन्नाम
संकीर्त्तनमेव वाणी करोतु मे कर्णपुटं त्वदीयं ॥३८॥ कथामृतं पातु क
रद्वयं ते पादारविंदार्चनमेव कुर्यात् ॥३९॥ शिरश्च ते पादयुगं प्रणामं
करोतु नित्यं भवदीयमेव ॥ नमस्तुभ्यं भगवते विशुद्धज्ञानमूर्त्तये ॥४०॥
आत्मारामाय रामाय सीतारामाय वेधसे ॥ प्रसन्न पाहि मां राम यास्यामि
त्वदनुज्ञया ॥४१॥ देवलोकं सुरश्रेष्ठ माया मामावृणोतु नो ॥ इति विज्ञा
पितस्तेन प्रसन्नो रघुनंदनः ॥४२॥ ददौ वरं तदा प्रीतो विराधाय महा
मतिः ॥ गच्छ विद्याधराशेषमायादोषगुणोज्झित ॥४३॥ त्वया मद्दर्श
नं प्राप्य मुक्तो ज्ञानपरतां व्रज ॥ मद्भक्तिर्दुर्लभा लोके जातास्ते मुनिसं
युतः ॥४४॥ अतस्त्वं भक्तिसंपन्नः परं याहि ममाज्ञया ॥ रामेण रक्षोपि
धनं सुपारं शापाद्विमुक्तिः वरदानमेव ॥ विद्याधरस्त्वं पुनरेव लब्ध्वा
रामाद्गुणांश्चैति नरोऽखिलार्थान् ॥४५॥ इति म० उ० ओ० प्रथमसर्गः ॥१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विराधे स्वर्गते रामो लक्ष्मणेन च सीतया ॥ जगाम शरभंगस्य वनं सर्वसुखावहं ॥१॥
शरभंगस्ततो दृष्ट्वा रामं सौमित्रिणा सह ॥ आयांतं सीतया सार्द्धं संभ्रमादुत्थितः सुधीः ॥२
आलिलिंग्य सुसंपूज्य विष्टरेषु पवेशये नु ॥ आतिथ्यमकरोत्तेषां कंदमूलफला
दिभिः ॥३॥ प्रीत्याह शरभंगोऽपि रामं भक्तपरायणं ॥ बहुकालमिहैवासं तपसे
कृतनिश्चयः ॥४॥ तव संदर्शनाकांक्षी राम त्वं परमेश्वर ॥ अद्य मत्तपसा सिद्धं
यत्पुण्यं न बहु विद्यते ॥५॥ तत्सर्वं तव दास्यामि ततो मुक्तिं व्रजाम्यहं ॥ समर्प्य
रामस्य महत्पुण्यं फलं विरक्तः शरभंगयोगी ॥ चितां समादाह यदप्रमेयं
रामं ससीतं सह सानुजाभ्याम् ॥७॥ ध्यायन्नचिरं राममरोषहृत्स्थं दूर्वादलश्याम
लमंबुजाक्षं ॥ चीरांबरं स्निग्धजटाकलापं सीतासहायं स्मितलक्ष्मणं तं ॥८॥
कौ वा दयालुः स्मृतकामधेनुर्न्वो जगत्यां रघुनायकाद्देहो ॥ स्मरतो मया नित्यमु
मनन्यभाजा ज्ञात्वा स्मृतिं मे स्वयमेव यातः ॥९॥ पश्यन्निदानीं देवेशो रामो दा
शरथिः प्रभुः ॥ दग्ध्वा स्वदेहं गच्छामि ब्रह्मलोकमकल्मषः ॥१०॥ अयोध्याधि
पतिर्मेऽस्तु हृदये राघवः सदा ॥ यद्वामांके स्थितानीलें ॥ सीता मेघस्येव तडि
घथा ॥११॥ इति रामं चिरं ध्यात्वा दृष्ट्वा च पुरतः स्थितं ॥ प्रजाल्य सहसा वह्निं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दग्ध्वापंचात्मकंवपुः॥१२॥दिव्यदेहधरःसाक्षाद्ययौलोकपतेःपदंततो
मुनिगणाःसर्वेदंडकारण्यवासिनः॥१३॥अजग्मुराघवंद्रष्टुंशरभंगनिवेश
नं॥दृष्ट्वमुनिसमूहंतंजानकीरामलक्ष्मणौ॥१४॥प्रणेमुःसहसारामोमाया
मानुषरूपिणः॥अशीर्भिरभिनंद्याथरामंसर्वेहृदिस्थितं॥१५॥ऊचुःप्रां
जलयःसर्वेधनुर्बाणधरंहरिं॥भूमेर्भारावतारायजातोसिब्रह्मणा
र्थितः॥१६॥जानीमस्त्वांहरिंलक्ष्मींजानकींलक्ष्मणंतथा॥अतस्त्वा
मृषिणांदुःखंमोक्तुमिहार्हसी॥१७॥आगच्छयामोमुनिस्थितानि
वनानिसर्वाणिरघूत्तमक्रमात्॥द्रष्टुंसुमित्रासुतजानकीभ्यांतदा
दयास्मासुदृढाभविष्यति॥१८॥इतिविज्ञापितोरामःकृतांजलिपु
टैर्विभुः॥जगाममुनिभिःसार्द्धंद्रष्टुंमुनिगणान्सः॥१९॥ददर्शतत्रप
तितान्यनेकानिशिरांसिसः॥अस्थीनिभूमौसर्वत्ररामोवचनम
ब्रवीत्॥२०॥अस्थीनिकेषामेतानिकिमर्थंपतितानिवै॥तमूचुर्मुन
योरामऋषीणांमस्तकानिहि॥२१॥श्रुत्वावाक्यंमुनीनांसभयदैन्य
समन्वितं॥प्रतिज्ञामकरोद्रामोवधायशेषरक्षसां॥२२॥पूज्यमानः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सदा तत्र मुनिभिर्वनवासिभिः ॥ जानक्या सहितो रामो लक्ष्मणेन समन्वि ॥५१॥
तः ॥ उवास कतिचित्तत्र वर्षाणि रघुनंदनः ॥ २३ ॥ एवं क्रमेण संपश्यन्नृ
षीणामाश्रमान्विभुः ॥ २४ ॥ सुतीक्ष्णस्याश्रमं प्रागात्प्रख्यातं मु
निसंकुलं ॥ सर्वर्तुगुणसंपन्नं सर्वकालसुखावहं ॥ २५ ॥ राममागत
माकर्ण्य सुतीक्ष्णः स्वयमागतः ॥ अगस्तिशिष्यो रामस्य मंत्रोपासनतत्प
रः ॥ २६ ॥ विधिवत्पूजयामास भक्त्युत्फुल्ललोचनः ॥ सुतीक्ष्ण उवाच ॥
त्वन्मंत्रजाप्यहमनंतगुणाप्रमेय सीतापते शिवविरंचिसमाश्रितांघ्रे ॥
संसारसिंधुतरणामलपादपोत रामाभिराम सततं तव दासदासः ॥ २७ ॥
मामद्य सर्वजगतामविगोचरस्त्वं त्वन्मायया सुतकलत्रगृहांधकू
पे मग्नं निरीक्ष्य मलपंकमोहपाशानुबंधहृदये स्वयमागतोसि ॥ २९ ॥
त्वं सर्वभूतहृदयेषु कृतालयोपि त्वन्मंत्रजाप्यविमुखेषु तनोषि मा
यां ॥ त्वन्मंत्रसाधनपरेषु न याति माया सेवानुरूपफलदोसि यथा
स्फटिकः ॥ ३० ॥ विश्वस्य सृष्टिलयसंस्थितिहेतुरेक त्वन्माय
॥५१॥ यात्रिगुणया विधिरीशविष्णु ॥ भासीस माहितधिया विविधाकृति

स्वयं यद्वद्रविः सलिलपात्रगतो ह्यनेकः ॥ २१ ॥ प्रत्यक्षतोद्य भवतश्च
रणारविंदं पश्यामि राम तमसः परतः स्थितस्य ॥ दृग्रूपतस्त्वमसता
मविगोचरोपि त्वन्मंत्रपूतहृदयेषु सदा प्रसन्नः ॥ २२ ॥ पश्यामि राम त
व रूपमरूपिणोपि मायाविडंबनकृतं सुमनुष्यवेषं ॥ कंदर्पकोटिसुभ
गं कमनीयचापबाणं दयार्द्रहृदयं स्मितचारुवक्त्रं ॥ २३ ॥ सीतास
मेतमजिनांबरमप्रधृष्यं सौमित्रिणा नियतसेवितपादपद्मं ॥ नी
लोत्पलद्युतिमनंतगुणं प्रशांतं मद्भागधेयमनिशं प्रणमामि रामं ॥ २४ ॥
जानंतु राम तव रूपमशेषदेशकालाद्युपाधिरहितं घनचित्प्रकाशं ॥
प्रत्यक्षतोद्य मम गोचरमेतदेव रूपं विभातु हृदये न परं विकांक्षे ॥ २५ ॥
इत्येवं स्तुवतस्तस्य रामः सस्मितमब्रवीत् ॥ मुने जानामि ते चित्तं नि
र्मलं मदुपासनात् ॥ २६ ॥ अतोहमागतो द्रष्टुं मदृते नान्यसाधनं ॥
मन्मंत्रोपासका लोके मामेव शरणं गताः ॥ २७ ॥ निरपेक्षा नान्यगता
स्तेषां दृश्योहमन्वहं ॥ स्तोत्रमेतत्पठेद्यस्तु त्वत्कृतं मे प्रियं सदा ॥ २८ ॥
सद्भक्तिर्मे भवेत्तस्य ज्ञानं च विमलं भवेत् ॥ त्वं ममोपासनादेवं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विमुक्तो सिह सर्वतः ॥ ३९ ॥ देहांते मम सायुज्यं लभते नात्र संशयः ॥ गुरुं ते द्रष्टु ॥५२॥
मिच्छामि ह्यगस्त्यं मुनिनायकं ॥ ४० ॥ किंचित्कालं तत्र वस्तुं मनो मे त्वरयात्य
लं ॥ सुतीक्ष्णोपि तथेत्याह श्वो गमिष्यामि राघव ॥ ४१ ॥ अहमप्यागमिष्या
मि चिराद्दृष्टो माहामुनिः ॥ अत्र प्रभाते मुनिना समेतो रामः ससीतो सह
लक्ष्मणेन ॥ अगस्त्यसंभाषणलोलमानसः शनैरगस्त्यानुजमंदि
रं ययौ ॥ ४२ ॥ इति श्रीमदध्यात्म० उमामहे० आरंण्यकांडे द्वितीयसर्गः ॥ २ ॥
अथ रामः सुतीक्ष्णेन जानक्या लक्ष्मणेन च ॥ अगस्त्यस्यानुजस्थानं म
ध्यान्हे समपद्यत ॥ १ ॥ तेन संपूजितः सम्यक् भुक्त्वा मूलफलादिकं ॥ परे
द्युः प्रातरुत्थाय जगामागस्त्यमंडलं ॥ २ ॥ सर्वर्तुफलपुष्पाढ्यं नानामृ
गगणैर्युतं ॥ पक्षिसंघैश्च विविधैर्नादितं नंदनोपमं ॥ ३ ॥ ब्रह्मर्षिभि
र्देवर्षिभिः सेवितं मुनिमंदिरं ॥ सर्वतोलंकृतः साक्षाद्ब्रह्मलोक इवापरः ॥ ४ ॥
बहिरेवाश्रमस्याथ स्थित्वा रामोब्रवीन्मुनिं ॥ सुतीक्ष्ण गच्छ शीघ्रं त्वमा
गतं मां निवेदय ॥ ५ ॥ अगस्त्यमुनिवर्याय सीतया लक्ष्मणेन च ॥ महा
गुरोः प्रदेसारत्थेत्युक्त्वा सुतीक्ष्णः प्रययौ किंस्तं ॥ ६ ॥ आश्रमं त्वरया तत्र ऋ
षिसंघसमावृत्तं ॥ उपविष्टं रामचंद्रं भक्त्ये विशेषेण समायुतं ॥ ७ ॥

॥५२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यास्थानं राममेत्रारख्यं त्रिषेभ्यश्चाति भक्तितः ॥ दृष्ट्वागस्त्यं मुनिश्रेष्ठं सुतीक्ष्णस्त्वरय
यौ मुनिं ॥ ९ ॥ दंडवत्प्रणिपत्याह विनयावनतः सुधीः ॥ रामो दाशरथिर्ब्रह्मन् सीत
या लक्ष्मणेन च ॥ १ ॥ आगतो दर्शनार्थं ते बहिस्तिष्ठति सांजलिः ॥ अगस्त्य उवाच ॥
क्षिप्रमानय भद्रं ते रामं मम हृदिस्थितं ॥ तमेव ध्यायमानोहं कांक्षमाणोत्र संस्थितः ॥
इत्युक्त्वा स्वयमुत्थाय मुनिभिः सहितो द्रुतं ॥ अभ्ययात्सहैरियामन्त्यागतो राममथा स्य
ब्रवीत् ॥ १२ ॥ आगच्छ राम भद्रं ते दिष्ट्याद्य समागमः ॥ प्रियोतिथिर्मे संप्राप्तोह्यद्य मे स
फलं दिनं ॥ १३ ॥ रामोपि मुनिमायांतं दृष्ट्वा हर्षसमाकुलः ॥ सीतया लक्ष्मणेनापि दंड
वत्पतितो भुवि ॥ १४ ॥ उत्थाप्य मुनिराट् द्रुतं राममालिंग्य भक्तितः ॥ तद्गात्रस्पर्शना
ह्लादोस्रवन्नेत्रकुलोज्वलः ॥ १५ ॥ गृहीत्वा करमेकेन करेण रघुनंदनः ॥ जगाम स्वाश्र
मं हृष्टो मनसा मुनिपुंगवः ॥ १६ ॥ सुखोपविष्टं संपूज्य पूजया बहुविस्तरं ॥ भोजयित्वाय
थान्यायं भोज्यैर्वन्यैरनेकधा ॥ १७ ॥ सुखोपविष्टमेकांते रामं शशिनिभाननं ॥ कृतांज
लिरुवाचेदं अगस्त्यो भगवानृषिः ॥ १८ ॥ त्वदागमनमेवाहं प्रतीक्षन्समवस्थितः ॥ यदा
क्षीरसमुद्रांते ब्रह्मणा प्रार्थितः पुरा ॥ १९ ॥ भूमेर्भारावतुत्यर्थं रावणस्य वधाय च ॥ त
दादि दर्शनाकांक्षी तव राम तपश्चरन् ॥ २० ॥ वसामि मुनिभिः सार्द्धं त्वामेव परिचिंत
यन् ॥ सृष्टेः प्रागेव एकोसि निर्विकल्पोनुपाधिकः ॥ २१ ॥ त्वदाश्रया वर्तते या माया
तेन शक्तिरुच्यते ॥ त्वामेव निर्गुणं शक्तिरावृणोति यदा तदा ॥ २२ ॥ अव्याकृत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मिश्रा दुर्दैर्दांतपरिवेष्टितं॥ मूलप्रकृतिरित्येके प्राहुर्मायेति केचन॥२३॥ अवि
द्यासंसृतिर्बंध इत्यादि बहुधोच्यते॥ तथा संक्षोभ्यमाना सा महत्तत्वं प्रसुभवेतू॥२४॥
सात्त्विका राजसाश्चैव तामसाश्चेति भिद्यते॥ तामसात्सूक्ष्मतन्मात्राण्यासन्नू
भूतान्यतः परं॥२५॥ स्थूलनिष्क्रमशो राम क्रमोत्तरगुणानि हि॥ राजसानींद्रियाण्येवा
वसात्त्विका देवता मनः॥२६॥ तेभ्योभवत्सूत्ररूपं लिंगं सर्वगतं महत्॥ ततो विराट्
समुत्पन्नः स्थूलाद्भूतकदंबकात्॥२७॥ विराजः पुरुषात्सर्वं जगत्स्थावरजंगमं॥
देवतिर्यङ्मनुष्याश्च कालेकर्मक्रमेण तु॥२८॥ त्वं रजोगुणतो ब्रह्मा जगतः सर्वस्य
कारणं॥ सत्त्वाद्विष्णुस्त्वमेवास्य पालकः सद्भिरुच्यते॥२९॥ लये रुद्रस्त्वमेवास्य
त्वन्मायागुणभेदतः॥ जाग्रत्स्वप्नसुषुप्त्याख्या वृत्तयो बुद्धिजा गुणाः॥३०॥ ता
सां विलक्षणो राम त्वं साक्षी चिन्मयोऽव्ययः॥ सृष्टिलीलां यदा कर्तुमीहसे रघुनंद लि॰
न॥×३१॥ प्रवृत्तिमार्गनिरता अविद्यावशवर्तिनः॥ निवृत्तिमार्गनिरता वेदां
तार्थविचारकाः॥३२॥× अंगीकरोषि मायां वै तदाहं गुणवानिव॥ राममाया
द्विधा भाति विद्याविद्येति ते सदा॥३३॥ त्वद्भक्तिनिरता ये च ते वै विद्यां समाश्रि
ताः॥ अविद्यावशगा ये तु नित्यसंसारिणः स्मृताः॥३४॥ विद्याभ्यासरता ये तु
नित्यमुक्तास्त एव हि॥ लोके त्वद्भक्तिनिरतास्त्वन्मंत्रोपासकाश्च ये॥३५॥

॥५७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विद्याप्रादुर्भवेत्तेषां नेतरेषां कदाचन॥ अतः स्त्वद्भक्तिसंपन्ना मुक्ता एव न सं
शयः॥३६॥ त्वद्भक्त्यमृतहीनानां मोक्षः स्वप्नेपि नो भवेत्॥ किं बहुनोक्तेन सारं
किंचिद्ब्रवीमि ते॥३७॥ साधुसंगतिरेवात्र मोक्षहेतुरुदाहृतः॥ साधवः समचि
त्ता ये निस्पृहा विगतैषिणः॥३८॥ दांताः प्रशांतास्त्वद्भक्ता निवृत्ताखिलकाम
नाः॥ इष्टप्राप्तिविपत्योश्च समाः संगविवर्जिताः॥३९॥ संन्यस्ताखिलकर्माणः
सर्वदा ब्रह्मतत्पराः॥ यमादिगुणसंपन्नाः संतुष्टा येन केनचित्॥४०॥ सत्सं
गमो भवेद्यर्हि त्वत्कथाश्रवणे रतिः॥ समुदेति ततो भक्तिस्त्वयी रामे सनात
ने॥४१॥ त्वद्भक्तावुपपन्नायां विज्ञानं विपुलं स्फुटं॥ उदेति मुक्तिमार्गोय
माद्यश्चतुरसेवितः॥४२॥ तस्माद्राघव सद्भक्तिस्त्वयी मे प्रेमलक्षणा॥ सदा
भूयाद्धरेः संगस्त्वद्भक्तेषु विशेषतः॥४३॥ अद्य मे सफलं जन्म भवत्संद
र्शनादभूत्॥ अद्य मे क्रतवः सर्वे बभुवुः सफला प्रभो॥४४॥ दीर्घकालं मया
तप्तमनन्यमतिना तपः॥ तस्येह तपसो राम फलं तव पदार्चनं॥४५॥ सदा मे
सीतया सार्धं हृदये वस राघव॥ गच्छंतस्तिष्ठतो वापि स्मृतिः स्यान्मे सदा त्व
यी॥४६॥ इति स्तुत्वा रमानाथमगस्त्यो मुनिसत्तमः॥ ददौ चापं महेंद्रेण
रामार्थे स्थापितं पुरा॥४७॥ अक्षय्यौ बाणतूणीरौ खड्गं रत्नविभू

षितः॥ जहि राघव भूभार भूत राक्षसमंडलं॥४८॥ यदर्थं भवतीर्णोसि मा
यया मनुजाकृतिः॥४८॥ इतो योजयुग्मे तु पुण्यं काननमंडितः॥ अस्ति पंच
वटीनाम्ना आश्रमो गौतमीतटे॥४९॥ नेतव्यस्तत्र ते कालः शेषो रघुकुलो
द्भव॥५०॥ तत्रैव बहु कार्याणि देवानां पुरु संस्थितो॥५१॥ श्रुत्वा तदागस्त्यसु
भाषितं वचश्रोत्रं च तत्वार्थसमन्वितं विभुः॥ मुनिसमाभ्ये मुदान्वितो ययौ
प्रदर्शितं मार्गमशेषविद्धरिः॥५२॥ इ श्री म० उ मा० आरंण्यकांडे तृतीयोध्यायः॥
मार्गे व्रिजं नृ ददर्शाथ शैलशृंगमवस्थितं॥ दृष्ट्वा जटायुषं रामः किमिदमि
ति विस्मितः॥१॥ धनुरानय सौमित्रे राक्षसोयं पुरस्थितः॥ इत्याह लक्ष्मणो रामं
हनिष्यामर्षि भक्षकं॥२॥ तच्छ्रुत्वा रामवचनं गृध्रराट्भयपीडितः॥ वधा
र्हो नाहं नते राम पितुस्तेहं प्रियः सखा॥३॥ जटायुरामभद्रं ते गृध्रोहं प्रिय
सत्तव॥ पंचवट्यामहं वत्स्ये तवैव प्रियकाम्यया॥४॥ मृगयायां कदाचि
त्तु प्रयाते लक्ष्मणेपि च॥ सीताजनककन्यामेरक्षितव्या प्रयत्नतः॥५॥
श्रुत्वा तद्गृध्रवचनं रामः सस्नेहमब्रवीत्॥ साधु गृध्र महाप्राज्ञे रोतथैव कु
॥५८॥ रु मे प्रियं॥७॥ अत्रैव मे समीपस्थो नातिदूरे च मे वसन्॥ इत्यामंत्र्य तमा
॥५..॥ मंत्र्य तमालिंग्य ययौ पंचवटीं प्रभुः॥७॥ लक्ष्मणेन सह भ्रात्रा सीतया र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घुनंदनः॥ गत्वाते गोतमीतीरं पंचवट्यां सुविस्तरं॥ ८॥ मंदिरं कारयामास ल
क्ष्मणेसेनै बंधुना॥ तत्रैते न्यवसन्सर्वे गंगायाउत्तरे तटे॥ ९॥ कदलीफलसाम्रा
दिफलवृक्षसमाकुले॥ विविक्ते जनसंबाधवर्जिते निरुजस्थले॥ १०॥ वि
नोदयंजनकजां लक्ष्मणेन विपश्चिता॥ अच्युवासमुखं रामो देवलोक
इवापरः॥ ११॥ कंदमूलफलादिनी लक्ष्मणस्त्वदिनं तयोः॥ अनियप्रद
दौ रामसेवातत्परमानसः॥ १२॥ धनुर्बाणधरो नित्यं रात्रौ जागर्ति सर्व
तः॥ स्नानं कुर्वन्त्यनुदिनं त्रयस्ते गोतमीजले॥ १३॥ उभयोर्मध्यगा सीता
कुरुते च गमागमौ॥ आनीय सलिलं नित्यं लक्ष्मणः प्रीतमानसः॥ १४॥
सेवतेहरहः प्रीत्या एवमासन्सुखं त्रयः॥ एकदा लक्ष्मणो रामं मेकांते
समुपस्थितं॥ १५॥ विनयावनतो भूत्वा प्रपच्छ परमेश्वरं॥ भगवन्श्रोतुमि
ग॥ त्रिविं च्छामि मोक्षस्यैकां गतिं॥ १६॥ त्वत्तः कमलपत्राक्ष संक्षेपाद्वक्तुमर्हसि॥
ज्ञानं विज्ञानसहितं भक्तिवैराग्यबृंहितं॥ १७॥ आचक्ष्व मे रघुश्रेष्ठ वक्ता
नान्योस्ति भूतले॥ १८॥ श्रीराम उवाच॥ शृणु वक्ष्यामि ते वत्स गुह्याद्गुह्य
तरं परं॥ यद्विज्ञाय नरो जह्यात्सद्यो वैकल्पिकं भ्रमं॥ १९॥ आदौ माया
स्वरूपं ते वक्ष्यामि तदनंतरं॥ ज्ञानस्य साधनं पश्चाज्ज्ञानं विज्ञानसंयुतं॥ ॥२०॥

107

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञेयं च परमात्मानं यज्ज्ञात्वा मुच्यते भयात्॥ सैव माया तयैवासौ संसारः परिकी ॥५५॥
र्त्यते॥ रूपे द्वे निश्चिते पूर्वं मायायाः कुलनंदन॥२२॥ विक्षेपावरणे तत्र प्रथमं
कल्पयज्जगत्॥ लिंगाद्याब्रह्मपर्यंतं स्थूलसूक्ष्मविभेदकं॥२३॥ अपरं
त्वखिलं ज्ञानंरूपमामावृत्येतिष्ठति॥ मायया कल्पितं विश्वं परमात्मनि
केवले॥२४॥ रज्जौ भुजंगवद्भ्रांत्या विचारे नास्ति किंचन॥ श्रूयते दृश्यते
यद्यत्स्मर्यते वा नरैः सदा॥२५॥ असदेव हि तत्सर्वं यथा स्वप्नमनोरथौ॥
देह एव हि संसारवृक्षमूलं दृढं स्मृतं॥२६॥ तन्मूलं पुत्रदारादिबंधःस्यै
तन्यथात्मनः॥ देहस्तु स्थूलभूतानि पंचतंमात्रपंचकं॥२७॥ अहं
कारश्च बुद्धिश्च ईंद्रियाणि तथौभवेत्॥ चिभासो मनश्चैव मूलप्रकृतिरेव
दत्रा१ —च चैतत्॥२८॥ तस्य जीवस्य विज्ञाने साधनान्यपि मे शृणु॥ जीवस्य परमात्मा
च पर्यायो नात्र भेदधीः॥३०॥× एतत्क्षेत्रमिति ज्ञेयं देह इत्यभिधीयते॥
एतैर्विलक्षणो जीवः परमात्मा निरामयः॥२९॥१॥ मानाभावस्तथा हैदं
हिंसादिपरिवर्जनं॥ पराक्षेपसहनं सर्वं सर्वत्रावक्रता तथा॥३१॥ मनो
वाक्कायदंडश्च विषयेषु निरीहया॥ निरहंकारता जन्मजराद्यालो
चनं तथा॥३२॥ असक्तिः स्नेहशून्यत्वं पुत्रदारधनादिषु॥ इष्टानि
॥५५॥ ष्टागमे नित्यं चित्तस्य सम भावता॥३३॥ मयि सर्वात्मके रामे ह्यनन्य

108

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री

विषया मतिः॥ जनसंबाधरहितशुद्धदेशनिषेवणं॥ ३४॥ प्राकृतैर्ज
नसंघैश्चाप्यरतिः सर्वदा भवेत्॥ आत्मज्ञाने सदा योगो वेदार्थावैचनः॥ लो
उक्तैरेतैर्भवेज्ज्ञानं विपरीतैर्विपर्ययः॥ बुद्धिप्राणमनोदेहाहंकृतिभ्यो
विलक्षणः॥ ३६॥ चिदात्मा नित्यशुद्धो बुद्ध एवेति निश्चयं॥ येन ज्ञानेन सं
वेत्ति तज्ज्ञानं निश्चितं च मे॥ ३७॥ विज्ञानं च तदेवैतत्साक्षादनुभवेद्यथा॥
आत्मा सर्वत्र पूर्णः स्याच्चिदानंदात्मकोव्ययः॥ ३८॥ बुद्ध्याद्युपाधिरहितः
परिणामादिवर्जितः॥ स्वप्रकाशेन देहादीन्भासयन्ननपावृतः॥ ३९॥ ए
क एवाद्वितीयश्च सत्यज्ञानादिलक्षणः॥ असंगः स्वप्रभो द्रष्टा विज्ञानेना
वगम्यते॥ ४०॥ आचार्यशास्त्रोपदेशादैक्यज्ञानं यदा भवेत्॥ आत्मनो जी
वपरयोर्मूलाविद्या सदैव हि॥ ४१॥ लीयते कार्यकरणैः सहैव परमात्मनि॥
सावस्था मुक्तिरित्युक्ता ह्युपचारोयमात्मनि॥ ४२॥ इदं मोक्षस्वरूपं
ते कथितं रघुनंदन॥ ज्ञानविज्ञानवैराग्यसहितं च परात्मनः॥ ४३॥
किंतु तद्दुर्लभं मन्ये मद्भक्तिविमुखात्मनां॥ चक्षुष्मतामपि यथा रा
त्रौ सम्यङ्न दृश्यते॥ ४४॥ पदं दीपसमेतानां दृश्यते सम्यगेव हि॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं मद्भक्तियुक्तानां मासीं सम्यक् प्रकाशते ॥४५॥ मद्भक्ते कारणं किंचिद् ॥५६॥
ध्यामि शृणु तत्वतः ॥ मद्भक्तसंगमः सेवा मद्भक्तानां निरंतरं ॥४६॥
एकादश्युपवासादि मम पर्वानुमोदनं ॥ मत्कथाश्रवणे पाठे व्याख्याने स
र्वदा रतिः ॥४७ मत्पूजापरिनिष्ठा च मम नामानुकीर्तनं ॥ एवं सततयु
क्तानां भक्तिरव्यभिचारिणी ॥४८॥ मयी संजायते नित्यं ततः किमवशि
७६ ष्यते ॥ अतो मद्भक्तियुक्तस्य ज्ञानं विज्ञानमेव च ॥४९॥ वैराग्यं च भवत्यग्रे
ततो भक्तिमवाप्नुयात् ॥ कथितं सर्वमेतत्ते तव प्रश्नानुसारतः ॥५०॥ ओ
क्षिनानः समाधाय यः श्लिष्टेत्स तु मुक्तिभाक् ॥ न वक्तव्यमिदं यत्नात् ७८
मद्भक्तिविमुखाय हि ॥५१॥ मद्भक्ताय प्रदातव्यं मोक्षयापि प्रयत्नतः ॥
यद्दृष्टं तु पठेन्नित्यं श्रद्धाभक्तिसमन्वितः ॥५२॥ अज्ञानपटलं ध्वांतं वि
च्यपरिमुच्यते ॥५२॥ भक्तानां मम योगिनां च सुविमलस्वांताति
श्रांतात्मनां ॥ मत्सेवाभिरतात्मनां च विमलज्ञानात्मनां सर्वदा ॥
॥५८ संयः कुरुते सदोद्यतमतिः स सेवानन्यधीर्मोक्षस्तस्य करे स्थितो
हमनो रांह रयो भवे नान्यथा ॥५३॥ इति० उ० अ० चतुर्थोऽध्यायः ॥४॥

110

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मिन्काले महारण्ये राक्षसी कामरूपिणी। विचचार महारासा जनस्थाननिवासि
नी॥११॥ एकदा गोतमीतीरे पंचवट्याः समीपतः॥ पद्मवज्रांकुशांकानि पदानि जगतीपतेः॥२॥
दृष्ट्वा काममपरितापा पादसौंदर्यमोहिता॥ पश्यंती सा नरानेरा यारामस्य च निवेशनं॥३॥ त
त्र दृष्ट्वा रमानाथं सीतया सह संस्थितं॥ कंदर्पसदृशं रामं दृष्ट्वा कामविमोहिता॥४॥ राक्षसी
राघवं प्राह कस्य त्वं कः किमाश्रमे॥ जटावल्कलधारी च साध्यं किं तत्र मे वद॥५॥ अहं शू
र्पणखा नाम राक्षसी कामरूपिणी॥ भगिनी राक्षसेंद्रस्य रावणस्य महात्मनः॥६॥ खरेण स
ता हि भ्रात्रावसाम्यत्रैव सद्वने॥ राज्ञा दत्तं च मे सर्वं मुनिवर्ज्यावसाम्यहं॥७॥ त्वां तु वेदितुमि
च्छामि वद मे वदतां वर॥ तामाह रामनामाहं अयोध्याधिपतेः सुतः॥८॥ एषा मे सुंदरी भार्या सी
ता जनकनंदिनी॥ स तु भ्राता कनीयान्मे लक्ष्मणो नीव सुंदर॥९॥ किं कृत्यं तेन मया ब्रूहि
कार्यं भुवनसुंदरी॥ इति रामवचः श्रुत्वा कामार्त्ता साब्रवीदिदं॥१०॥ एहि राम मया सार्द्धं
रमस्व गिरिकानने॥ कामार्त्ताहं न शक्नोमि त्यक्तुं त्वां कमलेक्षणं॥११॥ रामः सीतां कटा
क्षेण पश्यन्सस्मितमब्रवीत्॥ भार्या ममैषा कल्याणी विद्यते ह्यनपायिनी॥१२॥ त्वं तु
सापत्न्यदुःखेन कथं स्थास्यसि सुंदरी॥ बहिरास्ते मम भ्राता लक्ष्मणो नीव सुंदरः॥१३॥ त्वा
नुरूपो भवितापतिस्तेनैव संचर॥ इत्युक्ता लक्ष्मणं प्राह पतिर्मे भव सुंदर॥१४॥ भ्रातु
राज्ञां पुरस्कृत्य संगच्छामोऽय मा चिरं॥ इत्याह राक्षसी घोरा लक्ष्मणं काममोहिता॥१५॥

(११)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तामाह लक्ष्मणः साध्वि दासोहं तस्य धीमतः ॥ दासी भविष्यसि त्वं तु ततो दुःखतरं नु किं ॥१६॥
तमेव गच्छ भद्रं ते स तु राजाखिलेश्वरः ॥ तच्छ्रुत्वा पुनरप्यागाद्राघवं दुष्टमानसा ॥१७॥ क्रो
धाद्रामकिर्थं मां त्वमामयस्य न तिष्ठितः ॥ इदानीमेव तां सीतां भक्षयामि तवाग्रतः ॥१८॥ इ
त्युक्त्वा विकटाकारा जानकीमनुधावती ॥ ततो रामाज्ञया खड्गमादाय परिगृह्य तां ॥१९॥
चिच्छेद कर्णौ नासां च लक्ष्मणो रघुविक्रमः ॥ ततो घोरध्वनिं कृत्वा रुधिराक्तवपु
र्द्रुता ॥२०॥ क्रंदमाना पपाताग्रे खरदूष्यपरुषाक्षरा ॥ किमेतदिति तामाह खरः खर
रतराक्षरा ॥२१॥ केनैवं कारितासि त्वं मृत्योर्वक्त्रानुवर्तिना ॥ वद मे तं वधिष्यामि का
लकल्पमपि क्षयात् ॥२२॥ तमाह सा क्षसी रामः सीतालक्ष्मणसंयुतः ॥ दंडकं नि
र्भयं कुर्वन्नास्ते गोदावरीतटे ॥२३॥ मामेवं कृतवान्नूनं तस्य भ्राताततेन वै चोदितः ॥
यदि त्वं कुलजातोसि वीरोसि जहि तौ रिपू ॥२४॥ तयोस्त्वं रुधिरं पास्ये यद्यतौ सु
दुर्मदौ ॥ नोचेत्प्राणाननु परित्यज्य यास्यामि यमसादनं ॥२५॥ तच्छ्रुत्वा त्वरितं प्रागा
त्खरः क्रोधेन मूर्छितः ॥ चतुर्दश सहस्राणि रक्षसां भीमकर्मणां ॥२६॥ चोद
यामास रामस्य समीपं वधकांक्षया ॥ खरश्च त्रिशिराश्चैव दूषणश्चैव राक्षसः ॥
॥२७॥ सर्वे रामं ययुः शीघ्रं नानाप्रहरणोद्यताः ॥ श्रुत्वा कोलाहलं तेषां रामः सौ
मित्रिमब्रवीत् ॥२८॥ श्रूयते विपुलः शब्दो नूनमायांति राक्षसाः ॥ भविष्यति म
॥५७॥ हद्युद्धं नूनमद्य मयासह ॥२९॥ सीतां त्वं च गुहां गत्वा तत्र तिष्ठ महाबलान्

112

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हंतुमिच्छाम्यहं सर्वान्राक्षसान्घोररूपिणः ॥३०॥ अत्र किंचिन्न वक्तव्यं त्वयापि तो
षि ममोपरि ॥ तथेति सीतामादाय लक्ष्मणो गह्वरं ययौ ॥३१॥ रामः परिकरं बध्वा ध
नुरादाय निष्ठुरं ॥ तूणीरावक्षयशरौ बध्वा यत्तोभवत्प्रभुः ॥३२॥ ततस्त्वागत्य रक्षां
सि रामस्योपरि चिक्षिपुः ॥ आयुधानि विचित्राणि पाषाणान्पादपानपि ॥३३॥ न्यु
तानि चिच्छेद रामोपि लीलया तिलशः क्षणात् ॥ ततो बाणसहस्रेण हत्वा तान्
सर्वराक्षसान् ॥३४॥ खरं त्रिशिरसं चैव दूषणं चैव राक्षसं ॥ जघान प्रहरार्द्धे
न सर्वानेव रघूत्तमः ॥३५॥ लक्ष्मणोथ गुहामध्यात्सीतामादाय राघवे ॥ सम
र्प्य राक्षसान् दृष्ट्वा हतान्विस्मयमाययौ ॥३६॥ सीता रामं समालिंग्य प्रसन्नमु
खपंकजा ॥ शस्त्रव्रणानि अंगेषु ममार्ज जनकात्मजा ॥३७॥ सापि दुद्राव दृ
ष्ट्वासौ तान्हतान्राक्षसपुंगवान् ॥ लंकां गत्वा सभामध्ये क्रोशंती पादसन्नि
धौ ॥३८॥ रावणस्य पपातोर्व्यां भगिनी तस्य रक्षसः ॥ दृष्ट्वा लंकारावणः प्राह भगि
नीं भयविह्वलां ॥ उत्तिष्ठोत्तिष्ठ वत्सेदं विरूपकरणं तव ॥ कृतं शक्रेण वा भद्रे यमेन
वरुणेन वा ॥४०॥ कुबेरेणाथवा ब्रूहि भस्मीकुर्यां क्षणेन तं ॥ राक्षसी तमुवाचेदं त्वं
प्रमत्तश्च मूढधीः ॥४१॥ पानासक्तः स्त्रीविजितः स्त्रैणः सर्वत्र लक्ष्यसे ॥ चारचक्षुर्वि
विही १५ हीनस्त्वं कथं राजा भविष्यसि ॥४२॥ खरश्च निहितः संख्ये दूषणस्त्रिशिरास्तथा ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नि

चतुर्दशसहस्त्रौ राक्षसानां महात्मनां ॥४३॥ निहतानि क्षणेनैव रामेणासुरशत्रुणा ॥ जनस्था
नमशेषेण मुनीनां निर्भयं कृतं ॥४४॥ न जानासि विमूढस्त्वं मत्त एवमयोग्यवत् ॥ रावण उ
कोवा रामः किमर्थं वा कथं येनासुरा हताः ॥४५॥ सम्यक् कथय मे तेषां मूलघातं करोम्य
हं ॥४५॥ शूर्पणखोवाच ॥ जनस्थानादहं याता कदाचिद्गौतमीतटे ॥ तत्र पंचव
टी नाम पुरा मुनिजनाश्रया ॥४६॥ तत्राश्रमे मया दृष्टो रामो राजीवलोचनः ॥ ध
नुर्बाणधरः श्रीमान् जटावल्कलमंडितः ॥४७॥ कनीयाननुजस्तस्य लक्ष्मणो
पि तथाविधः ॥ तस्य भार्या विशालाक्षी रूपिणी श्रीरिवापरा ॥४८॥ देवगंधर्वना
गानां मनुष्याणां तथाविधा न दृष्टा न श्रुता राजन् द्योतयंतीव नं शुभा ॥४९॥ अने
तु महभिल्पका भार्या येन तवानघ ॥ लक्ष्मणो नाम तद्भ्राता चिच्छेद मम नासि
कां ॥५०॥ कर्णौ च रोदितस्तेन रामेण स महाबलः ॥ ततोहमति दुःखेन रुदंती खर
मन्वगां ॥५१॥ सोपि रामं समासाद्य योद्धुं राक्षसयूथपः ॥ अतः क्षणेन रामेण तेनै
व बलशालिना ॥५२॥ भस्मी कुर्यान्न संदेह इति भाति मम प्रभो ॥ सीता राजीवप
त्राक्षी सर्वलोकैकसुंदरी ॥५४ × सर्वे तेन विनष्टा वै राक्षसा भीमकर्मणा ॥ यदि रा विक्रमाः
मो मनः कुर्यात्त्रैलोक्यं निमिषार्धतः ॥५६॥ साक्षाद्रामस्य पुरतः स्थातुं त्वं न क्षमः
प्रभो ॥ मायया मोहयित्वा तु प्राप्स्यसे तां रघूत्तमं ॥५७॥ श्रुत्वा तत्सूक्तवाक्यं स्वदा
॥५८॥ नमानादिभिस्तथा ॥ आश्वास्य भगिनीं राजा प्रविवेश गृहं स्वकं ॥५८॥ तत्र चिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तापरो भूत्सानिद्रां रात्रौ न लब्धवान्॥ एकेन रामेण कथं मनुष्यगात्रेण नष्टः
सबलः खरो मे॥ ५७॥ भ्राता कथं मे बलदर्पवीर्ययुक्तो विनष्टो बत राघवेण॥ म
न्ये न रामो मनुजः परेशो मां हंतुकामः सबलं बलौघैः॥ ५८॥ संप्रार्थितो यद्द्रुहि
णेन पूर्वं मनुष्यरूपोद्य रघोः कुलेभूत्॥ वध्यो यदि स्यां परमात्मनाहं वै
कुंठराज्यं परिपालयेयं॥ ५९॥ नोचेदिदं राक्षसराज्यमेव भोक्ष्ये चिरं राममम
तो व्रजामि॥ इत्थं विचिंत्याखिलराक्षसेंद्रो रामं विदित्वा परमेश्वरं हरिं॥ ६०॥
विद्वेषबुध्यैव हरिं प्रयामि भक्त्यानुभक्त्या न गचान् प्रसीदेत्॥ ६१॥ इति श्री
मदध्यात्मरामायणे उमामहेश्वरसंवादे आरण्यकांडे पंचमोध्यायः॥ ५॥
विचिंत्यैवं निशायां स प्रभाते रथमास्थितः रावणो मनसा कार्यमेकं निश्चित्य
बुद्धिमान्॥ १॥ ययौ मारीचसदनं परं तीरं समुद्रतः॥ मारीचस्तत्र मुनिवज्जटा
वल्कलधारकः॥ २॥ ध्यायन्हृदि परमात्मानं निर्गुणं गुणभासकं॥ समाधिवि
रमेपश्यन् रावणं गृहमागतं॥ ३॥ दृष्ट्वोत्थाय चालिंग्य पूजयित्वा यथाविधिः॥
कृतातिथ्यं सुखासीनं मारीचो वाक्यमब्रवीत्॥ ४॥ समागमनमेतत्ते र
थेनैकेन रावण॥ चिंतापर इवाभासि हृदि कार्यं विचिंतयन्॥ ५॥ ब्रूहि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेनहिगोप्यंचेत्करवाणितवप्रियं॥ न्याय्यंचेद्ब्रूहीराजेंद्र त्वजिनंमांस्पृष्टोन्नहि॥६॥ ॥५९
रावणउवाच॥ अस्तिराजादशरथः अयोध्याधिपतिःकिल॥ रामनामासुतस्त
स्यज्येष्ठःसत्यपराक्रमः॥७॥ विवासयामाससुतंवनंवनजनप्रियः॥ भार्यया
सहितंभ्रात्रालक्ष्मणेनसन्वितः॥८॥ सआस्तेविपिनेघोरेपंचवट्याश्रमेसु
खं॥ तस्यभार्याविनाशाक्षीसीतालोकविमोहिनी॥९॥ रामोनिरपराधान्मे
राक्षसानुग्रीमविक्रमान्॥ खरंचहत्वाविपिनेसुखमास्तेविनिर्भयः॥१०॥
भगिन्यामेशूर्पणख्यानिर्दोषायाश्चनासिकां॥ कर्णौचिच्छेददुष्टात्मावने
तिष्ठतिनिर्भयः॥११॥ अनस्त्वयासहायेनगत्वानप्राणवल्लभा॥ आनेय
स्मिन्विपिनेरहितेरावणेनतां॥१२॥ त्वंतुमायामृगोभूत्वाह्याश्रमाभ्य
पनेष्यसि॥ रामंचलक्ष्मणंचैवतदासीतांहराम्यहं॥१३॥ तेनतुतवसा
हाय्यंमेकृत्वास्थास्यामिपूर्ववत्॥ इत्येवंभाषमाणंतंरावणंवीक्ष्यविस्मि
तः॥१४॥ केनेदमुपदिष्टंतेमूलघातकरंवचः॥ सएवशत्रुर्वध्यश्चयःस्व
नाशंप्रतीक्षते॥१५॥ रामस्यपौरुषंस्मृत्वासर्वमप्यपिरावण॥ बालोऽपि
॥५९॥ मांकौशिकस्ययज्ञसंरक्षणायसः॥१६॥ आगतस्त्रिषुपौकेनपातयामा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ससागरो॥ योजनानां शते नेता मस्तदद्रिमयश्चिकूलः॥१७॥ स सा स्मरतातेदेवाहं
रामं मत्स्यामि सर्वतः॥ दंडके पुनरप्यहं वने पूर्ववैरमनुचिंतयन्नृपं॥ तीक्ष्ण
शृंगतनुपएकदा मादृशैर्बहुभिरावृतो मृगां॥१८॥ राघवं जनकजासमन्वितं
लक्ष्मणेन सहितं त्वरान्वितः॥ आगतोहमथहं तु मुद्यतो मां विलोक्य शर
मेकमक्षिपत्तु॥१९॥ तेन विद्धहृदयोहमुद्भ्रमन्नू राक्षसेंद्र पतितोस्मि सागरे॥२०
तत्प्रभृत्यहमिदं समीक्षितः स्थानमूर्जितनिजाद्भुयादितः॥ राममेव सत
तं विभावये भीतभीत इव भोगराशितः॥२१॥ राजरत्नरमणीरथादिकं त्र थ्या०
श्रोत्रयो यदि गतं त्रयं त्रवेतु॥ राम आगत इहेति शंकया बाह्यकार्यमपि रां८
सर्वमत्यजं॥२२॥ निद्रयापरिवृतो यदि स्वपे राममेव मनसानुचिंतयन्॥
स्वप्नदृष्टसुगिरागतः सदा बोधितो विगतनिद्र आस्थितः॥२३॥ तद्भवा
नपि विमुच्य चाग्रहं राघवं प्रति गृहं प्रयाहि भो॥ रक्षसांवरकुलं चिरा
गतं तस्य तो सकलमेव नश्यति॥२४॥ तव हितं वदतो मम भाषितं परि
गृहाण परमात्मनि राघवे॥ त्यज विरोधमतिं भज भक्तितः परमकारुणि
को रघुनंदनः॥२५॥ आह मत्रोषमिदं मुनिवाक्यतो शृणु वमादियुग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परमेश्वरः॥ ब्रह्मणार्थित उवाच तं हरिः किं न वेस्मित मकरवाणि ननु॥२६॥ ब्रं
लणोक्तमरविंदलोचन त्वं प्रयाहि भुवि मानुषं वपुः॥ दशरथात्मजभावमं
जसा जहि रिपुं दशकंधरं हरे॥२७॥ अतो न मानुषो रामः साक्षान्नारायणोऽव्य
यः॥ मायामानुषवेषेण वनं यातोऽपि निर्भयः॥२८॥ मत्पारहरणार्थाय गच्छ
तात गेहं सुखं॥ श्रुत्वा मारीचवचनं रावणः प्रत्यभाषत॥२९॥ परमात्मा
यदा रामः प्रार्थितो ब्रह्मणा किल मां हंतुं मानुषो भूत्वा यत्नाद्यदि समागतः॥३०॥
करिष्यति चिरादेव सत्यसंकल्प ईश्वरः॥ अतोऽहं यत्नतः सीतां हरिष्यामि
च राघवः॥३१॥ वधं प्राप्स्ये रणे वीर प्राप्स्यामि परमं पदं॥ यद्वा रामं वने हत्वा
सीतां प्राप्स्यामि निर्भयः॥३२॥ अतस्त्वं त्वा महाभाग विचित्रमृगरूप
धृक्॥ रामं सलक्ष्मणं शीघ्रमाश्रमादतिदूरतः॥३३॥ आकृष्य राघवं
शीघ्रं सुखं तिष्ठ यथापुरा॥ अतः परं वयं किंचिद्भाषसे मद्विभीषणं॥३४
हनिष्याम्यसिनानेन त्वामत्रैव न संशयः॥ मारीचः स्वगतं चक्रे यास्यत्वात्म
न्येवानुचिंतयन्॥३५॥ यदि मां राघवो हन्यात्तदा नदा मुक्तो भवार्णवात्॥
॥६०॥ मां हन्याद्यदि चेद्दुष्टस्तदा मे निरयो ध्रुवं॥३६॥ इति निश्चित्य मरणं रामा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुद्रायवेगतः ॥ ॥ अब्रवीद्रावणं राजन्नू करोम्याज्ञां करोमि तत् ॥ ३७ ॥ इत्युक्त्वा
रथमास्थाय गतो रामाश्रमं प्रति ॥ सुद्धजांबुनदप्ररव्यो मृगो भूत्वाप्यबिंदुकैश्चि
रतस्भ्रगो मणिखुरो नीलरत्नविलोचनः ॥ विद्युत्प्रभो विमुग्धास्यो विचचा
र वनांतरे ॥ ३९ ॥ रामाश्रमपदस्यांते सीतादृष्टिपथे चरः ॥ ४० ॥ क्षणं च ला
वसध्यितिष्ठते क्षणं समीमीपमागत्य विनिर्भयाकृतिः ॥ एवं हि मायामृग
वेत्राकृपचकुच्चचार सीतां परिमोहयन्नु खलः ॥ ४१ ॥ इति श्री० अ० रा० आ० षष्ठो० ॥ ६ ॥
अथ रामोपि तत्सर्वं ज्ञात्वा रावणचेष्टितं ॥ उवाच सीतां मेकांते शृणु जानकी महद्वचः ॥ १ ॥
रावणो भिक्षुरूपेण ह्यागमिष्यति तेंतिकं ॥ त्वं तु छायां तदाकारां स्थापइत्वोटजे वि
नृ ॥ २ ॥ अग्नौ चादृश्यरूपेण वर्षं तिष्ठ ममाज्ञया ॥ रावणस्य वधांते मां पूर्ववत्क्षा
प्स्यसे शुभे ॥ ३ ॥ श्रुत्वा रामेरितं वाक्यं सापि तत्र तथाकरोत् ॥ मायासीतां बहि
स्थाप्य स्वयमंतर्दधे नले ॥ ४ ॥ मायासीता तदापश्यन्नू मृगं मायानैथ्याकैरानू
हसंती राममभ्येत्य प्रोवाच विनयान्विता ॥ ५ ॥ पश्य राम मृगं चित्रं कनकं रत्नभू
षितं ॥ विचित्रबिंदुभिर्युक्तं चरंतमकुतोभयं ॥ ६ ॥ बध्वा देही मम क्रीडामृ
गो भवतु सुंदरः ॥ तथेति धनुरादाय गच्छं लक्ष्मणमब्रवत् ॥ ७ ॥ रक्ष त्वमग्नि

(११५)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्नेन सीतां मत्प्राणवल्लभां ॥ मायिनः संति विपिने राक्षसा घोररूपिणः ॥ ८ ॥ ॥६१॥
अतोत्र बहुधा साध्वी रक्ष सीतामनिंदितां ॥ लक्ष्मणो राममाहेदं देवायं मृगरूप
धृक् ॥ ९ ॥ मारीचोत्र न संदेहो एवं भूतो मृगः कुतः ॥ १० ॥ श्रीराम उवाच ॥ यदि मा
रीच एवायं तर्हि हन्मी न संशयः ॥ मृगश्चेदानयिष्यामि सीताविश्रामहेतवे ॥ ११ ॥ ग
मिष्यामि मृगं बध्वा ह्यानयिष्यामि सत्वरः ॥ त्वं प्रयत्नेन संतिष्ठ सीतां संरक्षणो
द्यतः ॥ १२ ॥ इत्युक्त्वा प्रययौ रामो मायामृगमनुद्रुतः ॥ मायाया यदाश्रयाल्लोकमो
हिनी जगदाकृतिः ॥ १३ ॥ निर्विकारश्चिदात्मापि पूर्णोपि मृगमन्वगात् ॥ भ
क्तानुकंपी भगवानिति सत्यं वचो हरिः ॥ १४ ॥ कर्तुं सीताप्रियार्थाय जानन्
न्नपि मृगं ययौ ॥ अन्यथा पूर्णकामस्य रामस्य विदितात्मनः ॥ १५ ॥ मृगेण
वा स्त्रिया वापि किं कार्यं परमात्मनः ॥ कदाचिद्दृश्यतेभ्यासात्क्षणं धावति
लीयते ॥ १६ ॥ दृश्यतेपि च तते दूरादेवं राममपाहरत् ॥ ततो रामोपि विज्ञाय
राक्षसोयमिति स्फुटं ॥ १७ ॥ विव्याध शरमादाय राक्षसं मृगरूपिणं ॥ पपा
त रुधिरात्तास्यो मारीचः पूर्वरूपधृक् ॥ १८ ॥ हा हतोस्मि महाबाहो त्रा
हि लक्ष्मण मा हतं ॥ इत्युक्त्वा रमयद्वाचं पपात रुधिराशनः ॥ १९ ॥ यन्नामा
॥६१॥ क्तोपि मरणे मुक्तात्मा साम्यमाप्नुयात् ॥ यातु ॥ किमु ताग्रे हरिं पश्यन् तेनैव निहृ

श्री रा० ॥ १०२

120

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नदेहादुत्थितं तेजः सर्वलोकस्य पश्यतः ॥ राममेवाविशद्देवा विस्मयं परमं ययुः ॥ २१॥
किं कृत्वा किं च वा प्राप्तः ॥ यातनं किं मुनिर्हिंसकः ॥ अथवा राघवस्यायं महिमा नात्र
संशयः ॥ २२ ॥ रामबाणेन संविद्धः पूर्वे राममनुस्मरन् ॥ भयं सर्वं परित्यज्य गर्दं
वित्तादिकं भयत् ॥ २३ ॥ हृदि रामं सदा ध्यात्वा निर्धूताशेषकल्मषः ॥ अतो रामे
णनिहतः पश्य राममवाप्सः ॥ २४ ॥ द्विजो वा राक्षसो वापि पापी वा धर्मिकोऽपि
वा ॥ सजन्तू लेवरं राम स्मृत्वा याति परं पदं ॥ २५ ॥ इति तेन्योन्यमाभाष्य नता
देवा दिवं ययुः ॥ रामस्त्वचिंतयामास म्रियमाणो मुराधमः ॥ २६ ॥ हा लक्ष्मणे
ति मद्वाक्यमनुकुर्वन्यपालितं किं ॥ मृत्वा मद्वाक्यसदृशं वाक्यं सीतापि किं
भवेत् ॥ २७ ॥ इति चिंतापरीतात्मा रामो दूरात्त्वरन्न ॥ सीता तदाषितं म[illegible] मारी
चस्य दूरात्स्वनः ॥ २८ ॥ भीता ति दुःखसंविग्ना लक्ष्मणं चेदमब्रवीत् ॥ गच्छ लक्ष्मण
वेगेन भ्राता ते सुरपीडितः ॥ २९ ॥ हा लक्ष्मणेति वचनं भ्रातुस्ते नश्रुणोषि किं ॥
ता मा हा लक्ष्मणो देसा म्रीयमाणोऽब्रवीदिदं ॥ ३० ॥ रामस्त्रैलोक्यमपि यः क्रुद्धो
नाशयति क्षणात् ॥ स कथं दीनवचनं भाषिते मरपूजितः ॥ ३१ ॥ रुदंतं लक्ष्मणामा
लोक्य सीता बाष्पविलोचना ॥ प्राह लक्ष्मणं दुर्बुद्धे भ्रातृव्यसनकांक्षया ॥ ३२

(121)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋषितोऽपरतो नैव रामनाम्नाग्निकांक्षिणा ॥ मां नेतुमागतोऽसि त्वं रामनाम्ना न उपस्थिते ॥३३॥
न प्राप्स्यसे ल मामद्य पुत्रय प्राणांस्त्यजाम्यहं ॥ न जानासि त्वं रे दुष्ट रामस्त्वां भार्याहरणो त्तेघे ॥३४
रामादन्यं न स्पृशामि ह्यां वापरतमेव वा ॥ इत्युक्त्वा बध्यमाना सा स्वबाहुभ्यां रुरोद
ह ॥३५॥ त[illegible] वाल्लक्ष्मणः कर्णौ पिधायातीव दुःखितः ॥ मा मेवं भाष से त्वं
दुष्ट ॥ धिक् त्वां नाशमुपैष्यसि ॥३६॥ इत्युक्त्वा वनदेवीभ्यः समर्प्य जनकात्मजां ॥
ययौ दुःखाति संविग्नो राममेव शनैः शनैः ॥३७॥ तदान्तरं समालोक्य रावणो
भिक्षुरूपधृक् ॥ सीतासमीपमगमत् स्फुरद्दंडकमंडलुः ॥३८॥ सीता तमेव
संलोक्य मुने त्वां संपूज्य भक्तितः ॥ कंदमूलफलादीनि दत्वा स्वागतमब्री
त् ॥३९॥ मुने भुंक्ष्व फलादीनि विश्रमस्व यथासुखं ॥ इदानीमेव मे भर्त्ता
आगमिष्यति ते प्रियं ॥४०॥ करिष्यति विशेषेण तिष्ठ त्वं यदि रोचते ॥४०॥
भिक्षुरुवाच ॥ का त्वं कमलपत्राक्षी शोकोपार्त्ता तवानघे ॥ किमर्थं मत्र
सो वने राक्षसैस्सेविते ॥४१॥ ब्रूहि भद्रे ततः सर्वं मद्वृत्तांतं निवेदय ॥ सी
तोवाच ॥ आयोध्याधीपतिः श्रीमान् राजा दशरथो महान् ॥ तस्य
॥६२॥ ज्येष्ठसुतो रामः सुलक्षणविलक्षितः ॥४२॥ तस्याहं धर्मतः पत्नी सी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताजनकनी॥ तस्य भ्राता कनीयांश्च लक्ष्मणो भ्रातृवत्सलः॥४३॥ पीतुराज्ञां
पुरस्कृत्य दंडके वनमागतः॥ चतुर्दशसमास्त्वं तु ज्ञातुमिच्छामि हे वद॥४४॥ भि
क्षुः पौलस्त्यतनयो रावणो राक्षसाधिपः॥ त्वत्कामपरितप्तोहं त्वां नेतुं पुरमा
गतः॥४५॥ मुनिवेषेण रामेण किं करिष्यसि मां भज॥ भुंक्ष्व भोगान्मया सार्द्धं त्यज दुःखं वने
दुःखं॥४६॥ श्रुत्वा तद्वचनं सीता भीता किंचिदुवाच तं॥ यद्येवं भाषसे मां त्वं नाशमिष्यसि राघ
वात्॥४७॥ आगमिष्यति रामोपि क्षणं तिष्ठ सहानुजः॥ मां को धर्षयितुं शक्तो हरेर्भार्यां
शशो यथा॥४८॥ रामबाणैर्विभिन्नस्त्वं पतिष्यसि महीतले॥ इति सीतावचः श्रुत्वा रा
वणः क्रोधमूर्छितः॥४९॥ स्वरूपं दर्शयामास महापर्वतसंनिभं॥ दशास्यं विंशति
भुजं कालमेघसमद्युतिं॥५०॥ तं दृष्ट्वा वनदेव्यश्च भूतानि च वितत्रसुः॥ ततो विदार्य
धरणीं नरवेरुध्य स्वबाहुभिः॥५१॥ तोलयित्वा रथे स्थित्वा ययौ क्षिप्रं विहायसा॥ हा राम
हा लक्ष्मणेति रुदंती जनकात्मजा॥५२॥ भयोद्विग्नमना दीना पश्यंती भुवमेव सा॥
श्रुत्वा तत्क्रंदितं दीनं सीतायाः पक्षिसत्तमः॥५३॥ जटायुरुत्थितं सीघ्रं नखवाग्रे स्तीक्ष्ण
तुंडकः॥ तिष्ठ तिष्ठेति संप्राह को गच्छति ममाग्रतः॥५४॥ मुषित्वा लोकनाथस्य भार्यां भु
माद्धुना लयाधुना स्तुन कोमंत्रेपि तं स्त्वं पुरोडाशमिवाध्वरे॥५५॥ इत्युक्त्वा तीक्ष्णतुंडे
न चूर्णयामास तद्रथं॥ वाहानविभेद पादाभ्यां चूर्णयामास तद्धनुः॥५६॥ ततः

123

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सीतां परित्यज्य तु रावणो खड्गमाददे ॥ चिच्छेद पक्षौ सामर्षः पक्षिराजस्य धीमतः ॥ ५७॥
त२ पपौ किंचिच्छेषेण प्राणेन प्लुष्य पक्षिराट् ॥ पुनरन्यद्रथेनाशु सीतामादाय रावणः ॥ ५८॥
क्रान्तां तिरामरामेति त्राता रं नाधिगच्छति ॥ हा राम हा जगन्नाथ मां न पश्यसि दुखितां ॥ ५९॥
रक्षसानीयमानां स्वां भार्यां मा च य राघव ॥ हा लक्ष्मण महाभाग त्राहि मामपराधिनीं ॥ ६०॥
वाक्शरेण हतस्त्वं मे क्षंतुमर्हसि देवर ॥ इत्येवं क्रोशमानां तां रामागमननैभि त्वया ॥ ६१॥ त्वां
जगाम वायुवेगेन सीतामादाय खे हरः ॥ विहायसानीयमाना सीता पश्यदधोमुखी ॥ ६२
पर्वताग्रे स्थितान्पंच वानरान्वारिजाननान् ॥ उत्तरीयार्धखंडेन विमुच्याभरणा
दिकं ॥ ६३॥ बध्वाक्षिपत्परामाय कथयन्निति पर्वते ॥ ततः समुद्रमुल्लंघ्य लंकां गत्वा
स रावणः ॥ ६४॥ स्वांतःपुरः रहस्येतां मध्ये शोकविपिने क्षिपत् ॥ राक्षसीभिः परिभ्र
तामात्वनुपालयत् ॥ ६५॥ एकाग्रा तिदीना परिकर्मवर्जिता दुःखेन शुष्यद्वदना
निवीनृपा ला हा राम रामेति विलप्यमाना सीता स्थिता राक्षसवृंदमध्ये ॥ ६६॥ इति श्री
मदध्यात्म० उमाम० आर० सप्तमोध्यायः ॥ ७॥ छ ॥ छ ॥ रामो मायाविनं हत्वा राक्षसं का
मरूपिणं राघवश्चिंतयामास स्वात्मन्येवमहामतिः ॥ १॥ लक्ष्मणस्तु न जानाति
मायासीतां मया कृतां ॥ ज्ञात्वाप्येनं वंचेदवाज्ञोञ्चामि प्राकृतो यथा ॥ २॥ यद्यहं वि
॥६३॥ रहितो भूत्वा लक्ष्मीं स्थापयामि मंदिरे ॥ तदा राक्षसकोटीनां वधोपायः कथं भवेत् ॥ ३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदाक्रमेणानुचिन्वन्सीतां यास्यसुरालयं॥ रावणां सकुलं हत्वा सीतामग्नौ स्थितां पुनः॥४॥
मय्येव स्थापितां नीत्वा यातायोध्यामनंद्रितः॥५॥ अहं मनुष्यभावेन जातो ब्रह्मणा प्रा
र्थितः॥५॥ मानुष्यभावमापन्नः किंचित्कालं वसामि को॥ ततो मायां मनुष्यस्य च
रितं मेनुवर्त्तनां॥६॥ मुक्तिः स्याद्योत्रसेन मुक्तिमार्गानुवर्त्तिनां॥ निश्चित्ये
वं तदा दृष्ट्वा लक्ष्मणं चेदमब्रवीत्॥७॥ किमर्थमागतोसि त्वं सीतां त्यक्त्वा ममाश्र
यां॥ नीता वा भक्षिता वापि राक्षसैर्जनकात्मजा॥८॥ लक्ष्मणः प्रांजलिः प्राह सी
तायाः दुर्वचो वदन्॥ हा लक्ष्मणेति वचनं राक्षसेनोक्तं श्रुतं मया॥९॥ तद्वाक्यसदृशां
श्रुत्वा मागच्छेति तदाब्रवीत्॥ रुदंती सा मया प्रोक्ता देवी सुष्ठु सुभाषितं॥१०॥ नेदं रा
मस्य वचनं स्वरस्थाभवसुन्नोभ्रने॥ इत्येवं सा हि दं साध्वी मया प्रोवाच मां पुनः॥११॥
यदुक्तं तद्वचो राम दुर्वाच्यं पुरतस्तव॥ कर्णौ पिधाय निर्गत्य यातोहं त्वां समीक्षितुं॥१२॥
रामस्तु लक्ष्मणं प्राह तथाप्यनुचितं कृतं॥ त्वया स्त्रीभाषितं सत्यं कृत्वा त्यक्ता शुभा
नना॥१३॥ नीता वा रक्षिता वासा राक्षसैर्नीत्र संशयः॥ इति चिंतापरो रामः स्वाश्रमं
त्वरितं ययौ॥१४॥ तत्रादृष्ट्वा जनकजां विललापातिदुःखितः॥ हा प्रिये क्व गतासि
त्वं नासि पूर्ववदाश्रमे॥१५॥ अथवा त्वं मद्भीतो दार्थे लीलया क्व विलीयसे॥ इत्यविन्वन्
वनं सर्वं नापश्यज्जानकीं तदा॥१६॥ वनदेव्यः कुतः सीतां ब्रूवंतु मम वल्लभां॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मृगापक्षिणोवृक्षास्तांसयंनुममप्रियां॥१७॥एवंविलपन्नेवरामःसीतांनकुत्रचि
त्॥सर्वज्ञःसर्वदृग्व्यापिनापनृपद्रघुनंदनः॥१८॥आनंदोप्यन्वशोचत्तामचलोप्यनु
नुधावति॥निर्ममोनिरहंकारोप्यखंडानंदरूपवान्॥१९॥ममजायेतिसीतेति
विललापातिदुखितः॥एवंमायामनुचरन्असक्तोपिरघूत्तमः॥२०॥आस
क्तइवमूढानांभातितत्वविदोनहि॥एवंविचिन्वन्सकलंवनंरामःसलक्ष्म
णः॥२१॥भग्नंछत्रंरथंचापकूबरंपतितंभुवि॥दृष्ट्वालक्ष्मणमाहेदंपश्यल
क्ष्मणकेनचित्॥२२॥नीयमानांजनकजांतंजित्वान्योजहारतां॥ततःकिंचिद्दूरे
भागेगत्वापर्वतसन्निभं॥२३॥रुधिराक्तंवपुर्दृष्ट्वारामोवाक्यमथाब्रवीत्॥ए
षवैभक्षयित्वातांजानकींशुभदर्शनां॥२४॥राक्षसोविविक्तेतिष्ठतःपश्यहन्मि
निशाचरं॥चापमानीयशीघ्रंमेबाणंचरघुनंदन॥२५॥तच्छ्रुत्वारामवचनं
जटायुःप्राहपक्षीनवान्॥मांनमारयभद्रंतेम्रियमाणंस्वकर्मणा॥२६॥अहं
जटायुस्तेभार्याहारिणंसमनुद्रुतः॥रावणंतत्रयुद्धंमेबभूवारिविमर्दन॥२७॥
तस्यवाहान्रथंचापंछित्त्वाहंतेनपातितः॥पतितोस्मिजगन्नाथप्राणां
स्त्यक्षामिपश्यमां॥२८॥तच्छ्रुत्वाराघवोदीनंकंठप्राणंददर्शह॥हस्ताभ्यां
संस्पृशन्रामोदुःखाश्रुप्लुतलोचनः॥२९॥जटायोब्रूहिमेभार्याकेननीता
१२८४॥ शुभानना॥मत्कार्यार्थेहतोसित्वंमतोमेप्रियबांधवः॥३०॥जटायुः

(128)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सन्त्रस्तया वाचा वल्का द्रुतं समुद्रमनु ॥ उवाच रावणो राम राक्षसः पापी भविक्रमः ॥ ३१ ॥
आदाय मैथिलीं सीतां दक्षिणाभिमुखो ययौ ॥ इतो वक्तुं न शक्नोमि प्राणांस्त्यक्ष्यामि तेऽग्र
तः ॥ ३२ ॥ दिष्ट्या दृष्टोसि राम त्वं म्रियमाणेन मेऽनघ ॥ परमात्मासि विष्णुस्त्वं मायामनुज
रूपधृक् ॥ ३३ ॥ अंतकालेपि दृष्ट्वा त्वां मुक्तोहं रघुसत्तम ॥ हस्ताभ्यां स्पृश मां राम पुन
र्यास्यामि ते पदं ॥ ३४ ॥ तथेति रामः पस्पर्श तदंगं पाणिना स्मयन् ॥ ततः प्राणान् परित्य
ज्य जटायुः पतितो भुवि ॥ ३५ ॥ रामस्तं चक्षुरोन्याथ बंधुवत् साश्रुलोचनः ॥ लक्ष्मणेन
समानाय्य काष्ठानि प्रददाह तं ॥ ३६ ॥ स्नात्वा सदुःखेन रामोपि लक्ष्मणेन समन्वितः ॥
हत्वा वने मृगं तत्र मांसखंडान् समंततः ॥ ३७ ॥ स्थाडिले प्रक्षिपद्रामः पृथुकः पृथु
गनेकधा ॥ भक्षंतु पक्षिणः सर्वे तृप्तो भवतु पक्षिराट् ॥ ३८ ॥ इत्युक्तो राघवः प्रा
ह जटायो गच्छ मत्पदं ॥ मत्सारूप्यं भज स्वाद्य सर्वलोकस्य पश्यतः ॥ ३९ ॥ ततोनं
तरमेवासौ दिव्यरूपधरः शुभः ॥ विमानवर्यमारुह्य भास्वरं भानुसन्निभं ॥ ४० ॥
शंखचक्रगदापद्मकीरीटवरभूषणैः ॥ द्योतयन् स्वप्रकाशेन पीतांब
रधरोमलः ॥ ४१ ॥ चतुर्भिः पार्षदैर्विष्णोस्तादृशै रभिपूजितः ॥ स्तूयमानो
योगिगणै राममाभाष्य संस्थितः ॥ ४२ ॥ कृतांजलिपुटो भूत्वा तुष्टाव रघुनंद
नं ॥ ४३ ॥ जटायुरुवाच ॥ अगणि(त)गुणमप्रमेयमाद्यं सकलजगत्स्थितिसंयमा(दिहेतुं)

त

दिहेतुं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तन

उपरमपरमं परात्मभूतं स[illegible]महं प्रणतोस्मि रामचंद्रं॥४३॥निरवधिसुखमिं
दिराकटाक्षं क्षपितसुरेंद्रचतुर्मुखादिदुःखं। नरवरमनिशं नतोस्मि रामं वरदमहं
वरचापबाणहस्तं॥४४॥त्रिभुवनकमनीयरूपमीड्यं रविशतभासुरमीहि
तप्रदानं। शरणदमनिशं सुरागमूल प्रकृतिनिलयं रघुनंदनं प्रपद्ये॥४५॥
भवविपिनदवाग्निनामधेयं भवमुखदैवतदैवतं दयालुं। दनुजपतिसहस्र
या५ कोटिनाशं रविप्रभं सदृशं हरिं प्रपद्ये॥४६॥अविरतभवभावनातिदूरं भवमु
खमुनिभिः सदैवसेव्यं। भवजलधिसुतारणांघ्रिपोतं शरणमहं रघुनंदनं प्र
पद्ये॥४७॥गिरिशगिरिसुतामनोनिवासं गिरिवरधारणमाहितामिरामं॥सु
रवरदनुजेंद्रसेवितांघ्रिं सुरवरदं रघुनायकं प्रपद्ये॥४८॥परधनपरदार
वर्जितानां परगुणभूतिषु तुष्टमानसानां। परहितनिरतात्मनां सुसेव्यं र
घुवरमंबुजलोचनं प्रपद्ये॥४९॥स्मितरुचिरविकासिताननाब्जं समतिसुल
भमुदारराजनीलनीलं। सितजलरुहचारुनेत्रशोभं रघुपतिमीशगुरो
र्गुरुं प्रपद्ये॥५०॥हरिकमलजशंभुरूपभेदात्त्वमिह विभासि गुणत्रयानुवृत्तः॥
५५॥ रविरिवजलपूरितोदपात्रेष्वमरपतिस्तुतिपात्रमीशमीडे॥५१॥रतिपति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञानकोटिसुसुंदरांगं ज्ञानपथ्यगोचरभावनाविदूरं ॥५३॥ यतिपतिहृदये सदा वि
भातं रघुपतिमार्तिहरं प्रभुं प्रपद्ये ॥ इत्येवं स्तुवतस्तस्य प्रसन्नोभूद्रघूत्तमः ॥५४॥
उवाच गच्छ भद्रं ते मम विष्णोः परं पदं ॥ शृणोति य इदं स्तोत्रं लिखेद्वा नियतः
पठेत्तु ॥ स याति मम सारूप्यं सततं मत्परायणः ॥५५॥ इति राघवभाषितं तदा श्रु
तवान्हर्षसमाकुलो द्विजः ॥ रघुनंदनसाम्यमास्थितः प्रययौ ब्रह्मसुपूजितं
पदं ॥५६॥ इति श्रीमद० उमा० आरं० अष्टमोध्यायः ॥८॥ ॥श्री॥ ततो रामः सलक्ष्म
णो जगाम विपिनांतरं ॥ दुर्नदूरं वं समाश्रित्य सीतान्वेषणतत्परः ॥१॥ ततश्चाद्भु
तसमाकारो राक्षसः प्रत्यदृश्यत ॥ वक्षस्येव महावक्त्रः शिरश्चरणादिविवर्जितः ॥२॥ बाहुयो
जनमात्रेण व्यायामौ तस्य राक्षसः ॥ कबंधो नाम दैत्येंद्रः सर्वसत्वविहंसकः ॥३॥ तद्बाह्वोर्मध्य
मध्ये गतौ चरंतौ रामलक्ष्मणौ ॥ ददृशतुर्महासत्वं तद्बाहू परिवेष्टितौ ॥४॥ रामः प्रोवाच
विहसन्पश्य लक्ष्मण राक्षसं ॥ शिरःपादविहीनोसौ यस्य वक्षसि चाननं ॥५॥ बाहुभ्यां
प्रततयत्नेन तद्भक्ष्यस्थितावुभौ ॥ आवामपि तयोर्बाह्वोर्मध्ये संकलितौ ध्रुवं ॥६॥
गंतुमन्यत्र मार्गेण दृश्यते रघुनंदन ॥ किं कर्तव्यमतोस्माभिरिदानीं भक्षयेत्स नौ ॥७॥
लक्ष्मणस्तमुवाचेदं किं विचारेण राघव ॥ आवामेकैकमव्यग्रौ छिंध्वो रक्षोभुजौ प्रभु
वं ॥ तथेति रामः खड्गेन भुजं दक्षिणमच्छिनत् ॥८॥ तथैव लक्ष्मणो वामं चिच्छेद
भुजमंजसा ॥ ततोतिविस्मितो दैत्यः कौ युवां सुरपुंगवौ ॥९॥ मद्बाहुच्छेदको

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोकद्विदेवेषु वाकुलः ततो निविहसन्नेव रामो राजीवलोचनः ॥१०॥ अयोध्याधिपतिः
श्रीमान् राजा दशरथो महान् ॥ रामोहं तस्य पुत्रोसौ भ्राता मे लक्ष्मणः सुधीः ॥११॥
मम भार्या जनकजा सीता त्रैलोक्यसुंदरी ॥ आवां मृगयया यातौ तदा केनापि रक्षसा ॥१२॥
छिन्नौ तव भुजौ हं च को वा विकटरूपधृक् ॥ कबंध उवाच ॥ धन्योहं यदि राम त्व
मागतोसि मम अंतिके ॥१४॥ पुरा गंधर्वराजोहं रूपयौवनदर्पितः ॥ बिभ्रमन् लोकम
खिलं वरनारीमनोहरः ॥१५॥ तपसा ब्रह्मणो लब्ध्वा अवध्यत्वं वरं घनम् ॥ अष्टावक्र
मुनिं दृष्ट्वा कदाचिद् देहसन् पुरा ॥१६॥ क्रुद्धो वाच ह दुष्ट त्वं राक्षसो भव दुर्मते ॥ अ
ष्टावक्रः पुनः प्राह वंदितो मे दयापरः ॥१७॥ शापस्यांतं च मे प्राह तपसा द्योतितप्रभः ॥
त्रेतायुगे दाशरथिर्भूत्वा नारायणः स्वयं ॥१८॥ आगमिष्यति ते बाहू छित्वा ते योज
नायतौ ॥ तेन शापविनिर्मुक्तो ऽभविष्यसि यथा पुरा ॥१९॥ इति शापो महद्राक्षसं राक्ष
सी तनु मात्मनः ॥ कदाचिद् देवराजानम् अभ्यधावं रुषा ॥२०॥ सोपि वज्रेण मां रा
मच्छिरोदेशे समताडयत् ॥ तदा शिरो गतं कुक्षिं पादौ च रघुनंदन ॥२१॥ ब्रह्मदत्तव
रान्मस्तु नाभवन् मे वज्रताडनात् ॥ मुखाभावे कथं जीवे देवाइस्य मराधिपं ॥२२॥ पु
नुः सर्वदयाविष्टो मां विलोक्यास्य वर्जितं ॥ ततो मां प्राह मघवान् जठरे ते मुखं भवे
त् ॥२३॥ बाहू ते योजनायातौ भविष्यतः ततो व्रज ॥ इत्युक्तोत्र वसन्नित्यं बाहुभ्यां
वनगोचरान् ॥२४॥ भक्षयाम्यधुना बाहू खंडितौ मे त्वयानघ ॥ इतः परं श्व

६५

(130)

मांसमासे निक्षिप्याग्निंधनावृते ॥२५॥ अग्निदह्यमानोहं त्वया रघुकुलोद्वह ॥ पूर्वरूपम
प्याप्य भार्यामार्गं वदामि ते ॥२६॥ इत्युक्ते लक्ष्मणेनाशु गर्त्तं निर्मीय तत्र तं ॥ निक्षिप्य प्रदहत्का
ष्ठैस्ततो देहात्समुत्थितः ॥२७॥ कंदर्पसदृशाकारः सर्वाभरणभूषितः ॥ रामं प्रदक्षिणं कृत्वा सा
ष्टांगं प्रणिपत्य तं ॥२८॥ कृतांजलिरुवाचेदं भक्तिगद्गदया गिरा ॥ गंधर्व उवाच ॥ त्वानुमुत्सह
ते मेघ मनो रामातिसंभ्रमात् ॥२९॥ त्वमनंतमनाद्यंतं मनोवाचामगोचरं ॥ सूक्ष्मं ते रूपमव्य
क्तं देहद्वयविलक्षणं ॥३०॥ दृग्रूपमपरं सर्वद्रष्टृ यंजडमनात्मकं ॥ तत्कथं त्वां विजानीयाद्व्य
तिरिक्तं मनः प्रभो ॥३१॥ बुद्ध्यात्माभासयोरैक्यं जीव इत्यभिधीयते ॥ बुद्ध्यादिसाक्षी ब्रह्मैव
तस्मिन्निर्विषये खिलं ॥३२॥ आरोप्यते ज्ञानवाद्यैर्निर्विकारे खिलात्मनि ॥ हिरण्यगर्भ
ते सूक्ष्मं देहं स्थूलं विराट् स्मृतं ॥३३॥ भावयो राम सूक्ष्मं ते ध्यानं मंगलमंगलं ॥ भूतं भव्यं
भविष्यच्च यत्रेदं दृश्यते जगत् ॥३४॥ स्थूलेंडकोशे देहेस्मिन्महदादिनिरावृते ॥ सप्तभिः
प्रावृतगुणैर्विराजं धारणाश्रयं ॥३५॥ त्वमेव सर्वकैवल्यं लोकास्तेवयवाः स्मृताः ॥ पाता
लं ते पादमूलं पार्ष्णिस्तव महातलं ॥३६॥ रसातलं ते गुल्फौ तलातलमितीर्यते ॥ जानु
नी सुतलं राम ऊरू ते वितलं तथा ॥३७॥ तलातलं मही राम जघनं नाभिगं नभः ॥ उरःस्थ
लं ते ज्योतींषि ग्रीवा ते मह उच्यते ॥३८॥ वदनं जनलोकस्ते तपस्ते शंखदेशगं ॥ सत्यलोको र
घुश्रेष्ठ शीर्षण्यास्ते सदा प्रभो ॥३९॥ इंद्रादयो लोकपाला बाहवस्ते दिशः श्रुती ॥ अश्वि
नौ नासिके राम वक्त्रं तेग्निरुदाहृतः ॥४०॥ चक्षुषी सविता राम मनश्चंद्र उदाहृतं ॥ भ्रू

13

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥६७॥

त्वंग एव कालस्ते बुद्धिस्ते वाश्विनौ भवेतां ॥४१॥ रुद्रोहंकाररूपस्ते वाचाछंदांसि तेव्यय ॥ यम
स्ते दंष्ट्रे देवास्ते नक्षत्राणि द्विजालयः ॥४२॥ हासो मोहकरी माया सृष्टिस्ते पांगमीक्षणं ॥
धर्मः पुरस्ते धर्मश्च पृष्ठभाग उदीरितः ॥४३॥ निमेषोन्मेषको रात्रिर्दिवा चैव रघूत्तम ॥
समुद्राः सप्त ते कुक्षिर्नाड्यो नद्यस्तव प्रभो ॥४४॥ रोमाणि वृक्षौषधयो रेतो वृष्टिस्तव प्रभो ॥
महिमा ज्ञानशक्तिस्ते एवं स्थूलवपुस्तव ॥४५॥ इयदिदं स्थूलरूपं ते मनः संधार्यते प्रभो नरः
अनायासेन मुक्तिस्स्यात्ततोऽन्यन्न हि किंचित् ॥४६॥ अतोहं राम मते रूपं स्थूलमेवानु
भावये यस्मिन् ध्याते प्रेमरसः ॥ सरोमपुलको भवेत् ॥४७॥ तदेव मुक्तिः स्याद्राम यदा
ते स्थूलभावकः ॥ तदप्यस्यानवेबाह मेतद्रूपं विचिंतये ॥४८॥ धनुर्बाणधरं श्या
मं जटावल्कलभूषणं ॥ अपीच्यवयसं सीतां विचिन्वंतं सलक्ष्मणं ॥४९॥ इदमेव
सदा मे स्यान्मानसे रघुनंदन ॥ सर्वज्ञः शंकरः साक्षात्पार्वत्या सहितः सदा ॥५०॥
त्वद्रूपमेव सततं ध्यायन्नास्ते रघूत्तम ॥ मुमुक्षूणां सदा काश्यां तारकं ब्रह्म वाच
कं ॥५१॥ रामरामेत्युपदिशन् सदा संतुष्टमानसः ॥ अतस्त्वं जानकीनाथ परमा
त्मा सुनिश्चितं ॥५२॥ सर्वे ते मायया मूढास्त्वां न जानंति तत्त्वतः ॥ नमस्ते रामभ
॥६७॥ द्राय वेधसे परमात्मने ॥५३॥ अयोध्याधिपते तुभ्यं नमः सौमित्रिसेवितुं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्राहि त्राहि जगन्नाथ मायया मां न वृणो तु ते॥५४॥ श्रीराम उवाच॥ तुष्टोहं देव गंधर्व भ
क्त्यास्तुत्या तेनघ॥ याहि मे परमं संस्थानं योगिगम्यं सनातनं॥५५॥ जपंति ये नित्य
मनन्यबुध्या भक्त्या त्वदुक्तं स्तवमागतो क्तं॥ ते ज्ञानसंभृतं भवं विहाय मां यांतु नित्या
नुभवानुमेयं॥५६॥ इति श्रीमद॰ अरंण्यकांडे॰ नवमोध्याय॥९॥ लब्ध्वा वरं स गंधर्वः
प्रयास्यन् राममब्रवीत्॥ शबरी यास्तपुरो भागे अश्रमे रघुनंदन॥१॥ भक्त्या त्वत्पादकमले भक्ति
मार्गविशारदा॥ तां प्रयाहि माहाभाग सर्वं ते कथइष्यति॥२॥ इत्युक्त्वा प्रययौ सोपि विमाने
नार्कवर्चसा॥ विहायोपदं राम नामस्मरणे फलमीदृशं॥३॥ तदा तत्वृपिनं घोरं सिंह
व्याघ्रादिभूषितं॥ त्यक्त्वा नेरेत्याश्रमपदं शबर्या रघुनंदन॥४॥ शबरी राममालोक्य लक्ष्मणे
न समन्वितं॥ आयातं राममादत्यप्रस्थायाचिरेण सा॥५॥ पतित्वा पादयोरग्रे हर्षपूर्णा
श्रुलोचना॥ स्वागतेनाभिनंद्याथ स्वागते संन्यवेशयेत्॥६॥ रामलक्ष्मणयो सम्यक्पा
दौ प्रक्षाल्य भक्तितः॥ तज्जलेनाभिषिंच्यांगमथार्घ्यादिभिरादृतः॥७॥ संपूज्य वि
धिवद्रामं सौमित्रिं च सपर्यया॥ संगृहीतानि दिव्यानि रामार्थे८ शबरी मुदा॥८॥ फ
लान्यमृतकल्पानि ददौ रामाय भक्तितः॥९॥ पादौ संपूज्य कुसुमैः सुगंधैः सानुले
पनैः॥१०॥ कृतातिथ्यं रघुश्रेष्टमुपविष्टं साहानुजं॥ शबरी भक्तिसंपन्ना प्रांज
लिर्वाक्यमब्रवीत्॥२०॥ अत्राश्रमे रघुश्रेष्ट गुरवो मे महर्षयः॥ स्थिताः शुश्रू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं नेषां कुर्वंति समुपस्थिता ॥११॥ बहुवर्षसहस्राणि गतास्ते ब्रह्मणः पदं ॥ गमिष्यंतो ध्रुवं नमां वं ॥ ६८ ॥
वसात्र च समाहिता ॥१२॥ रामो दाशरथिस्तीनि परमात्मा सनातनः ॥ राक्षसानां वधार्थाय
ऋषीणां रक्षणाय च ॥१३॥ आगमिष्यति चैकाग्रज्ञाननिष्ठा स्थिरा भव ॥ इदानीं चित्रकूटा
द्रावास आश्रमे वसति प्रभुः ॥१४॥ यावदागमनं तस्य तावद्रक्ष कलेवरं ॥ दृष्ट्वैवं राघवं तस्य द
र्शनाद्रूपास्यसि तत्पदं ॥१५॥ तथैवाकरवं राम लब्ध्वा नेकपरायणा ॥ प्रतीक्षमागमनं ते
घसपूर्णं गुरुभाषितं ॥१६॥ तव संदर्शनं राम गुरूणामपि भो विभो ॥ योषिन्मूढाप्रमेय त्वा
माहीन ज्ञाति समुद्भवा ॥१७॥ तव दास्यस्य दासानां शतसंख्योत्तरस्य वा ॥ दास्येह न
नाधिकारोस्ति कुतः साक्षात्तवैव विभो ॥१८॥ कथं रामाधमे दृश्यसे मनोवागगोचरः ॥ स्तो
तुं न जाने देवेश किं करोमि प्रसीद मे ॥१९॥ श्रीराम उवाच पुंस्त्वे स्त्रीत्वविशेषो वा जा
तिनामाश्रमादयः ॥ न कारणं मद्भजने भक्तिरेव हि कारणं ॥२०॥ यज्ञदानतपोभिर्वा वे
दाध्ययनकर्मभिः ॥ नैव द्रष्टुमहं शक्यो मद्भक्तिविमुखैः सदा ॥२१॥ तस्माद्भामिनि संक्षेपाद्व
क्ष्येहं भक्तिसाधनं ॥ सतां संगतिरेवात्र साधनं प्रथमं स्मृतं ॥२२॥ द्वितीयं मत्कथालापः तृ
तीयं मद्गुणेरणं ॥ व्याख्यातृत्वं मद्वचसां चतुर्थं साधनं भवेत् ॥२३॥ आचार्योपासनं भ
६८ द्र मद्बुद्ध्यामायया सदा ॥ पंचमं पुण्यशीलत्वं यमादिनियमादि च ॥२४॥ निष्ठा मत्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेनेनिस्यं न्रष्टं साधनमुच्यते॥ पंचमं ज्ञानुरागत्वं त्यागं सप्तम उच्यते॥२५॥ मद्भक्ते
ष्वधिका पूजा सर्वभूतेषु मन्मतिः॥ विषयेषु विरागत्वं शमादिसहितं तदा॥२६॥ अष्ट
मं नवमे तत्र विचारो मम भामिनी॥ एवं नवविधं भक्तिसाधनं यस्य कस्य वा॥२७॥ स्त्रि
या पुरुषस्यापि तिर्यग्योनिगतस्य वा॥ भक्तिः संजायते तस्य प्रेमलक्षण शुभेक्षणे॥२८॥
भक्त्यां संजातमात्रायां मत्तत्त्वानुभवस्तदा॥ ममानुभवसिद्धस्य मुक्तिस्तत्रैव जन्म
नि॥२९॥ स्यात्तस्मात्कारणं भक्तिमुक्तिस्तत्रैव जन्मनि॥ स्यात्तस्मात्कारणं भक्तिर्मो
क्षस्येति सुनिश्चितं॥३०॥ प्रथमं साधनं यस्य भवेत्तस्य क्रमेण तु॥ भवेत्सर्वं ततो भक्ति
र्मुक्तिरेव विनिश्चितं॥३१॥ तस्मान्मद्भक्तियुक्तास्त्वं ततोऽहं त्वामुपस्थितः॥ इतो मम
दर्शनान्मुक्तिस्तव नान्यत्र कारणं॥३२॥ यदि जानासि मे ब्रूहि सीता कमललोच
ना॥ कुत्रास्ते केन वा नीता प्रिया मे प्रियदर्शनी॥३३॥ शबर्युवाच॥ देव जानासि सर्वज्ञ
सर्वं त्वं विश्वभावन॥ तथापि पृच्छसे यन्मां लोकाननुसृतः प्रभो॥३४॥ ततोऽहमभि
दास्यामि सीता यत्राधुना स्थिता॥ रावणेन हृता सीता लंकायां वर्ततेऽधुना॥३५॥ इतः
समीपे रामास्ते पंपा नाम सरोवरं॥ ऋष्यमूको गिरिर्नाम तत्समीपे महानगः॥३६॥
चतुर्भिर्मंत्रिभिः सार्द्धं सुग्रीवो वानराधिपः॥ भीतभीतः सदा तत्र तिष्ठत्यतु
लविक्रमः॥३७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वालिनश्च भयाद्भ्रातुः स्त्वदगम्यमृषे मे यातु॥ वालिनस्तत्र गच्छ त्वं तेन सख्यं कुरु
प्रभो॥३८॥ सुग्रीवेण च ते सर्वं तत्कार्यं संपादयिष्यते॥ अहमग्निं प्रवेक्ष्यामि तवाग्रे रघु
नंदन॥३९॥ मुहूर्तं तिष्ठ राजेंद्र यावद्दग्ध्वा कलेवरं॥ यास्यामि भवनं राम तव विष्णोः
परं पदं॥४०॥ इति रामं समामंत्र्य प्रविवेश हुताशनं॥ क्षणं निर्धूय सकलमविद्या
कृतबंधनं॥४१॥ रामप्रसादाच्छबरी मोक्षं प्रापातिदुर्लभं॥ किं दुष्करं जगन्नाथे श्री
रामे भक्तवत्सले॥४२॥ प्रसन्नेऽधमजन्मापि शबरी मुक्तबंधना॥ किं पुनर्ब्राह्मणाः मुख्याः
मुक्तिप्रा पसा पटः५ पुण्याः श्रीरामचिंतकाः॥४३॥ मुक्तिं यांतीति मद्भक्तिर्मुक्तिरेव न संशयः॥४४॥
भक्तिर्मुक्तिविधायिनी भगवतः श्रीरामचंद्रस्य हे लोकाः॥ कामदुघांघ्रिपद्मयुगु
लं सेवध्वमत्युत्सुकाः॥ नानाज्ञानविशेषमंत्रविततिं त्यक्त्वा सदाहंम शं रामं श्या
मतनुं स्मरारिहृदये शांतं भजध्वं बुधाः॥४५॥ इति श्रीमदध्यात्मरामायणे
उमामहेश्वरसंवादे आरण्यकांडे दशमोऽध्यायः॥१०॥ इति आरण्यकांडसमा श्लोका
प्तं॥५॥ कांडे रण्ये सर्गाध्यासमाख्ये द्विपंचसप्तपंचशतानि श्लोकाः पाप ५११
हरा पार्वतीशो काः॥ॐ॥ ततः सलक्ष्मणो रामः शनैः पंपासरस्तटं॥
॥६९ आगत्य सरसां श्रेष्ठं दृष्ट्वा विस्मयमाययौ॥१॥ क्रोशमात्रं सुविस्तीर्णम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गाधजलसंकरं॥ उत्फुल्लांबुजकल्हारं कुमुदोत्पलमंडितं॥२ नानापुष्पलताकी
र्णनानाफलसमावृतं॥ सतां मनः स्वच्छजलं पद्मकिंजल्कवासितं॥३॥ हंसकारं
डवाकीर्णचक्रवाकादिशोभितं॥ जलकुक्कुटकोयष्टिक्रौंचनादोपनादितं॥४॥ ततोपस्थस्य
सलिलंपीत्वाश्रमहरं विभुः॥ सानुजः सरसस्तीरस्य तलेन पथ्यायियो॥५॥ ऋषमुकगिरेः
पार्श्वं गच्छंतौ रामलक्ष्मणौ॥ धनुर्बाणधरौ कांतौ जटावल्कलमंडितौ॥६॥ पश्यंतौ वि
विधान्वृक्षानू गिरेःस्तौ सुविक्रमौ॥ सुग्रीवस्तु गिरेर्मूर्ध्नि चतुर्भिः सह वानरैः॥७॥
स्थिसाददृष्टौ तौ यातौ अरुरुह गिरेः सिरः॥ मयादाह हनुमंतं कौ तौ विरवरौ सखे॥८॥
गच्छ जानिहि भद्रं तौ बटुभूत्वा द्विजाकृतिः॥ वालिनाप्रेषितौ किं वा मां हंतुं स
मुपागतौ॥९॥ ताभ्यां संभाषणं कृत्वा जानीहि हृदयं तयोः॥ यदि तौ दुष्टहृदयौ संज्ञां कु
रु कराग्रतः॥१०॥ साधुलस्मितवल्कलच्छेदनं आगिहैनी सुनिश्चितं॥ ततोतिबटुरूपेण ह
नुमान्समुपागतः॥११॥ विनयावनतो भूत्वा रामं नत्वेदमब्रवीत्॥ कोयुवां पुरुषव्या
घ्रौ युवानं वीरसंमतौ॥१२॥ द्योतयंतौ दिशः सर्वाः प्रभया भास्कराविव॥ युवां त्रैक्यलोक
र्त्ताराविति भातिमनो मम॥१३॥ युवां प्रधानपुरुषौ जगद्धेतू जगन्मयौ॥ मायया मनुषा
कारौ चरंताविव लीलया॥१४॥ भूभारहरणार्थाय प्रजानां पालनाय च॥ अवतीर्णाविव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२७०॥

परोन्वेष्टुं तौ क्षत्रियाकृती ॥१५॥ जगत्स्थितिलयौ सर्गं लीलया कर्तुमुद्यतौ ॥ स्वतंत्रौ प्रे
रकौ सर्वहृदयस्थाविहेश्वरौ ॥१६॥ नरनारायणौ लोके चरंताविति मे मतिः ॥ श्रीरामो लक्ष्म
णं प्राह पश्यैनं बटुरूपिणं ॥१७॥ शब्दशास्त्रमशेषेण श्रुतं नूनमनेकधा ॥ अनेन भाषितं
कृत्स्नं न किंचिदपशब्दितं ॥१८॥ ततः प्राह हनुमंतं राघवो ज्ञानविग्रहः ॥ अहं दाशरथी रामो
ह्ययं मे लक्ष्मणोनुजः ॥१९॥ सीतया भार्यया सार्द्धं पितुर्वचनगौरवात् ॥ आगतस्तत्र वि
पिने स्थितोहं दंडके द्विज ॥२०॥ तत्र भार्या हृता सीता राक्षसा केनचिन्मम ॥ तामन्वेष्टुमि
हायातौ त्वं को वा कस्य वा बटुः ॥२१॥ बटुरुवाच ॥ सुग्रीवो नाम राजास्ते वानराणां महामतिः
चतुर्भिर्मंत्रिभिः सार्द्धं गिरेरुपरि तिष्ठति ॥२२॥ भ्राता कनीयान् सुग्रीवो वालिनः पा
पचेतसः ॥ तेन निर्वासितो भार्या हृता तस्यैव वालिना ॥२३॥ तद्भयादृश्यमूकाख्यं गि
रिमाश्रित्य संस्थितः ॥ अहं सुग्रीवसचिवो वायुपुत्रो महामते ॥२४॥ हनुमान्नाम वि
ख्यातो ह्यंजनीगर्भसंभवः ॥ तेन सख्यं त्वयायुक्तं सुग्रीवस्य रघूत्तम ॥२५॥ भार्या
पहारिणं हंतुं सहायस्ते भविष्यति ॥ इदानीमेव गच्छाम आगच्छ यदि रोचते ॥२६॥
श्रीराम उवाच ॥ अहमप्यागतस्तेन सख्यं कर्तुं कपीश्वर ॥ सख्युस्तस्यापि यत्का
र्यं तत्करिष्याम्यसंशयं ॥२७॥ हनुमान् स्वस्वरूपेण स्थितो राममथाब्रवीत् ॥
॥२७०॥ आरोहतां मम स्कंधौ गच्छामः पर्वतोपरि ॥२८॥ यत्र तिष्ठति सुग्रीवो मं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मंत्रिभिर्वालिनो भयात्॥ त्वचेति नस्यारुरोह स्कंधं रामोपि लक्ष्मणः॥ उत्पपात गिरे
र्मूर्ध्नि क्षणादेव महाकपिः॥ वृक्षछायां समाश्रित्य स्थितौ तौ रामलक्ष्मणौ॥ ३०॥
हनुमानपि सुग्रीवमुपगम्य कृतांजलिः॥ व्येतु ते भयमायातौ राजन् श्रीरामल
क्ष्मणौ॥ ३१॥ शीघ्रमुत्तिष्ठ रामेण सख्यं ते योजितं मया॥ अग्निं साक्षिणमारोप्य तेन
सख्यं द्रुतं कुरु॥ ३२॥ ततो हर्षात्स सुग्रीवो समागम्य रघूत्तमं॥ वृक्षछायां तदा छि
त्वा विष्टराय ददौ मुदा॥ ३३॥ हनुमान् लक्ष्मणायादात्सुग्रीवाय च लक्ष्मणः॥ हर्षयाम वा
हता विष्टरं स एवावनस्थिरे॥ ३४॥ लक्ष्मणस्त्वब्रवीत्सर्वं रामवृत्तांतमादितः॥ वनवासाभि
गमनं सीताहरणमेव च॥ ३५॥ लक्ष्मणोक्तं वचः श्रुत्वा सुग्रीवो राममब्रवीत्॥ अहं क
रिष्ये राजेंद्र सीतायाः परिमार्गणं॥ ३६॥ साहाय्यमपि ते राम करिष्ये शत्रुघातिनः॥ शृणु राम
मया दृष्टं किंचिन्ने कथयाम्यहं॥ ३७॥ एकदाहं मंत्रिभिः सार्धं स्थितोहं गिरिमूर्धनि॥ वि
हायसा नीयमानां केनचित्प्रमदोत्तमां॥ ३८॥ क्रोशंतीं राम रामेति दृष्ट्वास्मान् पर्वतो
परि॥ विमुच्याभरणान्याशु स्वोत्तरीयेण भामिनी॥ ३९॥ निरीक्ष्याधः परित्यज्य क्रोशंतीं
नीतेन रक्षसा॥ नीतान्युत्थाय सर्वाणि गुहायामक्षिपं प्रभो॥ ४०॥ इदानीमपि पश्य त्वं जा
नीहि तद्वा न वा॥ इत्युक्त्वानीय रामाय दर्शयामास वानरः॥ ४१॥ विमुच्य रामस्तद्दृष्ट्वा
हा सीतेति मुहुर्मुहुः॥ हृदि निक्षिप्य तत्सर्वं रुरोद प्राकृतो यथा॥ ४२॥ आश्वा

130

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स राघवं भ्राता लक्ष्मणो वाक्यमब्रवीत्॥ अचिरेणैव ते राम प्राप्स्यते जानकीं शुभां॥४३॥
वानरेंद्रसाहाय्येन हत्वा रावणमाहवे॥ सुग्रीवं प्राप्याह हे राम प्रतिज्ञां करवाणि ते॥४४॥
समरे रावणं हत्वा तव दास्यामि जानकीं॥ ततो हनुमान् प्रज्वाल्य तयोरग्निं समी
सुग्रीवौ पतः॥४५॥ तावुभौ रामैलक्ष्मणौ अग्नौ साक्षिणि तिष्ठति॥ बाहूं प्रसार्य चालिंग्य प
रस्परमकल्मषौ॥४६॥ समीपे रघुनाथस्य सुग्रीवः समुपाविशत्॥ स्वोदंतं क
थयामास प्रणयाद्रघुनायके॥४७॥ सखे भ्रातुर्ममोदंतं वालिनो यत्कृतं पु
रा॥ मम पुत्रोऽथ मायावी नाम्ना परमदुर्मदः॥४८॥ किष्किंधां समुपागम्य
वालिनं समुपाह्वयेत्॥ सिंहनादेन महता वालि[illegible]न दमर्षणः॥४९॥ नि
र्ययौ क्रोधतो मत्तो जघान दृढमुष्टिना॥ दुद्राव तेन संविग्नो जगाम स्व
गुहां प्रति॥५०॥ अन्वदुद्राव तं वाली मायाविनमहं तथा॥ ततः प्रविष्ट
मालोक्य गुहां मायाविनं रुषा॥५१॥ वाली मामाह तिष्ठ त्वं बहिर्गच्छाम्य
हं गुहां॥ रक्षकाविन्यस्य गुहां मासमेकं न निर्ययौ॥५२॥ मासादूर्ध्वं गु
हाद्वारान्निर्गतं रुचिरं बहु॥५३॥ तद्दृष्ट्वा परितप्तांगो मृतो वालीति दुःखि
तः॥५४॥ गुहाद्वारे शिलामेकां निधाय गृहमागतः॥ ततोऽब्रुवन्मृतो वालि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हास्मि विस्मितः॥ देवत्वं जगतां नाथ परमात्मा न संशयः॥७८॥ मत्सर्वं हत पुण्यौ
घे संगतो घमयासह॥ ह्यां त्रजंति माहात्म्यानेः संसारविरक्तये॥७९॥ तां प्राप्य
मोक्षसन्त्रिवं प्रार्थयेहं कथं भवं॥ दाराः पुत्राश्च नं राज्यं सर्वं हं न्मायया हतं॥८०॥
अतोहं देवदेवेश न क्षेपो कोन्यस्त्वसी दमे॥ अनंदानुभवं ह्याद्य प्राप्तोहं भाग्य
गौरवात्॥८१॥ न दर्शयत मा नेपि निधान मिव सत्वतो॥ अनाथ विद्या संस्सिद्धं
बंधनं छेद्यमद्य नः॥८२॥ यज्ञदान तपः कर्म यत्नैर्ष्टादि निरप्यसौ॥ नजीर्यते पु
नर्देहं मज्जंते संसृतिं प्रभो॥८३॥ त्वत्प्रसाद दर्शनात्सद्यो नाश्यामेति न संशयः॥
क्षणोर्द्धमपि यच्चित्तं त्वयि तिष्टत्यचंचलं॥८४॥ तस्याज्ञानमनर्थानां मूलं
न स्पृशति न हत्यातु॥ तत्तिष्टतु मनो राम त्वयि वान्यत्र वा सदा॥८५॥ राम रामेति
यद्वाणी मधुरं गायति क्षणं॥ स ब्रह्महा सुरापो वा मुच्यते सर्वपातकैः॥८६॥
न कांक्षे विजयं राम न च दारसुखादिकं॥ भक्तिमेव सदा कांक्षे त्वयि बंधविमो
चनीं॥८७॥ त्वन्मायया हृतं संसार त्वदंघ्रौ लं रघूत्तम॥ त्वत्प्रसाद भक्तिमद्दि
न्य त्राहि मां भवसागरात्॥८८॥ पूर्वं मित्राद्युदासीन त्वन्मायया रक्तवलसः॥
अस्यन्ये घं भवत्प्रसाद दर्शनादेव राघव॥८९॥ सर्वं छ मे व मे भाति कमित्रं घ
च मे रिपुः॥ यावहं न्मायया बद्धस्तावद्गुण विशेषतः॥९०॥ सा या वदैत्ति
व

१९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नानात्वं तावद्भवति नान्यथा॥ यावन्नाहमाज्ञानात्तावत्कालकृतं भयं॥ ११॥ आ
त्मविद्यामुपास्ते यस्सोंधे नमसि मज्जति॥ मायामूलमिदं सर्वं पुत्रदारादिबंधनं॥ १२॥
अतः सारय मां मायां दासस्तव रघूत्तम॥ त्वत्पादपद्मार्पितचित्तवृत्तिस्त्वन्नामसं
गीतकथासु वाणी॥ १३॥ त्वद्भक्तिसेवानिरतौ करौ मे त्वदंगसंगं त्वनिशं ममास्तु॥
त्वन्मूर्तिभक्तान्स्वगुरूंश्च चक्षुः पश्यत्वजस्रं तव मंदिराणि॥ १४॥ अंगानि
विष्णोस्ते पादरजो विमिश्रतीर्थानि बिभर्तु शत्रुकेतो॥ शिरस्त्वदीयं भवप
द्मजाद्यैर्जुष्टं पदं राम नमत्वजस्रं॥ १५॥ इति श्री० उ० किष्किंधा० प्रथमसर्गः॥१॥
ईशं स्वात्मपरिष्वंगनिर्धूताशेषकल्मषं॥ रामः सुग्रीवमालोक्य सस्मितं वा
क्यमब्रवीत्॥१॥ मायां मोहकरीं तस्मिन्वितत्यं कार्यसिद्धये॥ सखे यदुक्तं
यत्तन्मे सत्यमेव न संशयः॥२॥ किंतु लोका वदिष्यंति मामेवं रघुनंदनः॥
कृतवान्किं कपींद्राय सख्यं कृत्वाग्निसाक्षिकं॥३॥ इति लोकापवादो मे
भविष्यति न संशयः॥ तस्मादाह्वय भद्रं ते गत्वा युद्धाय वालिनं॥४॥ बा
णेनैकेन तं हत्वा राज्ये त्वामभिषेचये॥५॥ तथेति गत्वा सुग्रीवः किष्किं
॥७॥ ७३ धोपवनं द्रुतं॥६॥ कृत्वा शब्दं महानादं तमाह्वयत वालिनं॥ तच्छ्रुत्वात्रा

143

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नृत्निनद्रोषतांम्रविलोच्चनः ॥६॥ नीर्जगाम गुहाच्छीघ्रं सुग्रीवो यत्र वानरः ॥
तमापतंतं सुग्रीवः सीघ्रं वक्षस्यताडयत् ॥७॥ सुग्रीवमपि मुष्टिभ्यां घोजेन
क्रोधमूर्छितः ॥ वालीतमपि सुग्रीवमेवं द्वौ परस्परं ॥८॥ अयुद्धेतामकरूयो दृष्वा
रामोपि विस्मितः ॥ नमुमोच तदा बाणं सुग्रीववधशंकया ॥९॥ ततो दुद्राव सुग्रीवो व
मनूरक्तं भयाकुलः ॥ वाली स्वभवनं यायात् सुग्रीवो राममब्रवीत् ॥१०॥ किं मां घा
तयसे राम शत्रुणा भ्रातृरूपिणा ॥ यदि मद्धनने वांछा त्वमेव जहि मां विभो ॥११॥
एवं मे प्रत्ययं कृत्वा सत्यवादि रघूत्तमः ॥ उपेक्ष्यसे किमर्थं मां शरणागतवत्सल ॥१२॥
श्रुत्वा सुग्रीववचनं रामः साश्रुविलोचनः ॥ आलिंग्य मा त्वमाभैषीस्त्वं दृष्ट्वा भेदेकृ
चौ ॥१३॥ मित्रघाति समाशंक्य मुक्तवान्सायकं नहि ॥ इदानीमेव ते चिन्हं करिष्ये प्र
मत्तोंनये ॥१४॥ गत्वाह्वय पुनः शत्रुं हतवानसि वालिनं ॥ रामोहं वानरायेभ्रात हनि
ष्यामि रिपुं क्षणात् ॥१५॥ इत्याश्वास्य स सुग्रीवं रामो लक्ष्मणमब्रवीत् ॥ सुग्रीवस्य
गले पुष्पमालामामुंच पुष्पितां ॥१६॥ प्रेषयस्व महाभागं सुग्रीवं वालिनं प्रति ॥
लक्ष्मणास्तु तदाबध्वा गच्छ गच्छेति सादरं ॥१७॥ प्रेषयामास सुग्रीवं सोपि
गत्वा तथाकरोत् ॥ पुनरप्युद्धतं नादं कृत्वा स वालिनमाह्वयत् ॥१८॥ तच्छ्रुत्वा वि
स्मितो वाली क्रोधेन मेतारैलः ॥ बध्वा परिकरं सम्यक् गमनायोपचक्रमे ॥१९॥
ह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गछंतं वालिनं तारा गृहीत्वा निषेधतं ॥ न गंतव्यं त्वयेदानीं त्वं कामेतीव जायते ॥२०॥
इदानीमेव ते भग्नः पुनरायाति सत्वरः ॥ साहाय्यबलवान्नूनं तस्य कश्चिन्नूनं समागतः ॥२१॥
वाली तामाह हे सुभ्रु त्वं कातेव्यनुतद्गता ॥ प्रियकरं परित्यज्य गछ गछागतं पुरि ॥२२॥
हत्वा शीघ्रं समायास्ये साहाय्यस्तस्य को भवेत् ॥ सहायं यदि सुग्रीवस्तं नोहंतोभयं
क्षणात् ॥२३॥ अयामि माम्मुंचः शूरः कथं तिष्ठे गृहे रिपुं ॥ ज्ञात्वाप्याह्वयमानं हि
हत्वा यास्यामि सुंदरी ॥२४॥ तारोवाच ॥ मत्तोन्यच्छृणु राजेंद्र त्वं हा कुरु यथोचितं ॥
आह मामंगदः पुत्रो मृगयायां श्रुतं वचः ॥२५॥ अयोध्याधिपतिः श्रीमान् रामो
दाशरथिकृतो ॥ लक्ष्मणेन सह भ्रात्रा सीतया भार्यया सह ॥ मागतो दंडकार
ण्यं तत्र सीता हृता किल ॥ रावणेन सह भ्रात्रा मार्गमाणश्च जानकीं ॥२७॥
आगतो ऋष्यमूकाद्रिं सुग्रीवेन समागतः ॥ चकार तेन सुग्रीवः सख्यं ह्यनल
साक्षिकं ॥२८॥ प्रतिज्ञातोस्ति वानू रामः सुग्रीवाय सलक्ष्मणः ॥ वालिनं समु
रे हत्वा राजानं त्वां करोम्यहं ॥२९॥ इति निश्चित्य तौ यातौ निश्चयं शृणु मद्वचः ॥
इदानीमेव ते भग्नः कथं पुनरुपागतः ॥३०॥ अतस्त्वं सर्वथा वैरं सुग्रीवे
व मा नय ॥ यौवराज्येऽभिषेच्याशु रामं त्वं शरणं व्रज ॥३१॥ पाहि मामंगदं रा
॥७४॥ ज्यं कुरुं च हर रिपुं गवान् ॥ इत्युक्त्वाश्रुमुखा तारा पादयोः प्रापतत्पतेः ॥३२॥

155

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्ताभ्यां च रयोध्वस्ता रुरोद भयविह्वला॥ तामालिंग्य तदा वालि सस्नेहमि
दमब्रवीत्॥३३॥ स्त्रीस्वभावाद्बिभेषि त्वं प्रिये नास्ति भयं मम॥ रामो यदि समा
यातो लक्ष्मणेन समन्वितः प्रभुः॥३४॥ तदा रामेण सस्नेहो भविष्यति न संशयः॥
रामो नारायणः साक्षादवतीर्णोऽखिलप्रभुः॥३५॥ भूभारहरणार्थाय श्रुतं
पूर्वं मयानघे॥ स्वपक्षपरपक्षं वा नास्ति तस्य परात्मनः॥३६॥ अतो याहि गृहं
साध्वी नत्वा तच्चरणांबुजं॥ भजतोनुभजत्येष भक्तिगम्यः परेश्वरः॥३७॥
यदि स्वयं समायाति सुग्रीवो हन्मि तं क्षणात्॥ पदुक्तं यौवराज्याय सुग्रीवः
स्याभिषेचनं॥३८॥ कथमाहूयमानोहं सुहृद्धाय रिपुणा प्रिये॥ शूरोहं सर्वलो
कानां संमतः शुभलक्षणे॥३९॥ भीतभीतमिदं वाक्यं कथं वाली वदेत्प्रिये॥
तस्माच्छोकं परित्यज्य तिष्ठ सुंदरि वेश्मनि॥४०॥ एवमाश्वास्य तां तारां शो
चंतीमश्रुलोचनां॥ ततो वाली समुद्युक्तः सुग्रीवस्य वधाय सः॥४१॥ दृ
ष्ट्वा वालिनमायांतं सुग्रीवो भीमविक्रमः॥ उत्पपात गले बद्धपुष्पमालः
पतंगवत्॥४२॥ मुष्टिभ्यां ताडयामास वालिनं सोपि तं तथा॥ अहवाली च
सुग्रीवं सुग्रीवो वालिनं तथा॥४३॥ रामं विलोक्य यत्नेन सुग्रीवो युयुधे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युधिमरस्येवं युद्ध्यमानौ तौ दृष्ट्वा रामः प्रतापवान्॥४४॥ बाणमादाय तूणीरा
द्वेद्रं धनुमादद्दे॥ आकृष्याकर्णपर्यंतमुद्दिश्य वृक्षखंडगः॥४५॥ निरीक्ष्य वालीनं
सम्यक्लक्ष्यं तद्धृदयं हरिः॥ उत्ससर्जाशनिसमं माहावेगं माहाबलः॥ विभेदस पा
शरो वृक्षो वालिनः कंपयन् महीं॥ उत्सपात माहाराहं मुंचंन्निव मृताह॥४६॥ ७५
श्री नदा मर्द्दूनिः संज्ञो परस्तान्वेतत्समापसः॥ ततो वाली ददर्शाग्रे रामं राजिवलोच
नं॥४८॥ धनुरालंब्य वामेन हस्तेनानेन सायकं॥ बिभ्राणं चीरवसनं जटामु
कुटधारिणं॥४९॥ विराजद्वृक्षसंभ्राजद्वनमाला विभूषितं॥ पीनचार्वाय
तभुजं नवदूर्वादलछविं॥५०॥ सुग्रीवलक्ष्मणाभ्यां च पार्श्वयोः परिसेवि
तं॥ विलोक्य रानकेप्राह वालीरामं विगर्हयन्॥५१॥ किं मयायस्कृतं राम त
व बाणहतोस्म्यहं राजधर्ममविज्ञाय गर्हितं कर्मतिष्ठतं॥५२॥ वृक्षखंडेति
रोभ्यस्तास्य जनामध्यसायकं॥ यशः किं लप्सुते रामः संग्रामः कामसत्यसंगरः॥५३॥
यदि क्षत्रियदायादो मनो वैराम सुदुर्मवः॥ सुदुष्करं वा स्कमं मे प्रास्य प्रस्तेत सफलं तदा॥५४
सुग्रीवेन कृतं किं ते मया वा न कृतं कि मु॥ रावणो नहृता भार्या तव राम माहा
७५॥ वने॥५५॥ सुग्रीवं शरणं यातः तद्यमितिसुमूभूमः॥ वतरामनजानिषे मद्बलं

46

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोकविश्रुतं ॥५६॥ सुग्रीवेणं सकं सख्यं रावणं सकुलं बध्वा ससीतां त्वं कथा सह ॥
अनयामि सुहूर्त्तोर्द्धु यदि चेच्छामि राघव ॥५७॥ धर्मिष्ठ इति लोकेस्मिन् कथ्यसे
रघुनंदन ॥ वानरं व्याधवद्धत्वा धर्मं कं त्वं ससेवदा ॥५८॥ अभक्ष्यं वानरं मांसं ह
त्वा मां किं करिष्यसि ॥ इत्येवं बहुभाषं तं वालिनं राघवोब्रवीत् ॥५९॥ धर्मस्य गोप्ता
लोकेस्मिन् चरामि सशरासनः ॥ अधर्मकारिणां हत्वा स्वधर्मं पालयाम्यहं ॥६०॥ दु
हिता भगिनी भ्रातुर्भार्या चैव तथा स्नुषा ॥ सम्मं यो रमते तासां मे कामपि विमु
ढधीः ॥६१॥ ~~अनेन मया धर्म~~विदा ॥ हतोसि वनगोचरः ॥ त्वं कामि वा न जानीष
माहं नो विचरंति हि ॥६२॥ पातकी स तु विज्ञेयः सर्वथा राजभिः सदा ॥ त्वं तु
भ्रातकनिष्ठस्य भार्यायां रमते बलात् ॥६३॥ लोके पुनानां संचारैरनस्त्वां
नातिभाषये ॥ तच्छ्रुत्वा भयसंविग्नो तारारामं रमापतिं ॥६४॥ वाली प्रणम्य र
भसा रामं वचनमब्रवीत् ॥ राम राम महाभाग जाने त्वां परमेश्वरं ॥६५॥ अजा
नता मया किंचिदुक्तं तु न त्वं तु मर्हसि ॥ सोक्षादवतारघाते न विशेषेण तत्वा
ग्रतः ॥६५॥ सजाम्यस्य मोहायो नित्तुल्पं नवदर्शनं ॥ यन्नाम विवशो गृह
नृत्रिमानः परं पदं ॥६७॥ यान्ति साक्षात्स एवाद्य मुमुर्षो मे पुरः स्थितः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवं जानामि पुरुषं त्वां श्रियं जानकीं शुभां॥६८॥रावणस्य वधार्थाय जातं त्वां ब्रह्मणार्थितः॥अनुजानीहि मां राम यास्ये त्वत्पदमुत्तमं॥६९॥मम तुल्यबलो बालः अंगदस्त्वं दयां कुरु॥विशल्यं कुरु मे रामः हृदयं पाणिनास्पृशन्॥७०॥नयन्स्पृशन्त्रि बाणमुधृत्य रामः पस्पर्श पाणिना॥सन्त्यक्त्वा नरं देहं मम मूर्त्ते क्षेमवह्निरूपेणा॥ (?)

कृत्वा॥७१॥बाली रघूत्तम करस्पर्शान्निहितो विमृष्टो रामेण नीतल करेण सुखा करेण॥

लग्नं॥७२॥बाली रघूत्तमकरस्पर्शे निहतो विमृष्टो रामेण शीतलकरेण सुखाकरेण॥ (?) सद्यो विमुच्य कपिदेहमन्यलभ्यं प्राप्तं पदं परमहंसगुणैर्दुरापं॥७२॥ (?)

सद्यो विमुच्य कपिदेहमनन्यलभ्यं प्राप्तं पदं परमहंसगुणैर्दुरापं॥७२॥

इतिश्रीमदध्यात्मरामायणे उमामहे० किष्किंधाकांडे द्वितीयः सर्गः॥२॥

दुद्रुवुर्वानराः सर्वे किष्किंधां भयविह्वलाः॥१॥तारामूचुर्महाभागे हतो वाली रणाजिरे॥अंगदं परिरक्षाद्य मंत्रिणं परिचोदय॥२॥चतुर्द्वारकपाटादीन्बध्वा रक्षामहे पुरीं॥ निहते बालिनि रणे रामेण परमात्मनो॥ (?)

वानराणां तु राजानमंगदं कुरु भामिनी॥३॥निहतं वालीनं श्रुत्वा तारा शोकविमूर्छिता अताडयत्स्वपाणिभ्यां शिरो वक्षसि पस्पर्शे च ता॥४॥ (?)

किं मे अंगदेन राज्येन नगरेण धनेन वा॥इदानीमेव निधनं यास्यामि पतिना सह॥५॥इत्युक्त्वा त्वरिता तत्र रुदंती मुक्तमूर्द्धजा॥ययौ तारा

(198)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्तिरोकार्त्ता यत्र भर्तुः कलेवरं ॥६॥ पतितं वालिनं दृष्ट्वा रक्तैः पांसुभिरावृतं ॥
रुदंती नाथ नाथेति पतिता तस्य पादयोः ॥७॥ करुणं विलपंती सा ददर्श रघुनं
दनं ॥ राम मां जहि बाणेन येन वाली हतस्त्वया ॥८॥ गच्छामि पतिसालोक्यं पतिर्मा
मभिकांक्षति ॥ स्वर्गेपि न सुखं तस्य मां विना रघुनंदन ॥९॥ पत्नीवियोगजं दुःखं
मनुभूतं त्वयानघ ॥ वालिने मां प्रयच्छाशु पत्नीदानफलं भवेत् ॥१०॥ सुग्रीवस्त्वसु
खं राज्यं प्राप्तिं वालिघातिना ॥ रामेण तु मया सार्द्धं भूंक्ष्व सापत्न्यवर्जितं ॥११॥
इत्येवं विलपंतीं तां तारां रामो महामनाः ॥ सांत्वयामास सदयया नवज्ञानोपदेशतः ॥१२॥
किं भीरु शोचसि व्यर्थं शोकस्याविषयं पतिं ॥ पतिस्तवायं देहो वा जीवो वा वद त
त्त्वतः ॥१३॥ पंचात्मको जडो देहस्त्वङ्मांसरुधिरास्थिवान् ॥ कालकर्मगुणो
त्पन्नः सोप्यास्तेद्यापि ते पुरः ॥१४॥ मन्यसे जीवमात्मानं जीवस्तर्हि निरामयः ॥
न जायते न म्रियते न तिष्ठति न गच्छति ॥ न स्त्री पुमान्वा षंढो वा जीवः सर्वगतो
ऽपि वा ॥ एक एवाद्वितीयोयमाकाशवदलेपकः ॥१६॥ नित्यो ज्ञानमयः शुद्धो सो
स कथं शोकमर्हति ॥ तारोवाच ॥ अहंकारादिसंबंधो यावद्देहेंद्रियैः सदा ॥१७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संसारस्तावदेवस्यादात्मानस्तद्विवेकिनः॥मिथ्यारोपितसंसारोनस्वयंविनिवु
र्त्तते॥१९॥विषयाध्यायमानस्यस्वप्नेमिथ्यागमोयथा॥अनाद्यविद्यासंबंधो
तस्मात्तवीहंसंजनेस्तथा॥२०॥संसारोपार्थकोपिस्याद्रागद्वेषादिसंकुलः॥मन
एवहिसंसारोबंधःस्यैवमनःशुभो॥२१॥आत्मामनःसमानत्वामेनतस्य
तबंधभाक्॥यथाविशुद्धःस्फटिकोलक्तकादिसमीपगः॥२२॥तत्तद्वर्ण
युतोभातिवस्तुतोनास्तिरंजनां॥बुद्धींद्रियसामीपगः॥२३॥आत्मापि
तेनमनसापरिगृह्यतद्गुणवान्॥कामान्जुषन्गुणैर्बद्धःसंसारेवर्त्तते
वशः॥२४॥आदौमनोगुणान्सृष्ट्वाततोगुणाःकर्माण्यनेकधा॥शुक्लो
हितकृष्णानिगतयस्तत्समानजाः॥२५॥एवंकर्मवशाज्जीवोभ्रमत्या
भूतसंप्लवं॥सर्वोपिसंहृतौजीवोवासनाभिःस्वकर्मभिः॥२६॥अ
नाद्यविद्यावशगस्तिष्टत्यभिनिवेशतः॥सृष्टिकालेपुनःपूर्ववासना
मानसैःसह॥२७॥जायतेपुनरप्येवंघटीयंत्रमिवावशः॥यदापुण्यवि
॥७७॥ शेषेणलभ्यतेसंगतिःसतां॥२८॥मद्भक्तानांसुशांतानांतदातद्विषया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मतिः॥ मत्कथाश्रवणे श्रद्धा दुर्लभा जायते ततः॥२९॥ ततः स्वरूपविज्ञानमनाया
सेन जायते॥ सदाचार्यप्रसादेन वाक्यार्थज्ञानतत्परैः॥३०॥ देहेंद्रियमनःमनः
प्राणाहंकृतिभ्यः पृथक्स्थितं स्वात्मानुभवतः सत्यमानंदात्मानमव्ययं॥३१॥
ज्ञात्वा सद्यो भवेन्मुक्तः सत्यमेव मयोदितं॥ एवं मयोदितं सम्यक्यालोचयति यो
नित्यं॥३२॥ तस्य संसारदुःखानि न स्पृशंति कदाचन॥ त्वमप्येतन्मया प्रोक्तमालो
चयति सुबुद्धीः॥३३॥ न स्प्रक्ष्यसे दुःखजालैः कर्मबंधाद्विमोक्ष्यसे॥ पूर्वजन्मा
त्रिते सुभ्रु स्ता मद्भक्तिरुत्तमा॥३४॥ अनंतबंधविमोक्षाय रूपं मे दर्शितं शुभे।
ध्यात्वा मद्रूपमनिशमालोचयमयोदितं॥३५॥ प्रवाहपतितं कार्यं कुर्वत्यपि
न लिप्यसे॥ श्रीरामेणोदितं सर्वं श्रुत्वा तारातिविस्मिता॥३६॥ देहाभिमा
नजं शोकं त्यक्त्वा नत्वा रघूत्तमं॥ आत्मानुभवसंतुष्टा जीवन्मुक्ता बभूव ह॥३७
क्षणसंगममात्रेण रामेण परमात्मना॥ अनादिबंधं निर्धूय मुक्ता सापि
विकल्मषा॥३८॥ सुग्रीवोपि च तच्छ्रुत्वा रामवक्त्रात्समीरितं॥ जहावज्ञानज
मखिलं स्वस्थचित्तोभवत्तदा॥३९॥ ततः सुग्रीवमाहेदं रामो वानरपुंग
वं॥ भ्रातुर्ज्येष्ठस्य पुत्रेण यद्युक्तं सांपरायिकं॥४०॥ कुरु सर्वं यथान्यायं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संस्कारादि ममाज्ञया॥ तथेति बलिभिर्मुख्यैर्वानरैः परिणीयतं॥४१॥ वालि ॥१७८॥
नं पुष्पकेक्षिप्ता सर्वराजोपचारकैः॥ भेरिदुंदुभिनिर्घोषैर्बाह्मणैर्मंत्रिभिः स
ह॥४२॥ यूथपैर्वानरैर्पौरैस्तारयाचांगदेन च॥ गत्वा चकार यत्सर्वं यथाशास्त्रं
प्रयत्नतः॥४३॥ स्नात्वा जगाम रामस्य समीपं मंत्रिभिः सह॥ नत्वा रामस्य चरण
यो सुग्रीवः प्राह हृष्टधीः॥४४॥ राज्यं प्रशाधि राजेंद्र वानराणां समृद्धिम
त्॥ दासोहं ते पादपद्मं सेवे लक्ष्मणवच्चिरं॥४५॥ इत्युक्तो राघवः प्राह सुग्रीवं
सस्मितं वचः॥ त्वमेवाहं न संदेहः शीघ्रं गच्छ ममाज्ञया॥४६॥ पुरराज्याधिप
त्ये त्वमात्मानमभिषेचय॥ नगरं न प्रवेक्ष्यामि चतुर्दशसमाः सखे॥४७॥
आगमिष्यति मे भ्राता लक्ष्मणः पट्टनं तव॥ अंगदं यौवराज्ये त्वमभिषेच
य सादरं॥४८॥ अंहं सांप्रीमं शिखरे पर्वतस्य सहानुजः॥ स्थास्यामि वर्ष
पर्यतं त्वत्समीपे ह्यवस्थितः॥ किंचित्कालं पुरे स्थित्वा सीताः याः परि
मार्गणे॥ साष्टांगं प्रणिपत्याह सुग्रीवो राम पादयोः॥५०॥ यथाज्ञापयसे दे
॥७८॥ व तत्तथैव करोम्यहं॥ अनुज्ञातस्तु रामेण सुग्रीवस्त्वसलक्ष्मणः॥५१॥

152

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गत्वा पुरीं तथा चक्रे यथा रामेण चोदितः ॥ सुग्रीवेण यथान्यायान् पूजितो ल
क्ष्मणस्तदा ॥५२॥ अगमत्तु राघवं शीघ्रं प्रणीपत्योपतस्थिवान् ॥ ततो रामो जगा
माशु लक्ष्मणेन समन्वितः ॥५३॥ प्रवर्षणगिरेरूर्ध्वं शीखरं भूरिविस्तरं ॥
तत्रैकं गह्वरं दृष्ट्वा स्फटिकं दीप्तिमच्छुभं ॥५४॥ वर्षवातातपसहं फलमूलस
मीपगं ॥ वासाय रोचयामास तत्र रामः सलक्ष्मणः ॥५५॥ दिव्यमूलफल
पुष्पसंयुते मौक्तिकोपमजलौघपल्वले ॥ चित्रवर्णमृगपक्षशोभिते
पर्वते रघुकुलोत्तमोऽवसत् ॥५६॥ इति श्री० उ० किष्किं० तृतीयः सर्गः ॥ ॥ श्री
तत्र वार्षिकदिनानि राघवो लीलया मणिगुहासु संचरन् ॥ पक्वमूलफल
भोगतुष्टचित्तोषितो लक्ष्मणेन सहितोऽवसत्सुखं ॥१॥ वातनुन्नजलपु
रितमेघारंतरस्तनितविद्युतगर्भान् ॥ वीक्ष्य विस्मयमगाद्गजयूथान्य
च्छहारितसुकांचनयूथान् ॥२॥ नवघाससमास्वादहृष्टपुष्टमृगद्वि
जाः ॥ धावतो परितो रामं वीक्ष्य निस्कारितेक्षणाः ॥३॥ नचलंतीसदा
ध्याननिष्ठा इव मुनिश्वराः ॥ रामं मानुषरूपेण गिरीकाननभूमीषु ॥४॥
नचरं तं परात्मानं ज्ञात्वा सिद्धा जगन्मुदा ॥ मृगपक्षिगणोप्यहो ला

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राममेवानुसेविरे॥५॥सौमित्रिरेकदाराममेकांतेध्यानतत्परं॥समाधिविरमेप्र
त्याप्रणयाद्विनयान्वितः॥६॥अब्रवीद्देवतेवाक्यान्नुपूर्वोक्ताद्विगतोमम॥ ॥७१
अनाद्यविद्यासंभूतःसंशयोहृदिसंस्थितः॥७॥इदानींज्ञातुमिच्छामिक्रिया
मार्गेणराघव॥भवदाराधनंलोकेयाथाकुर्वंतियोगिनः॥८॥इदमेवसदाकु
योगिनोमुक्तिसाधनं॥नारदोपितथाव्यासोब्रह्माकमलसंभवः॥९॥ब्रह्म
क्षत्रादिवर्णानांमाश्रमाणांचमोक्षदं॥स्त्रीशूद्राणांचराजेंद्रसुलभंमु
क्तिसाधनं॥१०॥तवभक्तायमेभ्रात्रेब्रूहिभक्तोपकारकं॥११॥श्रीरामोवा
च॥ममपूजाविधानस्यनांतोस्तिरघुसत्तम॥तथापिवक्ष्येसंक्षेपाद्यथा
वदनुपूर्वशः॥१२॥स्वगृह्योक्तप्रकारेणद्विजत्वंप्राप्यमानवः॥सकाशा
त्सद्गुरोर्मंत्रंलब्ध्वामद्भक्तिसंयुतः॥१३॥तेनसंदर्शितविधिनामामेवारा
धयेत्सुधीः॥हृदयेवानलेवार्चेत्प्रतिमादौविभावसौ॥१४॥शाल
ग्रामेशिलायांवापूजयेन्मामतंद्रितः॥प्रातःस्नानंप्रकुर्वीतप्रथमं
देहशुद्धये॥१५॥वेदतंत्रोदितैर्मंत्रैर्मृल्लेपनविधानतः॥संध्यादि
॥७१ कर्मयन्नित्यंतत्कुर्याद्विधिनाबुधः॥१६॥संकल्पमादौकुर्वीतसिद्ध्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्थं कूर्मेणां सुधीः॥ स्वगुरुं पूजयेद्भक्त्या मद्भक्त्या पूजको मम॥१७॥ शिलायां स्वल्पपर्णां
कुर्यात्प्रतिमासु ममीजनं॥ प्रसिद्धैर्गंधपुष्पाद्यैर्मे पूजासिद्धिदायका॥१८॥ अमायि
यिकसद्भक्त्या मां पूजयेन्नियतव्रतः॥ प्रतिमादिष्वलंकारः प्रियस्त्वकुलनंदन॥१९
अग्नौ यजेत हविषा भास्करं स्थंडिले यजेत्॥ भक्तेनोपहृतं प्रीत्यै श्रद्धया मम
वार्यपि॥२०॥ किं पुनर्भक्ष्यभोज्यादि गंधपुष्पाक्षतादिभिः॥ पूजाद्रव्याणि
सर्वाणि संपाद्यैवं समारभेत्॥२१॥ चैलाजिनकुशैः सम्यगासनं परिकल्पये
त्॥ तत्रोपविश्य देवस्य संमुखः शुद्धमानसः॥२२॥ मंत्रमूर्तिपञ्चरंन्यासं मं
त्रन्यासं ततो न्यसेत्॥ प्रतिमादावपि तदा कुर्यान्नित्यमतंद्रितः॥२३॥ कल
शं स्वकरे वामे क्षिपेत्पुष्पाणि दक्षिणे॥ अर्घ्यपाद्यप्रदानार्थं मधुपर्कार्थ
मेव च॥२४॥ तथैवाचमनार्थं तु न्यसेत्पात्रं चतुष्टयं॥ हृत्पद्मे भानुविम
लेकलां जीवस्य संज्ञिनां॥२५॥ ध्यायेत्स्वदेहमखिलं तया व्याप्तमरिंद
म॥ तामेवावाहेन्नित्यं प्रतिमादिषु मत्कलां॥२६॥ पाद्यार्घ्याचमनीयाद्यै
स्नानवस्त्रादिभूषणैः॥ यावन्तो तैर्ब्योपचारैर्वा ह्यर्चयेन्मामममायया॥२७॥
विभवे सतिकर्पूरकुंकुमागरुचंदनैः॥ अर्चयेन्मंत्रवन्नित्यं सुगंधकुसुमैः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शुभैः ॥२८॥ दत्त्वावरणपूजां वै ह्यागमोक्तां प्रकारयेत् ॥ नीराजनं धूपदीपैः ॥८०॥
नैवेद्यैर्बलिविस्तरैः ॥२९॥ अहं दूयापहरेन्नित्यं अहं ह्यनुग्रहमीश्वरः ॥ होमं कु
र्यात्प्रयत्नेन विधिना मंत्रकोविदः ॥३०॥ अगस्त्येनोक्तमार्गेण कुंडेनागम
वित्तमः ॥ जुहुयान्मंत्रमूलेन पुंसूक्तेनाथवा बुधः ॥३१॥ औपासना
ग्नौ वा चरुणा हविषाथ वा ॥ तप्तजांबुनदप्रख्यं दिव्याभरणभूषितं ॥३२॥
ध्यायेदनलमध्यस्थं होमकाले सदा बुधः ॥ पार्षदेभ्यो बलिं दत्त्वा होम
शेषं समापयेत् ॥३३॥ ततो जपं प्रकुर्वीत ध्यायेन्मां यतवाक् स्मरन् ॥
मुखवासं च ताम्बूलं दत्वा प्रीतिसमन्वितः ॥३४॥ मदर्थे नृत्यगीता
दि स्तुतिवाद्यादि कारयेत् ॥ प्रणमेद्दंडवद्भूमौ हृदये मां निधाय च ॥३५॥
शिरसा धारयेद्दत्तं प्रसादं भावनामयः ॥ पादाभ्यां मम सद्मूर्ध्नि गृही
त्वा भक्तिसंयुतः ॥३६॥ रक्ष मां घोरसंसारादित्यहं प्रणमेत्सुधीः ॥
उद्वासयेद्यथापूर्वं ज्योतिर्ज्योतिषि संस्मरन् ॥३७॥ एवमुक्तप्र
कारेण पूजयेद्विधिवद्यदि ॥ इहामुत्र वसेत्सिद्धिं प्राप्नोति मदनुग्र
॥८०॥ हात् ॥३८॥ मद्भक्तो यदि मामेव पूजां चैव दिने दिने ॥ करोति मम सा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रूप्यं प्राप्नोत्येव न संशयः ॥३९॥ एवं परात्मा श्रीरामः क्रियायोगमनुत्तमं ॥
पृष्टः प्राह स्वभक्ताय शेषांशाय नरेशेयैः ॥४०॥ पुनः प्राकृतवद्रामो माया
मालंब्य दुःखितः ॥ हा सीतेति वदन्नेव निद्रां लेभे कथंचन ॥४१॥ एतस्मिन्नं
तरे तत्र किंष्किन्धायां सुबुद्धिमान् ॥ हनूमान्प्राह सुग्रीवमेकांते कपिना
यकं ॥४२॥ शृणु राजन् प्रवक्ष्यामि तथ्यं वहितमुत्तमं ॥ रामेण ते कृतं कर्म
मुपकारो ह्यनुत्तमं ॥४३॥ कृतघ्नेन त्वया पूर्वं विस्मृतः प्रतिभाति मे ॥ कृते
ते निहतो वाली वीरः स्त्रैलोक्यसत्तमः ॥४४॥ तदागमनमे कार्यं त्यक्ष्य
से कार्यगौरवात् ॥ त्वं तु वानरभावेन स्त्रीसक्तो नावबुध्यसे ॥४५॥ करोमि
त्विप्रतिज्ञाय सीतायाः परिमार्गणं ॥ न करोति कृतघ्नस्त्वं हन्यसे वालिवध्रु
वं ॥४६॥ हनूमद्वचनं श्रुत्वा सुग्रीवो भयविह्वलः ॥ प्रत्युवाच हनूमंतं सत्य
मेव त्वयोदितं ॥४७॥ शीघ्रं कुरु मदाज्ञां त्वं वानराणां तरस्विनां सहस्रा
णां दशादानीं प्रेषयस्व दिशो दश ॥४८॥ सप्तद्वीपगतान्सर्वान्वानरान्
नयं तु ते ॥ पक्षमध्ये समायांतु सर्वे ते वानरपुंगवा ॥४९॥ ये पक्षमतिसंवर्तेते
वध्या मे न संशयः ॥ इत्याज्ञाप्य हनूमंतं सुग्रीवो गृहमाविशत् ॥५०॥ सुग्री
वाज्ञां पुरस्कृत्य हनूमान्मंत्रिसत्तमः ॥ तत्क्षणात्प्रेरयामास हरीन्द

157

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्नादिन्नाः सुधीः॥५१॥अगणितगुणवान्वायुवेगःप्रचारान्वनचरगुणमुख्या
न्पर्वताकाररूपान्॥पवनहितकुमारःप्रेषयामासदूतानतिरभसतरात्मा
दानमानादितुष्टान्॥५२॥इतिश्रीराम०उ०किष्किंधाकांडेचतुर्थसर्गः॥४॥छ
रामस्तुपर्वतस्याग्रेमणिस्थानोनिरगमुखः॥सीताविरहजंशोकमसहन्नति
दमब्रवीत्॥१॥पश्यलक्ष्मणमेसीताराक्षसेनहृताबलात्॥मृतामृतोवानि
श्चेतुंनजानेद्यापिकामिनीं॥२॥जीवतीतिचमेब्रूयात्कश्चिद्वाप्रियलक्ष्म
म॥यद्यजानामितांसाध्वींजीवंतींयत्रकुत्रवा॥३॥तर्हिवाहंहरिष्या
मिसुधामिवपयोनिधेः॥प्रतिज्ञांशृणुमेभ्रातर्येनमेजनकात्मजा॥४॥
नीतातंभस्मसात्कुर्यांसिपुत्रबलवानहं॥हासीतेचंद्रवदनेवसती
राक्षसालये॥५॥दुःखार्तामममपत्न्यंतीकथंप्राणान्धरिष्यसि॥चंद्रो
पिद्रागनुवद्भातिममचंद्राननांविना॥६॥चंद्रसंजानकीदृष्टाकरेमां
स्पर्शींशीतलैः॥सुग्रीवोपिदयाहीनोदुःखितंमांनपश्यति॥७॥राज्यं
॥८१ निष्कंटकंप्राप्यस्त्रीभिःपरिवृतोरहः॥कृतघ्नोदृश्यतेव्यक्तंपाना
सक्तोतिकामुकः॥८॥नायातिशरदंपश्यन्नपिमार्गयितुंप्रिया।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्वोपकारिणं दुष्टः कृतघ्नो विस्मितो हि मां ॥९॥ हन्मि सुग्रीवमप्यद्य सपुरं
सहबांधवं ॥ वाली यथा हतो मेद्य सुग्रीवोपि तथा भवेत् ॥१०॥ इति रुष्टं स
मालोक्य राघवं लक्ष्मणोब्रवीत् ॥ इदानीमेव गत्वाहं सुग्रीवं दुष्टमानसं ॥११॥
ममाज्ञापय हत्वा तमायास्ये राम तेंतिकं ॥ इत्युक्त्वा धनुरादाय खड्गं तू
णीरमेव च ॥१२॥ गंतुमभ्युद्यतं वीक्ष्य रामो लक्ष्मणमब्रवीत् ॥१३॥ न हंत
व्यस्त्वया वत्स सुग्रीवो मे प्रियः सखा ॥ किंतु भीषय सुग्रीवं वालीव त्वं
हनिष्यसे ॥ इत्युक्त्वा शीघ्रमादाय सुग्रीवं प्रतिभाषितं ॥१४॥ आगच्छ
पश्चाद्यत्कार्यं तत्करिष्याम्यसंशयं ॥ तथेति लक्ष्मणो गच्छत्त्वरितो भी
मविक्रमः ॥१५॥ किष्किंधां प्रति कोपेन निर्दहन्निव वानरान् ॥ सर्व
ज्ञोपि स्वलक्ष्मीको विज्ञानात्मापि राघवः ॥१६॥ सीतामनुशुशोचा
र्तः प्राकृतः प्राकृतामिव ॥ बुध्यादिसाक्षिणस्तस्य मायाकार्यातिव
र्तिनः ॥१७॥ रागादिरहितस्याद्यैस्य तत्कार्यं कथमुद्वहेत् ॥ अंसलो
कमतं कर्तुं राज्ञादशरथस्य हि ॥१८॥ तपसः फलदानाय जातो मा
नुषवेराघवः ॥ मायया मोहिताः सर्वे जना आज्ञानसंयुताः ॥१९॥ क
थमेषां भवेन्मोक्ष इति विष्णुर्विचिंतयन् ॥ कथां प्रथयितुं लोके सर्व

(159)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोकमलापहं॥२०॥रामायणाभिधां रामो भूत्वा मानुषचेष्टकृ॥क्रोधं मोहं च का
मं च व्यवहारार्थसिद्धये॥२१॥तत्तत्कालोचितं गृह्णन् मोहयत्यवशाः प्रजाः॥अ
नुरक्त इव दोषेषु गुणेषु गुणवर्जितः॥२२॥विज्ञानसगुणः स्वानंदशक्तिः सश्रीगु
णात्मकः॥अतः कामादिभिर्नित्यमविलिप्तो यथा नभः॥२३॥विदंति मुनयः के
चिज्जपंति सनकादयः॥तद्भक्ता निर्मलात्मानः सम्यक् जानंति नित्यदा॥२४॥
भक्तचित्तानुसारेण जायते भगवानजनः॥लक्ष्मणोऽपि तदा गत्वा किष्किंधा
नगरांतिकं॥२५॥ज्याघोषमकरोत्तीव्रं भीषयन्सर्ववानरान्॥तं दृष्ट्वा प्राकृतास्त
त्र वानरा वप्रमूर्धनि॥२६॥चक्रुः किलकिलाशब्दं धृतपाषाणपादपाः॥ता
न्दृष्ट्वा क्रोधताम्राक्षो वानरान्लक्ष्मणस्तदा॥२७॥निर्मूलान्कर्तुमुद्युक्तो ध
नुरादाय वीर्यवान्॥ततः शीघ्रं समागत्य ज्ञात्वा लक्ष्मणमागतं॥२८॥निवा
र्य वानरान्सर्वान्नंगदो मंत्रिसत्तमः॥उवाच गच्छ वत्स त्वं पितृव्याय निवे
दय॥३०॥मामागतं राघवेण चोदितं रुद्धमूर्तिना॥तथेति त्वरितं गत्वा सु
ग्रीवाय निवेदयत्॥३१॥लक्ष्मणः क्रोधताम्राक्षः पुरद्वारि बहिःस्थितः॥
तच्छ्रुत्वातीव संत्रस्तः सुग्रीवो वानरेश्वरः॥३२॥आहूय मंत्रिणं श्रेष्ठं हनु
॥८२ मंतमथाब्रवीत्॥गच्छ त्वं मंगदेनाशु लक्ष्मणं विनयान्वितः॥३३॥सां

160

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वयनु कोपि संवीरं शनैरानय मंदिरं ॥ प्रेषय त्वं हनुमंतं तारामाह कपी
श्वरः ॥ त्वं गच्छ सांत्वयं नीतं लक्ष्मणं मृदुभाषिते ॥ त्वंगत मंतःपुरं नीत्वा प
श्चाद् दर्शय मेनघ ॥ ३५ ॥ अथ वाहितिनि तत्स्तारा मध्यकक्षे प्र समाविशत् ॥ ह
नुमानं गदेनैव सहितो लक्ष्मणांतिकं ॥ ३६ ॥ गत्वा ननाम सिरसा भक्त्या
स्वागतमब्रवीत् ॥ एहि वीर महाभाग भवद्गृहमशंकितं ॥ ३७ ॥ प्रवि
श्य राजदारादीन् दृष्ट्वा सुग्रीवमेव च ॥ यदाज्ञापयसे पश्चात्तत्सर्वं कर
वाणि भो ॥ इत्युक्त्वा लक्ष्मणं भक्त्या करे गृह्य समारुतिः ॥ आनया
मास नगरं मध्ये राजगृहं प्रति ॥ ३९ ॥ पश्यंस्तत्र महासौधान् यूथ
पानां समंततः ॥ जगाम भवनं राज्ञः सुरेंद्रभवनोपमं ॥ ४० ॥ म
ध्यकक्षे तोगेस्तत्र तारा ताराधिपानना ॥ सर्वाभरणसंपन्ना मदर
क्तांतलोचना ॥ ४१ ॥ उवाच लक्ष्मणं नत्वा स्मितपूर्वाभिभाषिणी ॥
एहि देवर भद्रं ते साधुस्त्वं भक्तवत्सल ॥ किमर्थं कोपमाकार्षि
भक्तो भूत्स कपीश्वरः ॥ बहुकालमनाश्वास्यै सदुःखमेवानुभू
तवान् ॥ ४३ ॥ इदानीं बहुदुःखौघाद् बद्धिरभिरक्षितः ॥ भवता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सांद्रात्सुग्रीवः प्राप्तसौख्यो महामतिः॥४४॥ कामासक्तो रघुपतेः सेवार्थिना
गतो हरिः॥ आगमिष्यन्ति हरयो नानादेशगताः प्रभो॥४५॥ प्रेषिता द
श साहस्राः हरयो रघुसत्तम॥ अनेतुं वानरान्दिव्यान्महापर्वतसन्निभा
न्॥४६॥ सुग्रीवः स्वयमागत्य सर्वे वानरयूथपैः॥ विधमिष्यति दैत्यौघा
न्॥ रावणं च हनिष्यति॥४७॥ तथैव सहितो घोषं गता वानरपुंगवः॥ प्रप
न्नयां तर्भीयं तत्र पुत्रदारसुहृद्वृतं॥४८॥ दृष्ट्वा सुग्रीवमभयं दत्वा न्यस
हे वने॥ तारायाः वचनं श्रुत्वा सक्रोधं च लक्ष्मणः॥४९॥ जगामांतःपु
रं यत्र सुग्रीवो वानरेश्वरः॥ रुनमालिंग्य सुग्रीवः पर्यंके पर्यवस्थितः॥५०॥
दृष्ट्वा लक्ष्मणमत्यर्थमुत्पपातातिभीतवत्॥ दृष्ट्वा लक्ष्मणः रुष्टो म
दविह्वलितेक्षणः॥५१॥ सुग्रीवं प्राह दुर्वृत्त विस्मृतोऽसि रघूत्तमं॥ वा
ली येन हतो वीर स बाणोऽद्य प्रतीक्षते॥५२॥ त्वमेव वालिनो मार्गं गमि
ष्यसि मया हतः॥ एवमत्यंतपुरुषं वदंतं लक्ष्मणं तदा॥५३॥ उवाच
हनूमान्वीर कथमेवं प्रभाषसे त्वत्तोऽधिकतरो रामभक्तोऽयं वानरा
धिपः॥५४॥ रामकार्यार्थमनिशं जागर्ति न तु विस्मृतः॥ आगता

॥८७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परितः पश्य वानरान्कोटिशः प्रभो॥५५॥ गमिष्यंतः चिरेणैव सीतायाः परि
मार्गणे॥ साधयिष्यति सुग्रीवो रामकार्यमन्वेषतः॥५६॥ इत्याह नृमतो वा
क्यं सोमित्रिलज्जितो भवत्॥ सुग्रीवोप्यर्घपाद्याद्यैर्लक्ष्मणं समपूजयत्॥५७
आलिंग्य प्राह रामस्य दासोहं तेन रक्षितः॥ रामस्त्वं तेजसा लोकान्क्षणो
ढूँन हनिष्यति॥५८॥ साहायमात्रमेवाहं वानरैः सहितः प्रभो॥ सौमित्रिर
पि सुग्रीवं प्राह किंचिन्मयोदितं॥५९॥ तेह्युपास्य मादाभाग प्रणयाढ्री
षितं मया॥ गच्छामोद्यैव सुग्रीव रामस्त्विष्टेति कानने॥६०॥ एकरूवाति
दुःखार्त्तो जानकीविरहालसः॥ तथेति रथमारुह्य लक्ष्मणेन समन्वि
तः॥६१॥ वानरैः सहितो राजा राममेवान्वपद्यत॥६२॥ भेरीमृदंगैर्ब
हुरुक्षवानरैः श्वेतातपत्रव्यजनैः शोभितः॥ नीलांगदाद्यैर्हनूम
त्प्रधानैः समावृतो राघवमन्वगाद्धरिः॥६३॥ इतिश्रीमद०उमा०कि
ष्किंधाकांडे पंचमः सर्गः॥५॥ श्री॥ दृष्ट्वा रामं समासीनं गुहाद्वारि
शिलातले॥ चैलाजिनधरं श्यामं जटामौलिविराजितं॥१॥ विशा
लनयनं शांतं स्मितचारुमुखांबुजं सीताविरहसंतप्तं पश्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तंमृगपक्षिणः॥२॥सराघवात्समुत्सत्यवेगात्सुग्रीवलक्ष्मणौ रामस्यपादयो
रग्रेपेततुर्भक्तिसंयुतौ॥३॥रामःसुग्रीवमालिंग्यपृष्ट्वानामयमंतिकं।
स्थापयित्वायथान्यायंपूजयामासधर्मवित्॥४॥ततोब्रवीद्रघुश्रेष्ठं
सुग्रीवोभक्तिनम्रधीः॥तेपश्यतःसमायांतिवानराणांमहाचमूः॥५॥
कुलाचलाद्रिसंभूतामेरुमंदरसंन्निभाः॥नानाद्वीपसरिच्छैलवा
सिनःपर्वतोपमाः॥६॥गजायुतबलाःकेचित्केचिदन्येमितबलाःप्रमा:
असंख्याताःसमायांतिहरयःकामरूपिणः॥७॥सर्वेदेवांशसंभू
ताःसर्वयुद्धविशारदाः॥अत्रकेचिद्गजबलाःकेचिद्दशगजोपमाः
केचिदंजनकूटाभाःकेचित्कनकसंन्निभाः॥केचिद्रक्तांतव
दनाःदीर्घवालास्तथापरे॥९॥शुद्धस्फटिकसंकाशाः॥केचि
द्राक्षससंन्निभाः॥गर्जितापरियांतिवानरायुद्धकांक्षिणः॥१०॥
हृदाशाकारिणाःसर्वेफलमूलाशनाःप्रभो॥ऋक्षाणामधिपो
वीरोजांबवान्नामबुद्धिमान्॥११॥एषमेमंत्रिणांश्रेष्ठःकोटि
भल्लूकवंदरैः॥हनुमान्नेषविख्यातोमहासत्वपराक्रमः॥१२॥

165

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वायुपुत्रोत्तितेजस्वी मंत्री बुद्धीमतांवरः॥ नलोनिलश्चगवयो गवाक्षोगं
धमादनः॥ शरभोमैंदवश्चैव जगायनसएवच॥ बलीमुख्यादधिमुखो
सुषेणस्तारएवच॥१४॥ केसरीचमाहासत्वःपिताहनुमतोबली॥ एतेमेयूथ
पाःप्राधान्येनमयोदिताः॥१५॥ माहात्मानोमाहावीर्याःशक्रतुल्यपराक्र
माः॥ एतेप्रत्येकतःकोटिकोटिवानरयूथपाः॥१६॥ तवाज्ञाकारिणःसर्वे
सर्वेदिवौकसंभवाः॥ एवंवालिसुतःश्रीमानंगदोनामविश्रुतः॥१७॥
वालितुल्यबलोवीरोराक्षसानांकुलांतकः॥ एतेचान्येचबहवः त्वदर्थे
त्यक्तजीविताः॥१८॥ योद्धारःपर्वताग्रैश्चनिपुणाःशत्रुघातनाः॥ अमा
पयरघुश्रेष्ठ सर्वेतिवशवर्त्तिनः॥१९॥ रामःसुग्रीवमालिंग्यहर्षपूर्णाश्रु
लोचनः॥ प्राहसुग्रीवजानासिसर्वंवैकार्यगौरवं॥२०॥ मार्गणार्थंहि
जानक्यानियुंक्ष्वयदिरोचते श्रुत्वारामस्यवचनंसुग्रीवप्रितमानसः॥ २१५
प्रेषयामासबलिनोवानरान्वानरर्षभः॥ दिक्षुसर्वासुविविधावान
रान्प्रेष्यसहरं॥२२॥ दक्षिणांदिशमत्यर्थंप्रयत्नेनमाहाबलान्॥ युव
राजंजांबुवंतंहनुमंतंमाहाबलं॥२३॥ नलंसुषेणंशरभंमैंद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विवदमेव च॥ प्रेषयामास सुग्रीवो वानरानित्थमब्रवीत्॥२४॥ विचिन्वंतु प्रय
त्नेन भवंतो जानकीं शुभां॥ मासादर्वाग्विनिवर्त्तध्वं मच्छासनपुरस्सराः॥२५॥ तीत्वा
मदृष्ट्वा यदि वा मासादूर्ध्वं दिनं भवेत्॥ तदा प्राणांतकं दंडो मत्तः प्राप्स्यथ वा
नराः॥२६॥ इति प्रस्थाप्य सुग्रीवो वानरान्भीमविक्रमान्॥ रामस्य पार्श्वे श्री
रामं नत्वा चोपविवेश सः॥२७॥ गच्छंतं मारुतिं दृष्ट्वा रामो वचनमब्रवीत्॥ अ
भिज्ञानार्थमेतन्मे ह्यंगुलीयकमुत्तमं॥२८॥ मन्नामाक्षरसंयुक्तं सीतायै
दीयतां हरे॥ अस्मिन्कार्ये प्रमाणं हि त्वमेव कपिसत्तम॥२९॥ जानामि सत्वं
ते सर्वं गच्छ पंथाः शुभास्तव॥ एवं कपीनां राज्ञा ते विसृष्टाः परिमार्गणे॥३०॥
सीताया अंगदमुखा बभ्रमुस्तत्र तत्र ह॥ भ्रमंतो विंध्यगहने ददृशुः पर्व
तोपमं॥३१॥ राक्षसं भीषणाकारं भक्षयंतं मृगान्गजान्॥ रावणोयमि
ति ज्ञात्वा केचिद्वानरपुंगवैः॥३२॥ जघ्नुः किलकिलाशब्दं मुंचंतो मु
ष्टिभिः क्षणात्॥ नायं न रावण इत्युक्त्वा ययुरन्यन्महद्वनं॥३३॥ तृषार्त्ता
स्सलिलं तत्र नाविंदन् हरिपुंगवाः॥ विभ्रमंतो महारण्ये शुष्ककंदो

॥८५

166

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्टतालुकः॥३४॥ददृशुर्गह्वरं तत्र नतगुल्मावृतं महत्॥ आर्द्रपक्षान्क्रौंच
हंसान्निःसृतान्ददृशुस्ततः॥३५॥अत्रास्तिसलिलं नूनंप्रविशामो मा
हानुहां गरूत्सुकाहनुमानग्रे प्रविशंतं तमन्वयुः॥३६॥सर्वे परस्परं धृत्वा
बाहून्बाहुभिरुत्सुकाः॥अंधकारेमाहादूरं गत्वापश्यत् कपीश्वराः॥३७
जलाशयान्मणिनिभं तोयान् कल्पद्रुमोपमान्॥ वृक्षान्पक्वफलाढ्यान्मधु
मधुद्रोणसमन्वितान्॥३८॥दिव्यभक्ष्यान्नसहितान्मानुषैपरिवर्जिता
न्॥विस्मितास्तत्रभवने दिव्ये कनकविष्टरे॥३९॥प्रभयादिव्यमानां
ते ददृशुस्त्रियमेयमेकलां॥ध्यायंतीचीरवसनांयोगिनीयोगमास्थि
तां॥४०॥प्रणेमुस्तां माहाभागां भक्त्याभीत्याश्च वानराः॥दृष्ट्वातानूवा
नरान् देवीप्राह यूयं किमागताः॥४१॥कुतोवाकस्यवादूतामस्थानं वा
किं प्रधर्षथ॥ तच्छ्रुत्वाह हनुमानाह शृणु वक्ष्यामि देवीते॥४२॥अयोध्या
धिपतिः श्रीमान्राजादशरथप्रभुः॥तस्यपुत्रोमाहाभागोजेष्टोराम
इतिश्रुतः॥४३॥पितुराज्ञां परस्कृत्य सभार्यः सानुजोवनं॥गतस्तत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥८६॥

हृता भार्या तस्य साध्वी दुरात्मना॥४४॥ रावणेणेन ततो रामः सुग्रीवं सानुजं ययौ॥
सुग्रीवो मित्रभावेन रामस्य प्रियवल्लभः॥४५॥ मृगयध्वमिति प्राह ततो वयमु-
पागताः॥ ततो वनं विचिन्वंतो जानकीं जलकांक्षिणः॥४६॥ प्रविष्टा गह्वरं
घोरं दैवाद्वयं समागताः॥ त्वं वा किमर्थमत्रासि का वा त्वं वद नः शुभे॥४७॥ यो-
गिनी च तथा दृष्ट्वा वानरानाह हृष्टधीः॥ यथेष्टं फलमूलानि जग्धा पी-
त्वामृतं पयः॥४८॥ आगच्छत ततोऽवश्यं मम वृत्तांतमादितः॥ तथेति भुक्त्वा पी-
त्वा च हृष्टास्ते सर्ववानराः॥४९॥ दिव्यासमीपं गत्वा ते बद्धांजलिपुटास्थिताः॥
ततः प्राह हनूमंतं योगिनी दिव्यदर्शना॥५०॥ हेमनामाप्सरा दिव्यरूपिणी वि-
श्वकर्मणः॥ पुत्री महेशं नृत्येन तोषयामास भामिनी॥५१॥ तुष्टोऽस्यै महेशः प्र-
ददाविदं दिव्यं पुरं महत्॥ अत्र स्थितायाह्यभवन् हर्षाणामयुतायुतं॥५२॥
तस्याहं सखी विष्णुतत्परा मोक्षकांक्षिणी नाम्ना स्वयंप्रभा दिव्या गंधर्वतन-
या पुरा॥५३॥ गच्छंती विष्णुलोकं सा ममाह त्वं तपश्चरन्॥ अत्रैव निवसंतीहं
सर्वप्राणिविवर्जिते॥५४॥ त्रेतायुगे दाशरथिर्भूत्वा नारायणोऽव्ययः॥ भूभा-
रहरणार्थाय विचरिष्यति कानने॥५५॥ मार्गंतो वानरास्तस्य भार्यामायांति ते
गुहां॥ पूजयित्वाथ तान्नत्वा रामं स्मृत्वा सा प्रययौ ततः॥५६॥ यातासि भवनं विद्मा

८६॥

168

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योगम्यं सनातनं॥ तुष्टोहं गंतुमिच्छामि रामे दृष्टुं त्वरान्विता॥५७॥ यूयमपि द्रष्टुं मक्षा
णि गमिष्यथ बहिर्गुहां॥ तथैव चक्रुस्ते वेगं गताः पूर्वस्थितं वनं॥५८॥ सापि सद्या गुहां
शीघ्रं ययौ राघवसंन्निधिं॥ तत्र राघवसुग्रीवं लक्ष्मणं च ददर्श ह॥५९॥ दृष्ट्वा सा प्रद
क्षिणं रामं प्रणाम्य बहुशः सुधीः॥ आह गद्गदया वाचा रोमांचिततनूरुहा॥६०॥ दासी
त्वाहं राजेंद्र दर्शनार्थमिहागता॥ बहुवर्षसहस्राणि तप्तं मे दुष्करं तपः॥६१॥ रया
गुहायां दर्शनार्थं मे फलितं मेऽद्य ते तपः॥ अद्य ध्रुवं हि त्वां नमस्यामि मायायाः परतः
स्थितं॥६२॥ सर्वभूतेषु चालक्ष्यं बहिरंतरवस्थितं॥ योगमायाजवनिकाछन्नो मा
नुषविग्रहः॥६३॥ न लक्ष्यसे ज्ञानदृशां शैलूष इव वेषधृक्॥ महाभागवतानां हि
भक्तियोगविधित्सया॥६४॥ अवतीर्णोसि भगवन्कथं जीवमबुध्यसे॥ लोकेज्ञाना
लुपः कश्चिन्न वेत्ति त्वं रघूत्तम॥६५॥ ममैतदेव रूपं ते सदा भासि हृदालये॥ रामेणा
पादयुगुलं दर्शितं मोक्षदर्शनं॥६६॥ अदर्शनं भववाणीनां मन्मार्गपरिदर्शनं
धनपुत्रकलत्रादिविभुतिपरिदर्पिताः॥६७॥ अकिंचनधनं साधु नाम्भित
पुं जनोति॥ निवृत्तगुणमार्गाय निष्किंचनधनायते॥६८॥ नमोस्त्वात्मारामा
य निर्गुणाय गुणात्मने॥ कालरूपिणमीशानमादिमध्यान्तवर्जितं॥६९॥
समं चरंतं सर्वत्र मन्ये त्वां पुरुषं परं॥ देव ते चेष्टितं कश्चिन्न वेद नरविडंब
नं॥७०॥

नेतस्मिन् कश्चिद्दृश्यते दैत्यो वा परए वच॥ तन्मायापिहितात्मानं त्वां प्रपश्यंति यथावि ॥८७
धं॥७१॥ अजस्याकर्तुरीशस्य देवतीर्यङ्नरादिषु जन्मकर्मादिकं यद्यत्तदयंतविडंब
नं॥७२॥ वामाङ्कुरस्थरं जातं कथास्रव पासिद्धये॥ केचित्कौशल्यराजस्य तपसः
फलसिद्धये॥७३॥ कौशल्यप्रार्थमानेन जात मादुः परेजनाः॥ दुष्टराक्षसभू
भारहरणायार्थितो विभुः॥७४॥ ब्रह्मणा नररूपेण जातोस्मिन् पृथ्वीतले॥ परस्य
तितव पादाब्जं भवार्णव सुतारणं॥७५॥ तन्मायागुणाबद्धाहं व्यतिरिक्तं गुणा
श्रयं कथं त्वां देव जानीयां स्तोतुं वा पवियं विभुं॥७६॥ नमस्यामि रघुश्रेष्ठः प्र
सन्नः प्रणयीहतु॥ उवाच योगिनीं भक्तां किं ते मनसि कांक्षितं॥७७॥ सा प्राह
राघवं भक्त्या भक्तिस्ते भक्तवत्सल॥ यत्र कुत्रापि जातायां निश्चलां देहि मे प्र
भो॥७९॥ तद्भक्तेषु सदा संगो भूयान्मे प्राकृतेषु नैः जीवाम राम रामेति
भक्त्या स्मरतु सर्वदा॥८०॥ नमस्ते राम त्वं रूपं सीतालक्ष्मणसंयुतं॥ धनु
र्बाणधरं पीतवाससं मुकुटोज्वलं॥८१॥ अंगदेनूपुरे मुक्ताहारैः कौस्तु
भकुंडलैः॥ भांतं स्मरतु ते राम वरं नान्यं वृणे प्रभो॥८२॥ श्रीराम उवाच॥
भद्रे त्वं भाग्यभागेगच्छ हे बदरीवनं॥ तत्रैव मां स्मरंती त्वं त्यक्त्वेदं भूतपंच
कं॥८३॥ मामेव परमात्मानमचिरात्प्रतिपद्यसे॥८४॥ श्रुत्वा रघुत्तमव

चोमृतसारकल्पं महानदेवबदरीतरुखंडजुष्टं ॥ तीर्थे तदा रघुपतिं
मनसा स्मरंती त्यक्त्वा कलेवरमवाप परं पदं सा ॥ ८५ ॥ इति श्रीमदध्यात्म
रामा० उमा० किष्किंधाकांडे षष्टः सर्गः ॥ ६ ॥ ६९ ॥ अथ तत्र समासीना वृक्ष
खंडेषु वानराः ॥ चिंतयंतो विमुह्यंतः सीतामार्गणकर्शिताः ॥ १ ॥ तत्रोवाचांगदः कां
श्चिद्वानरान् वानरर्षभः ॥ भ्रमतां गह्वरेस्माकं मासो न्यूनं गतोपि भवेत् ॥ २ ॥ सीता नोद
दृष्टास्माभिर्न कृतं राजशासनं ॥ यदि गच्छामि किष्किंधां सुग्रीवोस्मान्हनिष्यति ॥ ३ ॥
मयि तस्य कुतो प्रीतिरहं रामेण रक्षितः ॥ इदानीं रामकार्यं मे न कृतं तन्मिषं भवेत् ॥ ४ ॥
तस्य मद्धनने नूनं सुग्रीवस्य दुरात्मनः ॥ मातृकल्पां भ्रातृभार्यां पापात्मा न भजत्य
सौ ॥ ५ ॥ न गच्छेयमतः पार्श्वं तस्य वानरपुंगवाः ॥ त्यक्षामि जीवितं चात्र येन केनापि
मृत्युना ॥ ६ ॥ इत्यश्रुनयनं केचिद्दृष्ट्वा वानरपुंगवाः ॥ व्यथिता साश्रुनयना युवराज
मथाब्रुवन् ॥ ७ ॥ किमर्थं तव शोकोत्र वयं ते प्राणरक्षकाः ॥ भवामो निवसामोत्र
गुहायां भयवर्जिताः ॥ ८ ॥ सर्वसौभाग्यसहितं सुरदेवपुरोत्तमं ॥ शनैः परस्परं वा
क्यं वदतां मारुतात्मजः ॥ ९ ॥ श्रुत्वांगदं समालिंग्य प्रोवाच नयकोविदः ॥ विचा
र्यते किमर्थं ते दुर्विचारो न युज्यते ॥ १० ॥ राज्ञस्त्वं न प्रियस्त्वं हि तारापुत्रोतिवल्लभः ॥

१७२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रामस्यलक्ष्मणात्प्रीतिस्त्वयिनित्यंप्रवर्त्तते॥११॥अतोनराघवोहिंसतियुवराज्ञोवि
शेषतः॥अहंतवहितेसक्तोवत्सनान्यंविचारय॥१२॥गुहावासस्त्वनिक्षेप्युरस्य
कंवानरेसैंहैंस्फुटयन्॥तदेतद्रामबाणानामभेद्यंकिंजगत्त्रये॥१३॥येत्वांदुर्बोध
यंतेतेवानराणांनरर्षभाः॥पुत्रदारादिकंत्यक्त्वाकथंस्थास्यंतितेत्वया॥१४॥अ
तिगुह्यतमंवक्ष्येस्थिरहस्यंश्रृणुमेसुत॥रामोनमानुषोदेवःसाक्षान्नाराय
णोव्ययः॥१५॥सीताभवतिमायायाजनसंमोहकारिणीलक्ष्मणोभुवनाधारः
साक्षाच्छेषःफणीश्वरः॥१६॥ब्रह्मणाप्रार्थिताःसर्वेरक्षोगणविनाशने॥मायामा
नुषभावेनजातोलोकैकरक्षकः॥१७॥वयंचपार्षदाःसर्वेविष्णोर्वैकुंठवा
सिनः॥मनुष्यभावमापन्नेस्वेच्छयापरमात्मनि॥१८॥वयंवानररूपेणजाता
स्तस्यैवमायया॥वयंतुतपसापूर्वमाराध्यजगतांपतिं॥१९॥तेनैवानुगृही
तास्मपार्षदत्वमुपागताः॥इदानीमपितस्यैवसेवांकुर्मोविमायया॥२०॥
पुनर्वैकुंठमासाद्यसुखस्थास्यामहेवयं॥इत्यंगदंसमाश्वास्यगताविंद
ध्यमाहाचलं॥२१॥विचिन्वंतोथशनैर्जानकींदक्षिणांबुधेः॥तीरेमहे
न्द्राख्यगिरेःपवित्रेवानरायसुः॥२२॥दृष्ट्वासमुद्रंदुःपारमगाधंभयव
र्द्धनं॥वानराभयसंत्रस्ताःकिंकुर्महइतिवादिनः॥२३॥निषेदुः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उदधेस्तीरे सर्वे चिंतासमन्विताः ॥ मंत्रयामासुरन्योन्यं अंगदाद्या महाबलाः ॥ २४
भ्रमता मे वने मासो गतो नैव गुहांतरे ॥ न दृष्टो रावणो वापि सीता वा जनकात्म
जा ॥ २५ ॥ सुग्रीवस्तीक्ष्णदंडोऽस्मान्निहन्त्येव न संशयः ॥ सुग्रीववधतोऽस्माकं श्रे
यः प्रायोपवेशनं ॥ २६ ॥ इति निश्चित्य तत्रैव दर्भानास्तीर्य सर्वतः ॥ उपविवे
शुस्ते सर्वे मरणे कृतनिश्चयाः ॥ २७ ॥ एतस्मिन्नंतरे तत्र महेंद्राद्रिगुहांतरात् ॥
निर्गत्य शनकैर्गत्वा गृध्रः पर्वतसंन्निभः ॥ २८ ॥ दृष्ट्वा प्रायोपवेशाय नेस्थितान्
वानरपुंगवान् ॥ उवाच शनकैर्गृध्रः प्राप्तो भक्ष्योद्य मे बहु ॥ २९ ॥ एकैकशः
क्रमान् सर्वान् भक्षयामि दिने दिने ॥ श्रुत्वा तद्गृध्रवचनं वानरा भीतमान
साः ॥ ३० ॥ भक्षयिष्यति नः सर्वान् असौ गृध्रो न संशयः ॥ रामकार्यं च नास्मा
भिः कृतं किंचिद्धरीश्वराः ॥ ३१ ॥ सुग्रीवस्यापि च हितं न कृतं स्वात्मनामपि ॥
वृथानेन वधं प्राप्ता गच्छामो यमालयं ॥ ३२ ॥ अहो जटायुर्धर्मात्मा रामस्या
र्थे मृतसुधीः ॥ मोक्षं प्राप दुरावापं योगिनामप्यरिंदम ॥ ३३ ॥ संपातिस्तु तदा
वाक्यं श्रुत्वा वानरभाषितं ॥ के वा यं मम भ्रातुः कर्णपीयूषसंनिभं ॥ ३४ ॥
जटायुरिति मां ह्यत्र आहारं तपरस्परं ॥ उच्यतां वो भयं माभून्नानः प्लवगस
त्तमाः ॥ ३५ ॥ तमुवाचांगदः श्रीमानुत्थितो गृध्रसंन्निधौ ॥ रामो

173

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दाशरथिः श्रीमान् लक्ष्मणेन समन्वितः ॥३८॥ सीतया भार्यया सार्द्धं विचचार व
नांतरे ॥ तस्य सीता हृता साध्वी रावणेन दुरात्मना ॥३९॥ मृगयां निर्गते रामे
लक्ष्मणे च हृता बलात् ॥ हा राम रामेति क्रोशंतीं श्रुत्वा गृध्रः प्रतापवान् ॥ ज
टायुर्नाम पक्षींद्रो युद्धं कृत्वा सुदारुणं ॥ रावणेन हतो वीरो राघवार्थे महा
बलः ॥४०॥ रामेण दग्धो रामस्य सायुज्यमगमत्क्षणात् ॥ रामः सुग्री
वनामासाद्य स सख्यं कृत्वाग्निसाक्षिकं ॥४१॥ सुग्रीवचोदितो हत्वा वा
लिनं च दुरासदं ॥ राज्यं ददौ वानराणां सुग्रीवाय महाबलः ॥४२॥ मासाद
र्वान्निवर्तध्वं नो चेत्प्राणान्हरामि वः ॥ इत्याज्ञया भ्रमंतोस्मिन्वने ग
ह्वरमध्यगाः ॥४३॥ गतो मासो न जानीमः सीतावार्तां च वै लवं ॥ मर्तुं
प्रायोपविष्टान्स्तीरे लवणवारिधेः ॥४३॥ यदि जानासि हे पक्षिन्सी
तां कथय नः स्फुटं ॥ अंगदस्य वचः श्रुत्वा संपातिः हृष्टमानसः ॥४४॥
उवाच मम प्रियो भ्राता जटायुः प्लवगेश्वराः ॥ बहुवर्षसहस्रांते भ्रातु
र्वीक्षितो मया ॥४५॥ तव साहाय्यं करिष्येहं भवतां प्लवगेश्वराः ॥
भ्रातुः सलिलदानाय नयध्वं मां जलांतिके ॥४६॥ पश्चात्सर्वेभ्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं वक्ष्ये ऽप्मतां कार्यसिद्धये नयेति निस्युस्तेतीरं मुंसेद्रस्य विहंगमाः॥४७॥
सोपितसलिलेस्नात्वा भ्रातुर्दत्वाजलांजलिं॥पुनः स्वस्थानमासाद्य स्थी
तोनीतोहरीश्वरैः॥४८॥संपातिः कथयामास वानरान्परिहर्षयन्॥ लंका
नामनगर्यास्ति चित्रकूटगिरिमूर्द्धनि॥४९॥तत्राशोकवने सीता राक्षी
भिः सुरक्षिता॥समुद्रमध्ये सा लंका शतयोजनदूरतः॥५०॥दृश्य
ते मेन संदेहः सीता च परिदृश्यते गृध्रत्वादुरदृष्टिर्मे नात्र संशयतुं क्षमाः॥५१॥
शतयोजनविस्तीर्णं समुद्रं यस्तु लंघयेत्॥ स एव जानकीं दृष्ट्वा रायास्य पुन
तिष्ठकं॥५२॥अहमेव दुरात्मानं रावणं हंतुमुत्सहे॥भ्रातुरहं तारमेका
कीं किंतु पक्षविवर्जितः॥५३॥यत्नध्वमतियत्नेन लंघितुं सरितांपतिं॥
ततोहं तारघुश्रेष्ठो रावणं राक्षसाधिपं॥५४॥उल्लंघ्यसिंधुं शतयोजना
यतं लंकां प्रविश्याथ विदेहकन्यां॥दृष्ट्वा समाभाष्य च वारिधिं पुनस्त
र्तुं समर्थः कतमो विचार्यतां॥५५॥श्री॥इति श्री॰उ॰किष्किं॰सप्तमसर्गः॥७॥
संपातिः कथयामास वृत्तांतं पुरा कृतं॥अहं पुरा जटायुश्च भ्रातरौ
रूढयौवनौ॥१॥बलेन दर्पितावावां बलिजिज्ञासया पमौ॥ सूर्यमं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१२०

उत्पर्यंतं गंतुं मुसक्तितौ मदात्तौ बहुयोजनसाहस्रं गतौ तत्र प्रतापितः ॥२॥
जटायुस्तं परित्रातुं पक्षाभ्यामाछाद्य मोहितः ॥३॥ स्थितोहं रश्मिभिर्दग्धपक्षो
स्मिन्विंध्यमूर्द्धनि ॥ पतितो दूरपतनान्मूर्छितोहं कपीश्वराः ॥४॥ दिनत्रया
त्पुनः प्राणसहितो दग्धपक्षकः ॥ देशं वा गिरिकुटान्वा न जाने भ्रांतमान
सः ॥५॥ चंद्रनामा तत्र ऋषिस्तत्र शनैरागमितो वदन् ॥ संपाते किमिदं तेद्य वि
रूपं केन वा कृतं ॥६॥ जानामि त्वामहं पूर्वमत्यंतं बलवानसि ॥ दग्धौ कि
मर्थं ते पक्षौ कथ्यतां यदि मन्यसे ॥७॥ ततोहमब्रवं छिन्नं सर्वं कथयन्साति
दुःखितः ॥ अब्रवं मुनिराङ्दुःखदेहं दावववन्हिना ॥ ॥ कथं धारयितुं
शक्तो विपक्षो जीवितुं प्रभो ॥८॥ इत्युक्तोथ मुनिर्वीक्ष्य मां दयार्द्रविलो
चनः ॥ शृणु वत्स सखे वचो मेद्य श्रुत्वा कुरु यथेप्सितं ॥९॥ देहमू
लमिदं दुःखं देहः कर्मसमुद्भवः ॥ कर्म प्रवर्तते देहे हं बुध्या पुरुषस्य
हि ॥१०॥ अहंकारस्त्वनादिः स्यादविद्यासंभवो जडः ॥ चिच्छायया
सदा युक्तस्तप्तायःपिंडवत्सदा ॥११॥ तेन देहस्य तादात्म्याद्देह

१.२०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्चेतनवान् भवेत्॥ देहोहमिति बुद्धिस्यादात्मनेहं कृतैर्बलात्॥१२॥ तन्नकृतए
व संसारः सुखदुःखादिसाधकः॥ आत्मनो निर्विकारस्य मिथ्यादौ नोस्मनः
सदा॥१३॥ हं देहोहं कर्मकर्त्ताहमिति संकल्पसर्वदा॥ जीवःकरोति कर्माणि
तत्फलैर्बध्यते वशः॥१४॥ ऊर्ध्वो हिंसाक्रमते नित्यं पापपुण्यात्मकः स्वयं॥ कृते
मयाधिकं पुण्यं यज्ञदानादिनिर्मितं॥१५॥ स्वर्गं गत्वा सुखं भोक्ष्ये इति सं
कल्पवान् भवेत्॥ तथैवाध्यासतस्तत्र चिरं भुक्त्वा सुखं महत्॥१६॥ क्षीणपु
ण्यः पतत्सर्वाक् अनिच्छन् कर्मचोदितः॥ पतित्वा मंडले देहस्ततो नीहारसंयुतः॥१७॥
पतितो भूत्वा पुनस्तेनान्नेतोस्त्रीयोनिसंचितः॥ योनिरक्तेन संयुक्तं जरायुपरिवे
ष्टितं॥१९॥ x भूमो पतित्वा व्रीह्यादौ तत्र स्थित्वा चिरं पुनः॥ भूत्वा चतुर्विधं भो
ज्यं पुरुषैर्भुज्यते ततः॥१८॥ x दिनेनैकेन कललं भूत्वारूढं समाप्नुयात्॥ ततस्तु
नः पंचरात्रेण बुद्बुदाकारतामियात्॥२०॥ पक्षमात्रेण सा पेशी रुधिरेण प
रिप्लुता॥ तस्य एवांकुरोत्पत्तिः पंचविंशतिरात्रिषु॥२१॥ ग्रीवा शिरः स्कंधपृष्ठः
वंशानाभिस्तथोदरं॥ पंचधांगानि चैवेवं जायंते मासतः क्रमात्॥२२॥
पाणिपादौ तथा पार्श्वौ कटिजानु तथैव च॥ मासद्वयात्प्रजायंते क्रमे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऽो वचनान्यथा॥२३॥ त्रिभिर्मासैः प्रजायंते॥ अंगानां संधयः क्रमात्॥ स
र्वांगुल्यः प्रजायंते क्रमान्मासचतुष्टये॥२४॥ नासाकर्णौ च नेत्रे च जायं
ते पंचमासतः॥ दंतपंक्तिर्नखा गुह्यं पंचमे जायते तथा॥२५॥ सर्वेंष
ण्मासतश्छिद्रं कर्णयोर्भवति स्फुटं॥ पायुमेढ्रमुपस्थं च नाभिश्चापि भ
वेन्नृणां॥२६॥ सप्तमे मासि रोमाणि शिरः केशास्तथैव च॥ विभक्तावय
वत्वं च सर्वं संपाद्यतेऽष्टमे॥२७॥ जठरे वर्द्धते गर्भः स्त्रिय एवं विहंगमाः॥
पंचमे मासि चैतन्यं जीवः प्राप्नोति सर्वशः॥२८॥ नाभिसूत्रात्थुरंध्रेण
मातृभुक्तान्नपानतः॥ वर्द्धते गर्भगः पिंडो न म्रियेत स्वकर्मतः॥२९॥ स्मरन्
सर्वाणि जन्मानि पूर्वकर्माणि यानि च॥ जठरानलतप्तोऽहं यमितिदं वचन
मब्रवीत्॥३०॥ नानायोनिसहस्रेषु जायमानोऽनुभूतवान्॥ पुत्रदारादिसं
स्रो॰ बंधः कोटिशः पशुबांधवान्॥३१॥ कुटुंबभरणासक्तो न्यायान्यायैर्धना
र्जनं॥ कृतं नाकरवं पुत्रे कर्म यथा स्वप्नेऽपि दुर्लभः॥३२॥ इदानीं तत्फलं
भुंजे गर्भदुःखं महत्तरं॥ अशाश्वतोऽयं च देहस्तृष्णारागसमन्वितः॥३३॥
आरंभानेव कृतवान्न कृतं हितमात्मनः॥ इत्येवं बहुधा दुःखमनु
भूय स्वकर्मतः॥३४॥ कदा निष्क्रमणं मे स्यात् गर्भान्निरयसंभवात्॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रन ऊर्ध्वं नित्यमहं विष्णुमेवानुपूजयेत्॥३५॥ग्रियस्यादिचिंतयेज्जीवो यो
नियंत्रप्रपीडितं॥जायमानोग्निदुःखेन नेकासातकी यथा॥३६॥पूतिव्रणा
निःपतितं क्रमिरेषखापरः॥ततो बाल्यादिदुखाणि सर्वमेवं विभुज्यते॥३७॥
ह॰यान्येवानुभूतानि सर्वत्र विदितानि च॥नश्यमे वर्णितानि मे ग८ प्रयो
वनादिषु सर्वतः॥३८॥एवं देहोहमित्यस्माद्भ्यासान्निरयादिकं॥गर्भ
वासादिदुखानि भवंत्यभिनिवेशितः॥३९॥तस्माद्देहद्वयादन्यमात्मा
नं प्रकृतेः परं॥ज्ञात्वा देहादिममतां त्यक्त्वात्मज्ञानवान्भवेत्॥४०॥जा
ग्रदादिविनिर्मुक्तं सत्यज्ञानादिलक्षणं॥शुद्धबोधं सदा शांतमात्मानम
वधारयेत्॥४१॥चिदात्मनि परिज्ञाते नष्टे मोहेग्निसंभवे॥देहःपत
तिचारब्धकर्मवेगेन तिष्ठतु॥४२॥योगिनो नहि दुखं वा सुखं वाज्ञान
संभवं॥तस्माद्देहेन सहितो यावत्प्रारब्धसंक्षयः॥४३॥तावत्तिष्ठ सुखे
न त्वं धृतकंचुकसर्पवत्॥अन्यद्वक्ष्यामि ते पक्षिन् शृणु मे परमं हितं॥४४॥
त्रेतायुगे दाशरथिर्भूत्वा नारायणोव्ययः॥रावणस्य वधार्थाय दंडको
नागमिष्यति॥४५॥रावणस्यं श्चारवन्निर्वो लंकायां स्थापयिष्यति॥न
स्याः सुग्रीवन्निर्दिष्टा वानराः परिमार्गिता॥४६॥सीतयाप्यार्थयासा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सार्धं लक्ष्मणेन समन्वितः॥ तत्राश्रमे जनकजां प्राप्स्यां रहितवने॥४६
अगमिष्यंति जलधेस्तीरं तत्र समागमः॥ तया तैः कारवशाद्भविष्यति न सं
शयः॥४८॥ तदा सीतास्थितिं तेन्मः कथयस्व यथार्थतः॥ नु देवलव पक्षोद्भू
तस्स्से ते पुनर्नवौ॥४९॥ संपातिरुवाच॥ बोधयामास मां चंद्रनामा मुनिकु
लेश्वरः॥ पत्रयं तु पक्षौ मे जातौ तोनु तनावतिकोमलौ॥५०॥ स्वस्ति वोस्तु गं
मिष्यामि सीतां द्रक्ष्यामि निश्चयं॥ यत्नं कुरुध्वं दुर्लंघ्यस समुद्रस्य विलंघ
ने॥५१॥ यन्नाम स्मृतिमात्रतः परिमितं संसारवारान्निधिं लीलया गच्छ
ति दुर्जनोपि परमं विष्णोः पदं शाश्वतं॥ तस्यैव स्थितिकारणात्त्रिजगतां
राज्ञस्य भक्ताः प्रियाः यूयं किंन्तु समुद्रमात्रतरणे शक्ताः कथं वानराः॥
॥५२॥ इति श्री० उमा० किष्किंधा० अष्टमसर्गः॥८॥ ॥गते विहायसा गरु
ध्मराजे वानरपुंगवाः॥ हर्षेण महताविष्टाः सीतादर्शनलालसाः॥१॥
उचुः समुद्रं पश्यंतो नक्रचक्रभयंकरं॥ तरंगादिभिरुन्नद्धमाकाशमिव दु
र्गमं॥२॥ परस्परमवोचन्वै कथमेतत्तरामहे॥ उवाच चांगदस्तत्र शृणुध्वं
॥८२ नरोत्तमाः॥३॥ भवंतो मत्समं न बलिनो ख्याताश्च बलविक्रमाः॥ कां वैतं
वारिधिं तीर्त्वा राजकार्यं करिष्यति॥४॥ एतेषां वानराणां स प्रायादानां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वानरांच सर्वेषां रामः
न संशयः॥ आज्ञो तिष्ठतु मेत्री धर्मं पुरतो यो महाबलः॥५॥ दृष्टार्थ स्कन्धे युव
सुग्रीवयोरपि। स एव पालको ऽस्मत्यान्नात्र कार्या विचारणा॥६॥ परस्परं विलोकिनः॥७
युवराजेन तु हृष्टा वानरसैनिका॥ असन्तो दुःखं किंचिदपि परस्परं विलोकिनः
अंगद उवाच॥ उच्यतां वो बलं सर्वं प्रत्येकं कार्यसिद्धये। केन वा साध्यते
कार्यं जानीमः स्तदनंतरं॥८॥ अंगदस्य वचः श्रुत्वा प्रोचुर्वीर बलं पृथक्॥
योजनानां दशारभ्य दशोत्तरगुणं जगुः॥९॥ शतादर्वाक् जांबवांस्तु
प्राह मध्ये वनौकसां। पुरा त्रिविक्रमे देवे पादभ्रमानलक्षणे॥१०॥ त्रिः
सप्तकृत्वाहमगां प्रदक्षिणविधौ ततः॥ इदानीं वार्धकग्लानः शक्तो मि
विलंघितुं॥११॥ अंगदो प्याह मे गंतु शक्यं पारं पयोदधेः॥ पुनर्लंघन सा
मर्थ्यं न जानाम्यति वानराः॥१२॥ तमाह जांबवान्वीर त्वं राजाज्ञा नियाम
कः॥ त्वया त्वं नियुक्तं मे त्वं समर्थो ऽसि यद्यपि॥१३॥ अंगद उवाच॥
एवं चेत्पुनरत्राने स्वप्ना नो दर्भविष्टरे। केनापि न कृतं कार्यं जीवितुं के
न शक्यते॥१४॥ तमाह जांबवान्वीर दर्शयिष्यामि ते सति॥ येनास्माकं
कार्यसिद्धिर्भविष्यत्यचिरेण ते॥१५॥ इत्युक्त्वा जांबवान्प्राह हनूमं त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मवस्थितं॥हनूमन्किंकरस्य हिंनिस्थियते कार्यगौरवे॥१६॥प्राप्तेस्मिन्स्वसाम
र्थ्यंदर्शयाद्य माहाबलं त्वं साक्षाद्वायुतनयो वायुतुल्यपराक्रमः॥१७॥राम
कार्यार्थमेव त्वं जनितोसि महात्मना॥जातमात्रेण ते पूर्वं दृष्टोयं तं विभावसुं॥१८॥
पक्वंफलं जिघृक्षीमीत्स्फुलं बालचेष्टया योजनानां पंचशतं पतितोसि
ततो भुवि॥१९॥अतस्त्वद्बलमाहात्म्यं को वा शक्नोति वर्णितुं॥उत्तिष्ठ कुरु
रामस्य कार्यं नः पाहि सुव्रत॥२०॥श्रुत्वा जांबवतो वाक्यं हनुमानतिह
र्षतः॥चकार नादं सिंहस्य ब्रह्मांडं स्फोटयन्निव॥२१॥बभूव पर्वताकारस्त्रि
विक्रम इवापरः॥लंघइत्वा जलनिधिं सबालं कांच भस्मसात्॥२२॥
रावणं सकुलं हत्वा नेष्ये जनकनंदिनीं॥यद्वा बध्वा गले राजा रावणं
वामपाणिना॥२३॥लंकां सपर्वतां धृत्वा रामस्याग्रे क्षिपाम्यहं॥यद्वा
दृष्ट्वैव यास्यामि जानकीं शुभलक्षणां॥२४॥श्रुत्वा हनूमतो वाक्यं जा
म्बवान्निदमब्रवीत्॥दृष्ट्वैवागच्छ त्वं तं जीवंतीं जानकीं शुभां॥२५॥प
श्चाद्रामेण सहितो दर्शयिष्याम पौरुषं॥कल्याणं भवतां भद्र गच्छतस्त्व वि
हायसा॥२६॥गच्छंतं रामकार्यार्थं वायुस्त्वामनुगच्छतु॥इत्याशीर्भिस्तमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मंत्रविसृष्टः प्लवगाधिपेः ॥२७॥ महेंद्राद्रिशिरो गत्वा बभूवाद्भुतदर्शनः ॥
महानगेंद्रप्रतिमो महात्मा सुवर्णवर्णोरुणचारुकुंडलः ॥ महाफणींद्रा
भसुदीर्घबाहुर्वातात्मजो दृश्यत सर्वभूतैः ॥२८॥ इति श्री अ० किं० नवमः सर्गः ॥९॥
इति किष्किंधाकांडं समाप्तं ॥ श्री ॥ शतयोजनविस्तीर्णं समुद्रं मकरालयं ॥ विलंघ
यिषुरानंदसंदोहो मारुतात्मजः ॥ ध्यात्वा नौ रामं परात्मानं इदं वचनमब्रवी
त् ॥१॥ अमोघं रामनिर्मुक्तं महाबाणं इवाखिलाः ॥ गच्छेनार्थेहं लंनार्थेहं पु
नः पश्यामि राघवं ॥ प्राणप्रयाणसमये यस्य नाम सकृत्स्मरन् ॥४॥ नरस्ती
र्त्वा भवांभोधिमपारं यांति तत्पदं ॥ किं पुनस्तस्य दूतोहं तदंगांगुलिमुद्रिकाः ॥५
तमेव हृदये ध्यात्वा लंघयाम्यल्पवारिधिं ॥ इत्युक्त्वा हनुमान्बाहू प्रसार्यन
ववालधिः ॥६॥ ऋजुग्रीवोर्ध्वदृष्टिः सन्नाकुंचितपदद्वयः ॥ दक्षिणाभिमु
खस्तूर्णं पुप्लुवेनिलविक्रमः ॥७॥ आकाशे त्वरितं देवैर्वीक्ष्यमाणो जगा
म सः ॥ दृष्ट्वानिलसुतं देवा गच्छंतं वायुवेगतः ॥८॥ परीक्षणार्थं सत्वस्य वा
नरस्येदमब्रुवन् ॥ गच्छत्येष महासत्वो वानरो वायुविक्रमः ॥९॥ न लंकां त्व
प्रविष्टो यानवाजानीमहे बलाबलं ॥ एवं विचार्य नागानां मातरं सुरसाभिदां ॥१०॥

पश्याम्यद्येव रामस्य पत्नीं जनकनंदिनीं ॥३॥ वृ

पश्यंतु वानराः सर्वे गच्छंतं मां विहायसा ॥२॥ वृ

अब्रवीद्देवतावृंदं कौतुहलसमंततः ॥ गच्छ त्वं वानरेंद्रस्य किंचिद्विघ्नं समाचर ॥११॥ ॥८४॥
ज्ञात्वा तस्य बलं बुद्धिं पुनरेहि त्वरान्विता ॥ इत्युक्ता सा ययौ सीघ्रं हनुमद्विघ्नकारणा
त् ॥१२॥ अग्रतस्य मार्गे पुरतः स्थित्वा वानरमब्रवीत् अद्यमेवदने शीघ्रं प्रविशस्व
महामते ॥१३॥ दिवैस्त्वं कल्पितो भक्ष्यः क्षुधासंपीडितात्मनः ॥ तामाह हनुमान्मा
तः अहं रामस्य दासनोत् ॥१४॥ गच्छामि जानकीं द्रष्टुं पुनरागम्य सत्वरः ॥ रामस्य
कुशलं तस्याः कथयित्वा तवाननं ॥१५॥ निर्वेक्ष्ये देहि मे मार्गं सुरसायै नमोस्तु ते ॥
इत्युक्ता पुनरेवाह सुरसा क्षुधितास्म्यहं ॥१६॥ प्रविश्य गच्छ मे वक्त्रं न चेत्वां भ
क्षम्यहं ॥ इत्युक्तो हनुमानाह विदारय मुखं तव ॥१७॥ प्रविश्य वदनं तेद्य गच्छा
ना९ मि त्वरयान्वितः ॥ इत्युक्त्वा योजनायामदेहो भूत्वा पुरस्स्थितः ॥१८॥ दृष्ट्वा हनुम
तो रूपं सुरसा पंचयोजनं ॥ मुखं चकार हनुमान्द्विगुणं रूपमावहन् ॥१९॥
ततः श्चकार सुरसा योजनानां च विंशतिं ॥ वक्त्रं चकार हनूमान्त्रिंशद्यो
जनसंमतः ॥२०॥ ततश्चकार सुरसा पंचाशद्योजनायुतं ॥ वक्त्रं तदा ह
नुमान्स्तु बभूवांगुष्ठसं[illegible]मतः ॥२१॥ प्रविश्य वदनं तस्याः पुनरेत्य
पुरस्स्थितः ॥ प्रविष्टो निर्गतो हं ते वदनं देवि ते नमः ॥२२॥ एवं वदंतं दृष्ट्वा
॥८४॥ सा हनूमंतं तमब्रवीत् ॥ गच्छ साधय रामस्य कार्यं बुद्धिमतां वर ॥२३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवैः संप्रेषिताहं ते बलं जिज्ञासुभिः कपे ॥ दृष्टासीतां पुनर्गत्वा रामं द्रक्ष्यसि गच्छ
भो गौरं स्पृष्ट्वा सायं यो देवलोकं वायुसुतः पुनः ॥ गच्छस्येष मासस बाहनुमान्मारुता
त्मजः ॥२५॥ रामस्य कार्यसिद्ध्यर्थं तस्य त्वं सन्निवो भव ॥ सगरैर्वर्धितो हं वै पुराहं सा
गरो भव ॥२६॥ तस्यान्वये भवश्चासौ रामो दाशरथिः प्रभुः ॥ तस्य कार्यार्थसिद्ध्य
र्थं गच्छस्येष माह महाकपिः ॥२७॥ समुत्तिष्ठ जलात्तूर्णं त्वयि विश्रम्य गच्छतु ॥ तथेति
प्रादुरभूज्जलमध्यान्नदोद्भूतः ॥२८॥ नानामणिमयैः शृंगैस्तस्योपरि निराकृ
तिः ॥ प्राह यातं हनूमंतं मैनाकोहं महामते ॥२९॥ समुद्रेण समादिष्टस्त्वद्वि
श्रामय मारुते ॥ अगच्छामृतकल्पानि जाख्वा पक्वफलानि मे ॥३०॥ विश्राम्यो
त्र क्षणं पश्चाद्गमिष्यसि यथासुखं ॥ एवमुक्तोथ तं प्राह हनूमान्मारुता
त्मजः ॥३१॥ गच्छतो रामकार्यार्थं भक्षणं मे कथं भवेत् ॥ विश्रामो वा कथं मे
स्याद्कृतव्यं बरीतं मया ॥३२॥ स्पृष्ट्वा स्पृशन्त्यन्त्रिखरं कराग्रेण ययौ कपिः ॥
किंचिद्दूरं गतस्यास्य छायां छायाग्रहो ग्रहात् ॥३३॥ सिंहिका नाम सा घो
रा जलमध्ये स्थिता यदा ॥ आकाशगामिनीं छायामाकृष्याहं भक्षवत् ॥३४॥
तथा गृहीतो हनूमान् चिंतयास वीर्यवान् ॥ केनेदं मह्यते वेगरोधनं वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घ्नकारिणा ॥३५॥ दृश्यते नैव कोप्यत्र विस्मयोत्र प्रजायते ॥ एवं विचिंत्य हनूमा ॥१८५५
नधोदृष्टिः प्रसारयन् ॥३६॥ तत्र दृष्ट्वा महाकायां सिंहिकां घोररूपिणीं ॥
पपात सलिले तूर्णं पद्भ्यामेवाहनद्रुषा ॥३७॥ पुनरुत्प्लुत्य वेगेण दक्षिणाभि
मुखो ययौ ॥ ततो दक्षिणमासाद्य कूटं नानाफलद्रुमं ॥३८॥ नानापक्षि
मृगाकीर्णं नानापुष्पलतावृतं ॥ ततो ददर्श नगरं त्रिकूटाचलमूर्द्धनि ॥३९॥
प्राकारैर्बहुभिर्युक्तं परिखाभिश्च सर्वतः ॥ प्रवेक्ष्यामि कथं लंकामिति चिं
तापरोभवत् ॥४०॥ रात्रौ वेक्ष्यामि सूक्ष्माहं लंकां रावणपालितां ॥ एवं विचिंत्य स
तत्रैव स्थित्वा लंकां जगाम सः ॥४१॥ धृत्वा सूक्ष्मवपुर्द्वारं प्रविवेश प्रता
पवान् ॥ तत्र लंकापुरीरक्षा सा राक्षसी वेशधारिणी ॥४२॥ प्रविशंतं हनूमं
तं दृष्ट्वा लंका व्यतर्जयत् ॥ कः स्त्वं वानररूपेण मामनादृत्य लंकिनीं ॥४३॥
इति भिष्ठलि पाठः प्रविशस्य चौरवद्रात्रौ किं भवान् कर्त्तुमर्हसि ॥ इत्युक्त्वा रोषताम्राक्षी पादे
नाभिजघान तं ॥४४॥ हनूमानपि तां वाममुष्टिनावज्ञयाहनत् ॥ तदैव
पतिता भूमौ रक्तमुद्वमती भृशं ॥४५॥ उत्थाय प्राह सा लंका हनुमंतं
महाबलं हनुमन् गच्छ भद्रं ते जिता लंका च वानरैः(?) ॥४६॥ पुराहं ब्रह्मणा
॥१८५ प्रोक्ता ह्यष्टविंशति पर्यये ॥ त्रेतायुगे दाशरथी रामो नारायणोव्ययः ॥
॥४७॥

188

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जनिष्यतीयागमायासीताजनकवेश्मनि॥ भूभारहरणार्थाय प्रार्थितो
मायया क्वचित्॥४८॥ सभार्यो राघवोऽत्रागमिष्यति महावनं॥ तत्र सी
तां महामायां रावणोऽपहरिष्यति॥४९॥ पम्पाद्रामे पासाचिव्यं सुग्रीवस्य
भविष्यति। सुग्रीवो जानकीं द्रष्टुं वानरान्प्रेषयत्सुधीः॥५०॥ तत्रैको वानरो
रात्रावागमिष्यति लंतिकं॥ त्वयाच भर्त्सितः सोऽपि त्वां हनिष्यति मुष्टिना
॥५१॥ तेनाहता त्वं व्यथिता भविष्यसि यदानघे॥ तदैव रावस्यांतं नवि
ष्यति न संशयः॥५२॥ धन्याहमप्यद्य चिराय राघव स्मरंति मामासीद्भवपाप
मोचना॥ तद्भक्तसंगोऽप्यतिदुर्लभो मम प्रसीद लंकां दाशरथिः सदा ह
दि॥५३॥ उल्लंघितेऽब्धौ पवनात्मजेन धरासुतायाश्च दशाननस्य॥ प्र
स्फोट वामाक्षि भुजश्चवतीव्रं रामस्य दक्षांगमतींद्रियस्य॥५४॥ इति श्री
मदध्यात्मरामायणे उमामहेश्वरसंवादे सुंदरकांडे प्रथमः सर्गः॥१॥
ततो जगाम हनुमान् लंकां परमशोभनां॥ रात्रौ सूक्ष्मतनुर्भूत्वा ब
भ्राम परितः पुरीं॥१॥ तां सीतान्वेषणकार्यार्थी प्रविवेशानपालयं॥

(87)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥९६॥

तत्र सर्वप्रदेशेषु विचिंत्य हनुमानूकपिः ॥२॥ नापश्यज्जानकीं स्मृत्वा नतोलं
काभिभाषितं ॥ जगाम हनुमानूशीघ्रमशोकवनिकां शुभां ॥३॥ सुरपादपसंबा
धरत्नसोपानवापिकां ॥ नानापक्षिमृगाकीर्णां स्वर्णप्रासादशोभितां ॥४॥ फलै
रानम्रशाखाग्रपादपैःपरिवारितां ॥ विचिंन्वनुजानकीं तत्र रक्षखंडमरुत्सु
तः ॥५॥ ददर्शाभ्रंलिहं तंतत्र चैत्यप्रासादमुत्तमं ॥ दृष्ट्वा विस्मयमापन्नो मणिस्तं
भशतान्वितं ॥६॥ समतीत्य पुनर्गत्वा किंचिद्दूरं समारुतिः ॥ ददर्श शिंशुपावृक्ष
मत्यंतनिबिडच्छदं ॥७॥ अदृष्टातपमाकीर्णस्वर्णवर्णविहंगमं ॥ तन्मूले
राक्षसीमध्ये स्थितां जनकनंदिनीं ॥८॥ ददर्श हनुमान्वीरो देवतामिव भूतले ॥
एकवेणीं कृशां दीनां मलिनांबरधारिणीं ॥९॥ भूमौ शयानां शोचंतीं राम
रामेति भाषिणीं ॥ त्रातारं नाधिगच्छंतीमुपवासकृशां शुभां ॥१०॥ शाखां
तच्छदमध्यस्थो ददर्श कपिकुंजरः ॥ कृतार्थोहं कृतार्थोहं दृष्ट्वा जनकनंदि
नीं ॥११॥ मयैव साधितं कार्यं रामस्य परमात्मनः ॥ ततः किलकिलाशब्दो
बभूवांतःपुराद्बहिः ॥१२॥ किमेतदिति संविग्नो वृक्षपत्रेषु मारुतिः ॥ आ
यांतं रावणं तत्र स्त्रीजनैः परिवारितं ॥१३॥ दशास्यं विंशतिभुजं नी

हिंगन बेहाचा रक्ष

॥९६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोजनच्चयोपमं॥ दृष्ट्वा विस्मयमापन्नो पत्रखंडेष्वलीयत॥१४॥ रावणो रा
घवेनाप्तु मरणं मे कथं भवेत्॥ सीतार्थमपि नायाति रामः किं कारणं भवेत्॥१५॥
इत्थं चिंतयन्नित्यं राममेव सदा हृदि॥ तस्मिन्दीयरे रात्रे रावणो राक्षसाधिपः॥१६॥
स्वप्ने रामेणासंदिष्टः कश्चिदागत्य वानरः॥ कामरूपधरः सूक्ष्मो वृक्षाग्रस्थो
नुपश्यति॥१७॥ इति दृष्ट्वाद्भुतं स्वप्नं स्वात्मन्येवानुचिंत्य सः॥ स्वप्नः कदाचित्स
त्यः स्यादेवं तत्र करोम्यहं॥१८॥ जानकीं वाक्शरैर्विद्ध्वा दुःखितां नितरामहं॥ क
तिद्दृष्ट्वा रामाय निवेदयतु वानरः॥१९॥ इत्येवं चिंतयन्सीतासमीपमगमद्द्रुतं॥
नुपुराणां किंकिणीनां श्रुत्वा सिंजितमंगनाः॥२०॥ सीता नीता नीयमाना स्वा
त्मन्येव सुमध्यमा॥ अधोमुख्यश्रुनयना स्थिता रामार्पितांतरा॥२१॥ रावणो
पि तदा सीतामालोक्याह सुमध्यमे॥ मां दृष्ट्वा किं तथा सुभ्रु स्वात्मन्येव विली
यसे॥२२॥ रामो वनचराणां हि मध्ये तिष्ठति सानुजः॥ कदाचिद्दृश्यते केश्चित
कदाचिन्नैव दृश्यते॥२३॥ मया तु बहुधा लोकाः प्रेषितास्तस्य दर्शने॥ न पश्यं
ति प्रयत्नेन वीक्ष्यमाणाः समंततः॥२४॥ किं करिष्यसि रामेण निस्पृहेण सदा
त्वयि॥ त्वया सदालिंगितापि समीपस्थापि ने सदा॥२५॥ हृदयेस्य न च स्नेह
स्त्व रामस्य जायते॥ हत्वा तां सर्वभोगांश्च तद्गुणानपि राघवः॥२६॥ भुंजा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नोपि न जानाति रूतं भ्रोपि निर्गुणोधमः॥ समानीता मया साध्वी दुखत्यक्त मया
कुला॥२७॥ इदानिमपि नायाति निरन्क्रि हि नैकथं त्यजेत्॥ निःसत्वो निर्ममो मानी
मूढः पंडितमानवान्॥२८॥ नराधमं तद्विमुखं किंकरिष्यसि भामिनी॥ त्वय्यानी
व समासक्तं मां भजस्वा सुरोत्तमं॥२९॥ देवगंधर्वनागानां पक्षिकिन्नरयोषि
तां॥ भविष्यसि निश्रीस्त्वं यदि मां प्रतिपद्यसे॥३०॥ रावणस्य वचः श्रुत्वा सीतामर्ष
समन्विता॥ उवाचाधोमुखी भूत्वा निधाय तृणमंतरे॥३१॥ राघवाद्बिभ्यता नू
नं भिक्षुरूपं त्वया धृतं॥ रहितौ राघवाभ्यां त्वं शुनि वत्स विरध्वरे॥३२॥ हृतवा
वानसि मां निचतत्फलं प्राप्स्यसे चिरात्॥ यदा रामशराघातविदारितवपुर्भवा
न्॥३३॥ जानीषे मानुषं रामं गमिष्यसि यमांतिकं॥ समुद्रं शोषयित्वा वा शरै
रेव ध्वापि वारिधिं॥३४॥ हंतुं त्वां समरे रामो लक्ष्मणेन समन्वितः॥ आगमि
ष्यत्यसंदेहो द्रक्ष्यसे राक्षसाधम॥३५॥ त्वां सपुत्रं सबलं हत्वा नेष्यति मां
पुरं॥ श्रुत्वा राक्षसपतिः क्रुद्धो जानक्याः परुषाक्षरं॥३६॥ वाक्यं क्रोधस
माविष्टः खड्गमुद्यम्य सत्वरः॥ हंतुं जनकराजस्य तनयां ताम्रलोचनः॥
॥८७ ॥३७॥ मंदोदरी निवीर्याह पतिं प्रतिहितैरना॥ त्यजैनां मानुषीं दीनां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुःखीतां रूपुणांरु-सां॥३८॥देवगंधर्वनागानांयक्षविद्याधरांगनाथयामेवरा
गाःसीताच्चविष्यतिसकामना॥३९॥तथायतध्वं त्वरितंतर्जनादरणादिभिः
ष्हिमासाभ्यंतरेसीतायदिमेवशगाभवेत्॥४०॥तदासर्वसुखोपेताराज्यंभो
क्ष्यतिसामया यदिमासद्वयादूर्ध्वंमेप्रेष्यानाभिनंदति॥४१॥तदामेप्रातरा
शाय हत्वाकुरुतमानुषीं॥इत्युक्त्वाःप्रययोस्त्रिभिःरावणोंतःपुरालयं॥४२॥
राक्षस्योजानकीमित्यभीषयंतःस्वतर्जेः॥तत्रैकाजानकीमाहयौवनंतेवृ
थागतं॥४३॥रावणेनसमासाद्यसफलंतेभविष्यति॥अपरोचाहकोपे
नकिंविलंबेनजानकी॥४४॥इदानींछेद्यतामंगंविभज्यचपृथकपृथक॥
अन्यातुखड्गमुद्यम्यजानकींहंतुमुद्यता॥४५॥अन्याकरालवदनावि
दार्यास्यमभाषत्॥एवंतांभीषयंतीस्ताराक्षसीर्विकृताननाः॥४६॥नि
वार्यत्रिजटावृद्धाराक्षसीवाक्यमब्रवीत्॥शृणुध्वंदुष्टराक्षस्योमद्वाक्या
चोदितोभवेत्॥४७॥नभीषयध्वंरुदतीनमस्कुरुतजानकीं॥इदा
नीमेवमेस्वप्नेरामःकमललोचनः॥४८॥आरुह्यैरावतंशुभ्रंलक्ष्मणेनसु
समन्वितः॥दग्ध्वालंकापरिरसन्हत्वारावणमाहवे॥४९॥आरोप्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जानकींस्वांकेस्थितोदृष्टोगमर्दूनि।।रावणोगोमयह्रदेतैलाभ्यक्तोदिगंबरः।।५०
वगाहंपुत्रपौत्रैश्चकृत्वावदनमालिकां।।बिभिषणस्तुरामस्यसंनिधौहृष्ट
मानसः।।५१।।सेवांकरोतिरामस्यपादयोर्भक्तिसंयुतः।।सर्वथारावणोरामेणह
तासकुलमंजसा।।५२।।बिभिषणायाधिपत्यंदत्वासीतांशुभाननां।अंकेनि
धायस्वपुरींकरिष्यतिनसंशयः।।५३।।त्रिजटायावचःश्रुत्वाभीतास्ता
राक्षसस्त्रियः।।तूष्णीमासंस्तत्रतत्रनिद्रावशामुपागताः।।५४।।तर्जिता
राक्षसीभिःसासीताभीताभृशंविरुद्धात्रातारंनाधिगच्छंतीदुःखेनपरि
कर्षिता।।५५।।अश्रुभिःपूर्णनयनाचिंतयंतीदमब्रवीत्।।प्रभातेभक्ष
यिष्यंतिराक्षस्योमांनसंशयः।।५६।।इदानीमेवमरणंकेनोपायेनमेभ
वेत्।।५७।।एवंसुदुःखेनपरिप्लुतासाविमुक्तकंठारुदतीचिराय।।
आलंब्यशाखांकृतनिश्चयामृतोनजानतीकिंचिदुपायमंगना।।५८।।
इतिश्रीमदध्या०उ०सुंदरकांडेद्वितीयःसर्गः।।उद्बंधनेनवामोक्षे:
शरीरंराघवंविना।।जीवितेनफलंकिंस्यान्ममरक्षोधिमध्यतः।।१।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दीर्घवेणीममासर्वं मुद्धाय भविष्यति॥ एवं निश्चितबुद्धीनां॥२॥ म्र
रणायाथ जानकीं॥२॥ विलोक्य हनुमान्किंचिद्विचार्यैतदभाषत॥ शनैः श
नैः सूक्ष्मरूपो जानक्याः श्रीगं वचः॥३॥ इक्ष्वाकुवंशप्रभवो राजा दशरथो
महान्॥ अयोध्याधिपतिस्तस्य चत्वारो लोकविश्रुताः॥४॥ पुत्रा देवस
माः सर्वे लक्षणै रूपलक्षिताः॥ रामश्च लक्ष्मणश्चैव भरतश्च शत्रु
घ्नः॥५॥ स तु वासं गौतमीतीरे पंचवट्यां महामनाः॥ ओसैनी तामोंगा हाभा
सीता जनकनंदिनी॥६॥ रहिते रामचंद्रेण रावणेन दुरात्मना॥ ततो रामो
ऽतिदुःखार्तो मार्गमाणोऽथ जानकीं॥७॥ जटायुषं पक्षिराजं प्रपन्नस्य स
ति तं भुवि॥ तस्मै दत्वाग्निदं ऋषी प्रमृस्यमुपमुपागमत्॥८॥ सुग्रीवेण
कृता मैत्री रामस्य विदितात्मनः॥९॥ दृष्ट्वा यो हरिणं हत्वा वालिनं रघुनंद
नः॥१०॥ राज्येऽभिषिक्तः सुग्रीवं मित्रकार्यं चकार सः॥ सुग्रीवं स समानी
य वानरान्वानरप्रभुः॥११॥ प्रेषयामास परितो वानरान्परिमार्गणे॥ सी
तायास्तत्र चैकोऽहं सुग्रीवः सचिवो हरिः॥१२॥ संपातिवचनाच्छीघ्रमु
ल्लंघ्य शतयोजनं॥ समुद्रं नगरीं लंकां विचिन्वन् जानकीं शुभां॥१३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शनैरशोकवनिकां विचिन्वन्तीं समुपागतः॥ अद्राक्षं ज्जानकीं तत्र शोचतीं दु ॥८८५
खमाप्नुतां॥१४॥ रामस्य महिषीं देवीं हनुमत्सोह मागतः॥ इत्युक्तो स्ते पर रामा
घ्यमारुतिर्बुद्धिसत्तमः॥१५॥ सीतात्क्रमेण तत्सर्वं स्मृत्वा विस्मयमाययौ॥
किमेतन्मे श्रुतं योसि वायुना समुदीरितं॥१६॥ स्वप्नो वा मे मनोभ्रान्ति यदि
वा सत्यमेव तन्नु॥ निद्रा मे नास्ति दुःखेन जानामि तत्कुतो भ्रमः॥१७॥ येन मे क
र्णपीयूषं वचनं समुदीरितं॥ स दृश्यतां महाभागः प्रियवादी ममाग्रतः॥१८॥
श्रुत्वा तज्जानकीवाक्यं हनूमान्पत्रखण्डतः॥ अवतीर्य शनैः सीतापुरतः
समवस्थितः॥१९॥ कलविंकप्रमाणोगो रक्तास्यः पीतवानरः॥ नना
म शनकैः सीतां प्रांजलिः पुरतः स्थितः॥२०॥ दृष्ट्वा तं जानकी भीता
रावणोयमुपागतः॥ मां मोहयितुमायातो माययावानराकृतिः॥२१
इत्येवं चिन्तयित्वा सा तूष्णीमासीदधोमुखी॥२२॥ पुनरप्याह तां सी
तां देवि यत्त्वं विशंकसे॥ नाहं तथाविधो मातः त्यज शंकां मयि स्थि
तां॥ दासोहं कोशलेन्द्रस्य रामस्य परमात्मनः॥२३॥ सचिवोहं हरी
॥८८॥ न्द्रस्य सुग्रीवस्य शुभप्रदे॥ वायोः पुत्रोहमखिलं प्राणभूतस्य शो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मने॥२४॥ तच्च राजा कीप्राह हनूमंतं स्वजल्पितं॥ वानराणां मनुष्याणां
संगतिर्घटते कथं॥२५॥ यथाहं रामचंद्रस्य दासोहमिति भाषसे॥ तामा
ह मारुतिः प्रीतो जानकी दुरतः स्थितः॥२६॥ ऋष्यमूकमगाद्रामोः शब
रीचोदितः सुधीः॥ सुग्रीव ऋष्यमूकस्थो दृष्टवान् रामलक्ष्मणौ॥२७॥
भीतो मां प्रेषयामास ज्ञातुं रामस्य हृद्गतं ब्रह्मचारिवपुर्धृत्वा गता
हं रामसंन्निधिं॥२८॥ ज्ञात्वा रामस्य सद्भावं स्कंधोपरि निधाय तौ॥
नीत्वा सुग्रीवसामीप्यं सख्यं चाकरवं तयोः॥२९॥ सुग्रीवस्य हृता
भार्या वालिना तं रघूत्तमः॥ जघानैकेन बाणेन ततो राज्येभ्यषिं
चयत्॥३०॥ सुग्रीवं वानराणां स प्रेषयामास वानरान्॥ दिग्भ्यो वैं मा
हाबलान्वीरान् भवत्याः परिमार्गणे॥३१॥ गच्छंतं राघवो दृष्ट्वा म
मा भाषत सादरं॥ त्वयि कार्यमशेषं मे स्थितं मारुतनंदन॥३२॥
ब्रूहि मे कुशलं सर्वं सीतायै लक्ष्मणस्य च॥ अंगुलीयकमेतन्मे
परिज्ञानार्थमुत्तमं॥३३॥ सीतायै दीयतां साधु मन्नामाक्षरमु
द्रितं॥ इत्युक्त्वा प्रददौ मह्यं कराग्रादंगुलीयकं॥३४॥ प्रयत्नेन म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यानीतं देवी पश्यांगुलीयकं ॥ इत्युक्त्वा प्रददौ देव्यै मुद्रिकां मारुतात्मजः ॥३५॥
नमस्कृत्वा स्थितो दूराद्बद्धांजलिपुटो हरिः ॥ दृष्ट्वा सीता प्रमुदिता रामु
द्रांकितां तदा ॥३६॥ मुद्रिकां शिरसा धृत्वा स्रवदानंदनेत्रजा ॥ कपे मे
प्राणदाता त्वं बुद्धिमानसि राघवे ॥३७॥ दृढभक्तोऽसि प्रियकारी त्वं विश्वा
सोऽस्ति तवैव हि ॥ नोचेन्मत्सन्निधिं कान्यं पुरुषं प्रेषयेत्कथं ॥३८॥ ह
नूमन् दृष्टमखिलं मम दुःखादिकं त्वया ॥ सर्वं कथय रामाय यथा मे जा
यते दया ॥३९॥ मासद्वयावधि प्राणाः स्थास्यंति मम सत्तम ॥ नागमि
ष्यति चेद्रामो भक्षयिष्यति मां खलः ॥४०॥ अतः शीघ्रं कपींद्रेण
सुग्रीवेण समन्वितः ॥ वानरानीकपैः सार्द्धं हत्वा रावणमाहवे ॥४१॥
सपुत्रं सबलं रामो यदि मां मोचयेत्प्रभुः ॥ तत्तस्य सदृशं वीर्यं वी
र वीर यद्वर्णितं ॥४२॥ यथा मां तारयेद्रामो हत्वा शीघ्रं दशाननं ॥ त
था यतस्व हनुमन् वाचा धर्ममवाप्नुहि ॥४३॥ हनुमानपि तामाह
देवि दृष्टो यथा मया ॥ रामः सलक्ष्मणः शीघ्रमागमिष्यति सायुधः ॥४४॥
सुग्रीवेणासंसंख्येन हत्वा दशमुखं बलात् ॥ समानेष्यति देवि त्वां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मयोध्यां नात्र संशयः॥४५॥ तमाह जानकी रामः कथं वारिधिमाततं॥ ती
र्त्वा यास्यति मे स्वामी वानरानीकपैः सह॥४६॥ हनुमानाह मे स्कंधावारुह्य पु
रुषर्षभौ॥ अयास्यतः ससैन्यश्च सुग्रीवो न नरेश्वरः॥४७॥ विहाय
साक्षणेनैव तीर्त्वा वारिधिमाततं॥ निर्दहिष्यति रक्षौघान् सहलेना
त्र संशयः॥४८॥ अनुज्ञां देहि मे देवि गच्छामि त्वरयान्वितः॥ द्रक्ष्यं रामं
सहभ्रात्रा त्वरयामि तवांतिके॥४९॥ देवि किंचिदभिज्ञानं देहि मे ये
न राघवः॥ विश्वसेन्मां प्रयत्नेन ततो गंतामहोत्सुकः॥५०॥ ततः
किंचिद्विचार्याथ सीता कमललोचना विमुच्य केशपाशे न स्थि
तं चूडामणिं ददौ॥५१॥ अनेन विश्वसेद्रामस्त्वां कपींद्र सलक्ष्म
णः॥ अभिज्ञानार्थमन्यच्च वदामि तव सुव्रत॥५२॥ चित्रकूट
गिरौ पूर्वमेकदा रहसि स्थितः॥ मदंके शिर आदाय निद्राति रघु
नंदनः॥५३॥ ऐंद्रकाकस्तदागत्य नखैस्तुंडैश्च सुक्षतं॥ तत्पा
दांगुष्ठमारक्तं विददारामिषाशयः॥५४॥ ततो रामं प्रबुध्या
य दृष्ट्वा पादं कृतव्रणं॥ केन भद्रे कृतं वेत्तद्धि प्रियं मे दुरात्मना॥५५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रस्कृद्धा पुरतः पश्यन् मां विदार्य पुनः पुनः ॥ अपि द्रवति रक्तास्यं न चुंडै
श्चुको महत् ॥ ५६ ॥ तृणमेव सुपादाय दिव्यास्त्रेणाभियोजयत् ॥ चिक्षेप
कौस्तया रामो वायसोपरि वज्रवत् ॥ ५७ ॥ अपि द्रवद्वायसं सर्वीनो
लोकान् भ्रमत्पुनः ॥ इंद्रब्रह्मादिभिश्चापि न शक्यो रक्षितुं तदा ॥ ५८ ॥
रामस्य पादयोरग्रे पतन् त्रात्याद्दयानिधिः ॥ शरणागतमालोक्य रामस्त
मिदमब्रवीत् ॥ ५९ ॥ अमोघं मे तदस्त्रं मे देहैकाक्षमितो व्रज ॥ स व्यंद
शालतो काक एवं पौरुषवानपि ॥ ६० ॥ उपेक्षते किमर्थं मामिदानीं
सोपि राघवः ॥ हनुमानपि तामाह स्मरता सीतानु भाषितं ॥ ६१ ॥ दे
वी हां यद्दिना नातिस्थितामात्रं रघूत्तमः ॥ करिष्यति क्षयाद् दुःख
लंकां राक्षसमर्दितां ॥ ६२ ॥ जानकी प्राह तं वत्स कथं हि यो ससैसु
रेः ॥ अतिसूक्ष्मवपुः सर्वे वानरास्त्वं भवादृशाः ॥ ६३ ॥ श्रुत्वा त
द्वचनं देव्ये स्वरूपमदर्शयत् ॥ मेरुमंदरसंकाशं रक्षोगण
बीभीषणं ॥ ६४ ॥ दृष्ट्वा सीताह हनूमंतं माहापर्वतसंन्निभं ॥ बु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भुक्षितः कपिः प्राह दर्शनात्तारणं मम ॥ ६५ ॥ चविष्यति फलैः पक्वैः स्त्वद
ष्टोस्थितस्य मे ॥ तथेत्युक्तः स जानक्यादर्शि विपिनं कपिः ॥ स्थितः प्रस्थापि
तो गच्छ जानकीं प्रणिपत्य मः ॥ किंचिद्दूरमथो गत्वा स्वात्मन्येवमचिंतयत् ॥ ६७
कार्यार्थमागतो दूतः स्वामिकार्यविरोधितः ॥ अन्यं किंचिदसंपाद्य गच्छेत्स्य
धम एव सः ॥ ६८ ॥ अतोहं किंचिदन्यच्च सत्पादृष्ट्वाथ रावणं ॥ संभाष्य च त
तो रामदर्शनार्थं व्रजाम्यहं ॥ ६९ ॥ इति निश्चित्य मनसा वृक्षखंडान्महाब
लः ॥ उत्पाट्य शोकवनिकां निर्वृक्षामकरोत् क्षणात् ॥ ७० ॥ सीतामुयानग
न्त्यक्त्वा वनं शून्यं चकार सः ॥ उत्पाटयंतं विपिनं दृष्ट्वा राक्षसयोषितः ॥ ७१ ॥
अपृच्छन् जानकीं कोसौ वानराकृतिरुद्भटः ॥ जानकी उवाच ॥ यूयं त्य
एव जानंतु मायां राक्षसनिर्मितां ॥ ७२ ॥ नाहमेवं विजानामि दुःखशोक
समाकुला ॥ इत्युक्तास्त्वरितं गत्वा राक्षस्यो भयपीडिताः ॥ ७३ ॥ हनूमत
ताकृतं सर्वं रावणस्य न्यवेदयन् ॥ देव कश्चिन्महासत्त्वो वानराकृतिदेह
मृत ॥ सीतया सह संभाष्य ह्यशोकवनिकां क्षणात् ॥ ७५ ॥ उत्पाट्य चैत्य
प्रासादं बभंजामितविक्रमः ॥ प्रासादरक्षिणः सर्वान् हत्वा तत्रैव त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्थितवान्॥७६॥तद्दृष्ट्वा तूर्णमुत्थाय वनभंगं मात्रियं॥किंकरान्प्रेषयामासनि
युतं राक्षसाधिपः॥७७॥निर्मग्नचैत्यप्रासादप्रथमांतरसंस्थितः॥हनुमान्प
र्वताकारो लोहस्तंभकृतायुधः॥७८॥किंचिल्लांगुलम्बलनेनारक्तास्यो भीषणा
कृतिः॥अपतंतं महाहासं घं राक्षसानां दर्दरस्सः॥७९॥चकारसिंहनादं च प्र
स्थाने मुमुदुरुत्तनं॥हनुमंतमथो दृष्ट्वा किंकरान्भीषणाकृतिः॥८०॥निर्जघ्नु
र्विविधास्त्रौघैः सर्वराक्षसघातिनं॥ततउत्थाय हनुमान्मुद्गरेण समंततः॥
॥८१॥निष्पीड्य चरणौ देवमशकानिव यूथपः॥निहतं किंकरान्श्रुत्वा रावणः
क्रोधमूर्छितः॥८२॥पंचसेनापतींस्तत्र प्रेषयामास दुर्मदान्॥हनूमानपि
तान्सर्वांल्लोहस्तंभेन चाहनत्॥८३॥ततः क्रुद्धो मंत्रिसुतान्प्रेषयामास
सप्तसः॥आगतानपि तान्सर्वान्पूर्ववद्धानरेश्वरः॥८४॥क्षणान्निःसारो लोह
त्यालोहस्तंभेन मारुतिः॥पूर्वस्थानमुपाश्रित्य प्रतीक्षन्राक्षसान्स्थितः॥८५॥
यान् २ ततो जगाम बल कुमारोऽक्षः प्रतापवान्॥तमुत्पतंतं हनुमान्क्रोधात्समुद्ग
रः॥८६॥गगनात्वरितो मूर्ध्नि मुद्गरेणाभ्यताडयत्॥हत्वा तेक्षं निर्घोषं बलं सं
र्वं चकार सः॥८७॥ततः श्रुत्वा कुमारस्य वधं राक्षसपुंगवः॥क्रोधेन मह
॥२०२॥ ताविष्टो ईद्रजेतारमब्रवीत्॥८८॥पुत्रगच्छाम्यहं तत्र यत्रास्ते पुत्रहारि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुः॥ हत्वाथमथवाबध्वाआनयिष्याम्यहंत्विकं॥ ८९॥ इंद्रजितिस्थितरंभ्रा
तजश्शोकमाहामते॥ मय्यस्थितेत्किमर्थंत्वंभाषसेदुःखितंवचः॥ ९०॥ बध्वा
नेष्येद्रुतंतातवानरंब्रह्मपाशतः॥ इत्युक्त्वास्त्रंसमुद्यम्यइंद्रजेतासुवीर्य
वान्॥ ९१॥ उत्सपातनभोदेशेगरुत्मानिवमारुतिं॥ ततोस्त्रमंत्रंनमस्सिह
नूमंतंत्रिशिखिमुखैः॥ ९२॥ विध्वातस्यशिरोभागंपंचभिःश्चाष्टभिःपुनः॥
हृदयंपादयुगुलंषड्भिरेकेनवालधिं॥ ९३॥ भेदरबाततोघोरंसिंहनादं
तथाकरोत्॥ ततोतिमर्षद्धनुमान्स्तंभमुद्यम्यवीर्यवान्॥ ९४॥ जोघा
नसारथिंचाश्वंरथंचाचूर्णयत्क्षणात्॥ ततोन्यरथमारुह्यमेघनादो
महाबलः॥ ९५॥ ततोब्रह्मास्त्रमादायबध्वावानरपुंगवं॥ निनाय
निकटंराज्ञोरावणस्यमहाबलः॥ ९६॥ यस्यनामस्मरंतंजनःपंक्तियं
ज्ञानकर्मकृतबंधनंक्षणात्॥ सद्यएवपरिमुच्यतेसदैवोगतिकोटि
रविभासुरंत्रिवं॥ ९७॥ तस्यैवरामस्यपदांबुजंसदाहृत्पद्ममध्येसु
निधायमारुतिः॥ सदैवनिर्मुक्तसमस्तबंधनःकिंतस्यपाशैरितरै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१००३

श्वबंधनैः॥१८॥इतिश्रीमद० उमा०सुंदरकां० तृतीयः सर्गः॥३॥यांतं
कपिद्रं ध्रुतपाशाबंधनं विलोकयतं नगरं बिभीतवान्॥ अताडयन्मुष्टि
तलैः सुकोपनैः पौरैः समंतादनुयांतमीक्षितुं॥१॥ब्रह्मास्त्रमेतं क्षणमा
त्रसंगमं लब्धागतं ब्रह्मवरेण सत्वरं॥ ज्ञात्वाह नूमानपि फल्गुरज्जुभि
र्धृतोययौ कार्यविशेषगौरवात्॥२॥स मांतस्थस्य च रावणस्य तं
पुरो निधायाह बलाच्छित्तदा॥ बद्धो मयाब्रह्मवरेण वानरः प्रहस्त
मग्रेस्थितमंजनाद्रिभं॥३॥यदुक्तमात्रार्यविचार्य मंत्रिभिर्निचीय
तामेष नेत्राक्षिकोहरिः॥ ततो विलोक्याह स रावणेश्वरः प्रहस्तमग्रे
स्थितमंजनाद्रिभं॥४॥प्रहस्त पृच्छैनमसौ किमागतः किमत्र कार्यं
कुत एव वानरः॥ वनं किमर्थं सकलं विनाशितं हता किमर्थं मम रा
क्षसा बलात्॥५॥ततः प्रहस्तो हनुमंतमादरात् पप्रच्छ केन प्रहितो
सि वानरः॥ भयं तु ते मास्तु विमोक्ष्यसे मया सत्यं वदस्वाखिलरा
जसंनिधौ॥६॥ततो तिहर्षात्पवनात्मजो रिपुं निरीक्ष्य लोकत्रयकं
टकासुरं॥ वक्तुं प्रचक्रे रघुनाथसत्कथां क्रमेण रामं मनसा स्मर

॥१००३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्मुकुः ॥७॥ शृणु स्फुटं देवगणाद्यमित्रहे रामस्य दासोहमनेकषट्स्थितः ॥
यस्याखिलेशस्य हृताधुना त्वया भार्या स्वनाशाय मुनेर्वसद्भुवि ॥८॥ स
राघवोभ्येत्य मतंगपर्वतं सुग्रीवमैत्रीमनलस्य संनिधौ ॥ स एवैक बा
णेन निहत्य वालिनं सुग्रीवमेवाधिपतिं चकार तं ॥९॥ स वानराणाम
धिपो महाबलो महाबलैर्वानरयूथकोटिभिः ॥ रामेण सार्द्धं सह लक्ष्म
णेन भो प्रवर्षणे पर्वयुतो वतिष्टते ॥१०॥ संचोदितास्तेन महाहरीश्व
रा धरासुतां मार्गयितुं दिशो दश ॥ ततो हमेकः पवनात्मजः कपिः सीतां चि
न्वन् नुरानकैः समागतः ॥११॥ दृष्टा मयापद्मपलाशलोचना सीता कपि
स्वहृद्दिपिनं विनाश्रितं ॥१२॥ दृष्ट्वा ततोहं रक्षसास्समागतान्मां हंतु कामा
न्मृतं चापसायकान् ॥१३॥ मया हतास्ते परिरक्षितं वपुः प्रियो हि देवोखिलदेहिनां
प्रभो ब्रह्मास्त्रणैयन निबध्य मां ततः समागमं मेघध्वनिनादनायकः ॥१३॥ स्पृष्ट्वैव मां
ब्रह्मवरप्रभो स्वयं गतं सर्वमवैमि रावण ॥ तथाप्यहं बद्ध इवागतोहं प्रवक्तु
कामः करुणारसार्द्रधीः ॥१४॥ विचार्य लोकस्य विवेकतो गतिं न राक्षसीं बुद्धि
मुपैहि रावण ॥ दैवीं गतिं संसृतिमोक्षहेतुकीं समाश्रयात्यंतहितायदे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हितः॥१७॥त्वं ब्राह्मणो हं न मनुर्वंशसंभवः पौलस्त्यपुत्रोस्मि कुबेरबांधवः॥
देहात्मबुद्ध्यापि च पत्न्यरराक्षसं नास्मीति बुद्ध्या किमु राक्षसो न हि॥१६॥
शरीरबुद्धींद्रियदुःखसंततिर्न मे न च त्वं तव निर्विकारः॥अज्ञानहेतोश्च तथै
व संततेरसत्यमस्यास्वपतो हि दृश्यवत्॥१७॥इदं तु सत्यं तव नास्ति विक्रिया
विकारहेतुर्न च तेह्यद्वयं ततः॥यथा नभः सर्वगतं न लिप्यते तथा भवान्देह
गतो पि सूक्ष्मः॥१८॥देहेंद्रियप्राणशरीरसंगतिः स्वात्मेति बुद्ध्याखिलबं
धभावहेतुः॥चिन्मात्रमेवाहमजो हमक्षरो ह्यानंदभावावाहे मिति प्रमुच्य
ते॥१९॥देहो प्यनात्मा पृथ्वीविकारजो न प्राण आत्मानिल एव एव सः॥
मनो प्यहंकारविकार एव नो न चापि बुद्धिः प्रकृते विकारजा॥२०॥आत्मा
चिदानंदमयो विकारवान्देहादिसंघाद्व्यतिरिक्त ईश्वरः॥निरंजनो मु
क्त उपाधितः सदा ज्ञात्वैवमात्मानमितो विमुच्यते॥२१॥अतो हमत्यं
तिकमोक्षसाधनं वक्ष्ये शृणुष्वावहितो महामते॥विष्णोर्हि भक्तिः सु
विशोधनं धियस्ततो भवेज्ज्ञानमतीव निर्मलं॥२२॥विशुद्धतत्वानुभवो
॥१०४॥ भवेत्ततः सम्यग्विदित्वा परमं पदं व्रजेत्॥अतो भजस्वाद्य हरिं रमाप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पतिं रामं पुराणं प्रकृतेः परं विभुं ॥ २३ ॥ विसृज्य मौर्ख्यं हृदि शत्रुभावनं भजस्व
रामं शरणागतः स्वयं ॥ सीतां पुरस्कृत्य सपुत्रबांधवो रामं नमस्कृत्य विमुच्य
से भयात् ॥ २४ ॥ रामं परात्मानमभावयंजनो नत्वा हृदिस्थं सुखरूपमद्वयं ॥
कथं परं तीरमवाप्नुयाज्जडो भवांबुधेर्दुःखतरंगमालिनः ॥ २५ ॥ नेच्छेददलो
न मयेन वन्हिना ज्वलंतमात्मानमलक्षणारिव तु ॥ नयस्य बोधं स्वकृतं नेभैव
पातके विमोक्ष्यस्यंकान च नेभविष्यति ॥ २६ ॥ इत्यमृतास्वादसमानभाषितं
तद्वायुसूनोर्दशकंधरोऽसुरः ॥ अमृष्यमाणोऽतिरुषा कपीश्वरं जगाद रक्तांत
विलोचनो ज्वलन् ॥ २७ ॥ कथं ममाग्रे विलपस्यभीतवत् प्लवंगनामाऽ
धमोऽसि दुष्टधीः ॥ क एष रामः कतमो वनेचरः सुग्रीवदत्तं जहि वानराधमं ॥ २८ ॥
हंताद्य हत्वाजनकात्मजां न तौ निहन्मि रामं सह लक्ष्मणेन ततः ॥ सुग्रीवमग्रे ब
लिनं कपीश्वरं सवानरं हन्म्यचिरेण वानर ॥ २९ ॥ श्रुत्वा दशग्रीववचः समा
रुतिर्विवृद्धकोपेन दहन्निवासुरं ॥ न मे समं रावणकोटयोऽधमः रामस्य दासोऽह
मपारविक्रमः ॥ ३० ॥ श्रुत्वातिकोपेन हनूमतो वचो दशाननो राक्षसमेकमब्रवी
त् ॥ पार्श्वस्थितं मारय खंडशः कपिं पश्यंतु सर्वेऽसुरमित्रबांधवाः ॥ ३१ ॥
निवारयामास ततो बिभीषणो महासुरं सायुधमुद्यतं वधे ॥ राजान्वहार्यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न प्रवेक्ष्यदा चन प्रतीपयुक्तैः परराज वानरः ॥ ३२ ॥ हते तस्मिन्वानरे दूते वार्त्तां को
वा निवेदयेत् ॥ रामाय त्वं यमुद्दिश्य वधाय समुपस्थितः ॥ ३३ ॥ अतो वधे त्वमेतं किं
चिद्दत्वा चिह्नं तथ वानरे ॥ सचिह्नो गच्छतु ह यं दृष्ट्वा यास्यति दूतं ॥ ३४ ॥ रामः सुग्री
व सहितस्ततो युद्धं भवेत्तव ॥ विभीषणावचः श्रुत्वा रावणोप्येतदब्रवीत् ॥ ३५ ॥
वानराणां हि लांगूले महिमानो भवेत्किल ॥ अतो वस्त्रादिभिः पुच्छं वेष्टयित्वा
प्रयत्नतः ॥ ३६ ॥ वह्निना योजयित्वैनं भ्रामयित्वा पुरेभितः ॥ विसर्जयत तः पश्येत्तु म
वै राक्षसयूथपाः ॥ ३७ ॥ तथेति तीपीप[illegible]क्तैःश्च वस्त्रैश्चान्यैरनेकशः ॥ ते ला
न्ने वेष्टयामासुर्लांगुलं मारुतेर्दृढं ॥ ३८ ॥ पुच्छाग्रे किंचिदनलं दीपयित्वाथ
राक्षसः ॥ रज्जुभिः सुदृढं बध्वा धृत्वा तं बलिनोसुराः ॥ ३९ ॥ समंताद्भ्रा
मयामासुश्चोरोयमिति वादिनः ॥ तूर्यघोषैर्घोषयंतो ताडयंतो मुहुर्मु
हुः ॥ ४० ॥ हनुमानपि तत्सर्वं सोढुं किंचिच्चिकीर्षया ॥ गत्वा तु पश्चिमे
द्वारे समीपं तत्र मारुतिः ॥ ४१ ॥ सूक्ष्मो बभूव बंधेभ्यो निर्वृतः पुनर
प्यसौ बभूव पर्वताकारः स्ततउत्लुत्य गोपुरं ॥ ४२ ॥ तत्र स्तंभं समादाय
हत्वा तान् रक्षिणः क्षणात् ॥ विचिंत्य कार्यं शेषं च प्रासादाग्राण्यदाहच ॥ ४३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उत्सुत्या धुत्पसंदीप्तं पुछेन महता कपिः ॥ ददाह लंकामखिलां सात्प्रासादतो
रणां ॥४४॥ हा तात पुत्र नाथेति क्रंदमानैः समंततः ॥ व्याप्ता प्रासादशिखरेप्या
रूढा दैत्ययोषितः ॥ देवनारूवद्दग्धंनेपत्स्यंलंपावके खिलाः ॥४५॥ विभीषणगृहं
त्यं सकलासर्वं भस्मिभूतं पुरं ॥४६॥ सस्तूत्लुत्यजलंधौ हनुमान्मारुतात्म
जः ॥ लांगुलं मज्जयन्वांतः स्वस्थचित्तो बभूव ह ॥४७॥ वायोः प्रियसखित्वाच्च
सीतायाप्रार्थितो नलः ॥ न ददाह हरेः पुछं बभूवास्यंतच्छीतलः ॥४८॥ यन्ना
मसंस्मरणधूतसमस्तपापास्तापत्रयानलसीमंसर्गींहंति संघाः ॥ तस्यैव
किं रघुवरस्य विशिष्टदूतः संतप्यते कथमसौ प्रभूतानलेन ॥४९॥ इतिश्री
मद्०उमा०सुंदरकांडे लंकादहनं नाम चतुर्थः सर्गः ॥४॥ छ ॥ ततः सीतां नम
स्कृत्य हनूमानब्रवीद्वचः ॥ आज्ञापयतु मां देवी गवंती रामसंन्निधिं ॥१॥
गछामि रामस्त्वां द्रष्टुमागमिष्यति सत्वरः ॥ रक्षकाभिः परिक्रम्य जान
कीं मारुतात्मजे ॥२॥ प्रणम्य प्रस्थितो गंतुमिदं वचनमब्रवीत् ॥ देवीग
छामि भद्रं ते त्वं द्रक्ष्यसि राघवं ॥३॥ लक्ष्मणं च ससुग्रीवं वानरायुत
कोटिभिः ॥ ततः प्राह हनूमंतं जानकी दुःखकर्षिता ॥४॥ तां दृष्ट्वास्म
त्तं दुःखमिदानीं त्वं गमिष्यसि ॥ इतः परं कथं जीवे रामवाप्तोऽस्मृतिविना ॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हनूमानुवाच॥ यद्येवं देवी मे स्कंधमारोह क्षणमात्रतः॥ रामेणायोजयिष्यामि
मन्यसे यदि जानकी॥ ६॥ सीतोवाच॥ रामः सागरमाक्रम्य बद्धा वा सरपंज
रैः॥ आगत्य वानरैः सार्द्धं हत्वा रावणमाहवे॥ ७॥ मां नयेद्यदि रामस्य कीर्तिर्वतिष्ठ
भवती॥ अतो गच्छ कथं वापि प्राणान्संधारयाम्यहं॥ ८॥ इति प्रस्थापितो वीरः
सीतया प्रणिपत्य तां॥ जगाम पर्वतस्याग्रे गंतुं पारं महोदधेः॥ ९॥ तत्र गच्छ
न्महासत्वः पादाभ्यां पीडयन्गिरिं॥ जगाम वायुवेगेन पर्वतश्च महीत
लं॥ १०॥ गतो महीं समानत्वं त्रिंशद्योजनमूर्च्छितः॥ मारुतिर्गगनस्थो हि
महाशब्दं चकार सः॥ ११॥ तच्छ्रुत्वा वानराः सर्वे ज्ञात्वा मारुतिमागतं॥ ह
र्षेण महताविष्टाः शब्दं चक्रुर्महास्वनं॥ १२॥ शब्दं नैव विजानीमः कृ
तकार्यः समागतः॥ हनुमानेष पश्यध्वं वानरा वानरर्षभं॥ १३॥ एवं ब्रु
वत्सु वीरेषु वानरेषु स मारुतिः॥ अवतीर्य गिरेर्मूर्ध्नि वानरान्वीरानि
दमब्रवीत्॥ दृष्टा सीता मया लंका धर्षिता च सकानना॥ संभाषितो द
शग्रीवस्ततो हं पुनरागतः॥ १५॥ इदानीमेव गच्छामो रामः सुग्रीवसं
॥१०६॥ न्निधिं॥ इत्युक्ता वानराः सर्वे हर्षेणालिंग्य मारुतिं॥ १६॥ केचिच्चिचुंबु

२०८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऽंगुलं नन्तुः केचिदुत्सुकाः॥ हनूमता समेतास्ते जग्मुः प्रस्रवणं गिरिं॥१७॥ गच्छंतो
ददृशुर्वीरा वनं सुग्रीवरक्षितं॥ मधुसंज्ञं तथा प्राह वानरान्वानरर्षभं॥१८॥ क्षुधिता
स्मो वयं वीर देह्यनुज्ञां महामते॥ भक्षयाम्य फलान्यद्य पिबामो मृतवन्मधु॥१९
संतुष्टा राघवं द्रष्टुं गच्छामोद्यैव सानुजं॥ अंगद उवाच॥ हनुमान्कृतकार्योयं पि
बंतु तत्प्रसादतः॥ भक्षध्वं फलमूलादि वरितं हरिसत्तमाः॥२०॥ ततः प्रवि
श्य हरयः पातुमारेभिरे मधु॥ रक्षिणः स्तान नादृत्य दधिवक्त्रेण चोदिताः॥२१॥
पिबंतस्ताडयामासुर्वानरान्वानरर्षभः॥ ततस्तान्मुष्टिभिः पादैः चूर्णयित्वा
पपुर्मधु॥२२॥ ततो दधिमुखः क्रुद्धः सुग्रीवस्य च मातुलः॥ जगाम रक्षिभिः
सार्द्धं यत्र राजा कपीश्वरः॥२३॥ गत्वा तमब्रवीद्देव चिरकालाभिरक्षितं॥ नष्टं
मधुवनं तेद्य कुमारेण हनूमता॥२४॥ श्रुत्वा दधिमुखेनोक्तं सुग्रीवो हृष्टमान
सः॥ दृष्ट्वागतेन संदेहः सीतां पवननंदनः॥२५॥ नचेन्मधुवनं द्रष्टुं समर्थाः
कोभवेन्मम॥ तत्रापि वायुपुत्रेण कृतकार्येन संशयः॥२६॥ श्रुत्वा सुग्रीवव
चनं हृष्टो रामस्तमब्रवीत्॥ किमुच्यते त्वया राजन्नू वचः सोत्कथान्वितं॥२७॥
सुग्रीवस्तमब्रवीद्वाक्यं देवी दृष्टा वनीसुता॥ हनुमत्प्रमुखाः सर्वे प्रविष्टा मधु
काननं॥२८॥ भक्षयंतीस्म सकलं ताडयंतीस्म रक्षिणः॥ अकृत्वा देवकार्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ते दृष्टमधुवनं मम ।।२९।। न समर्थास्ततो देवी दृष्टा सीतेति निश्चितं ।। रक्षिणो वो
भयं मास्तु गत्वा ब्रूत ममाज्ञया ।।३०।। वानरानंगदमुखानानयध्वं ममांतिकं ।।
श्रुत्वा सुग्रीववचनं गत्वा ते वायुवेगतः ।।३१।। हनूमत्प्रमुखान्नत्वा गच्छतेश्वर
शासनात् ।। द्रष्टुमिच्छति सुग्रीवः सरामो लक्ष्मणान्वितः ।।३२।। श्रुत्वा नतीव
हृष्टास्ते त्वरयं तो महाबलाः ।। तथेत्यंबरमासाद्य ययुस्ते वानरोत्तमाः ।।३३।।
हनूमंतं पुरस्कृत्य युवराजं तथांगदं ।। रामसुग्रीवयोरग्रे निपेतुर्विसं
स्थितं ।।३४।। साष्टांगं प्रणिपत्याग्रे रामं पश्चाद्धरीश्वरं ।। हनूमान्राघवं प्रा
ह दृष्टा सीता निरामया ।।३५।। कुत्रास्ते प्राह राजेंद्र जानकी बांस्पुचान्विता ।।
अशोकवनिकामध्ये शिंशुपामूलमाश्रिता ।।३६।। राक्षसीभिः परिवृता
निराहारा कृशा प्रभो ।। हा राम राम रामेति शोचंती मलिनांबरा ।।३७।।
एकवेणी मया दृष्टा शनैराश्वासिता शुभा ।। वृक्षशाखांतरे स्थित्वा सू
क्ष्मरूपेण ते कथां ।।३८।। जन्मारभ्य तवात्यर्थं दंडकागमनं तथा ।। दंष्ट्रा
ननेन हरणं जानक्या रहिते त्वयि ।।३९।। सुग्रीवेण यथा मैत्री कृत्वा वालि
निबर्हणं ।। मार्गणार्थं वैदेह्याः सुग्रीवेण विसर्जिता ।।४०।। महाबला मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हासता हरये ज्ञिनकारिनः॥ गताः सर्वत्र सर्वैर्वै नैत्रै कोह मिहागतः॥४१॥ अहं सुग्री
व सचिवो दासोहं राघवस्य हि॥ दृष्टा या जानकी त्वग्याम्प्रायासः फलितो मम॥
॥४२॥ इत्युदीरितमाकर्ण्य सीता विस्फुरितेक्षणा॥ केन वा कर्णपीयूषमावितं
मेद्युभाक्षरं॥४३॥ यदि सत्यं तदा यातु मद्दृक्पथं तु सः॥ ततोहं वानराकारः स्व न
न स्वरूपेण जानकीं॥४४॥ प्रणम्य प्रांजलिः स्थित्वा दूरादेव स्थितो प्रभो॥ एष्टोहं सी
तया कस्त्वमित्यादि बहुविस्तरं॥४५॥ मया सर्वं क्रमेणैव विज्ञापितमरिंदम॥
पश्चान्मयार्पितं देव्यै भवद्दत्तांगुलीयकं॥ तेन मामतिविश्वस्ता वचनं चेद
मब्रवीत्॥ यथा दृष्टासि हनुमं वर्धमाना दिवानिशं॥४७॥ राक्षसीनां तर्जनै
स्तस्सर्वं कथय राघवे॥ मयोक्तं देवी रामोपि त्वच्चिंतापरिनिष्ठितः॥४८॥ परित्य
क्त्वा हि आहारं सदात्वान्नाभिगंम्यसः॥ इदानीमेव गत्वाहं स्थितिं रामाय तेब्रु
वे॥४९॥ रामः श्रवणमात्रेण सुग्रीवेण सलक्ष्मणः॥ वानरानिकपैः सै
र्दु मागमीष्यति लेलिकं॥५०॥ रावणं सकुलं हत्वा नेष्यति त्वां स्वकं पुरं॥
अभिज्ञां देहि मे देवी यया मां विश्वसेद्विभुः॥५१॥ इत्युक्ता सा शिरोरत्नं चू
डापाशे स्थितं प्रियं॥ दत्वा काकेन यद्वृत्तं चित्रकूटगिरौ पुरा॥५२॥ तं प्रा दा॥४
हाश्रुपूर्णाक्षी कुशलं ब्रूहि राघवं॥ लक्ष्मणं ब्रूहि मे किंचिद्रुक्तं भावि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुरा॥५३॥तस्मात्सम्यक्स्वभावेन भाषितं कुरुनंदन॥ तारयेन्मां यथा रामस्त
था कुरु कृपान्वितः॥५४॥इत्युक्त्वा रुदती सीता दुःखेन महतावृता॥मयाप्या
श्वासिता राम वदताश्रुपरिप्लुता ॥५५॥ततः प्रस्थापितो रामलक्ष्मणसमीपमिहा
सु गतः॥तदागमनवेलायामशोकवनिकां प्रियां॥५६॥उत्पाट्य राक्षसांस्तत्र
बहून्हत्वाक्षणादहं॥रावणस्य सुतं हत्वा रावणेनाभिभाष्य च॥५७॥लंका
मयाप्येषा दग्धा पुनरप्यागमं क्षणात्॥श्रुत्वा हनुमतो वाक्यं रामोप्याह प्रहृ
ष्टधीः॥५८॥हनुमता कृतं कार्यं देवैरपि सुदुष्करं॥उपकारं न पश्यामि त
व प्रत्युपकारिणः॥५९॥इदानीं ते प्रयच्छामि सर्वस्वं मम मारुते॥इत्यालिं
गय समाकृष्य गाढं वानरपुंगवं॥६०॥सांद्रनेत्रो रघुश्रेष्ठः परां प्रीतिम
वाप सः॥हनुमंतमुवाचेदं राघवो भक्तवत्सलः॥६१॥परिरंभो हि मे लो
के दुर्लभः परमात्मनः॥अतस्त्वं मम भक्तोसि प्रियोसि हरिपुंगव॥६२॥
यत्पादपद्मयुगुलं तुलसीदलाद्यैः संपूज्य विष्णुपदवीमतुलां प्रयांति॥ते
नैव किं पुनरसौ परिरब्धमूर्ती रामेण वायुतनयः कृतपुण्यपुंजः॥
॥६३॥इति श्रीमद०उमा०सं०दे०पंचमः सर्गः॥५॥सुंदरकांड समाप्त॥छ॥
॥१००८॥ यथावद्भाषितं वाक्यं श्रुत्वा रामो हनुमतः॥उवाचानंतरं वाक्यं हर्षेण मह
तावृतः॥१॥छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कार्यंकृतंहनुमतादेवैरेवसुदुष्करं॥मनसापियदन्येनशक्यंनधरणीतले॥२॥
शतयोजनविस्तीर्णंलंघयेत्कःपयोनिधिं॥लंकांचराक्षसैर्गुप्तांकोवाधर्षयि
तुंक्षमः॥३॥भृत्यकार्यंहनुमताकृतंसर्वमशेषतः॥सुग्रीवस्येदृशोलोकेन
भूतोनभविष्यति॥४॥अहंचरघुवंशश्चलक्ष्मणश्चकपीश्वरः॥जानक्या
दर्शनेनाद्यरक्षितास्मोहनुमता॥५॥सर्वथासुकृतंकार्यंजानक्याःपरिमा
र्गणं॥समुद्रंमनसास्मृत्वासीदतीवचोमम॥६॥कथंनक्रझषाकीर्णंसि
मुद्रंशतयोजनं॥लंघइत्वारिपुंहत्वाकथंद्रक्ष्यामिजानकीं॥७॥श्रुत्वातुरामव
चनंसुग्रीवःप्राहराघवं॥समुद्रंलंघयित्वातुमहानक्रझषालयं॥८॥
लंकांचैवगमिष्यामोहनिष्यामोचरावणं॥चिंतांत्यजरघुश्रेष्ठचिंताका
र्यविनाशनी॥९॥एतान्पश्यमहाशूरान्सुरान्वानरपुंगवान्त्वत्प्रियार्थ
समुत्सुक्तानप्रविष्टुमपिपावकं॥१०॥समुद्रतरणेबुद्धिंकुरुप्रथमंततः॥दृष्टो
लंकांदशग्रीवंहतइत्येवमन्महे॥११॥नहिपश्याम्यहंकिंचित्त्रिषुलोकेषुरा
घव॥गृहीतधनुषोयस्तेतिष्ठेदभिमुखोरणे॥१२॥सर्वथानोजयोरामेभवि
ष्यतिनसंशयः॥निमित्तानिचपश्यामितथाभूतानिसर्वशः॥१३॥सुग्रीव
वचनंश्रुत्वाप्रशंसवीर्यसमन्वितं॥येनकेनप्रकारेणलंघयामोमहार्णवं॥१४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लंकास्वरूपं मे ब्रूहि दुःसाध्यं देवदानवैः॥ ज्ञात्वा तस्य प्रतीकारं गमिष्यामि कपी- ॥९०॥
श्वर॥१५॥ श्रुत्वा रामस्य वचनं हनुमान्विनयान्वितः॥ उवाच प्रांजलिर्दे-
व यथा पृच्छ ब्रवीमि ते॥१६॥ लंका दिव्यपुरी देव त्रिकूटशिखरे स्थिता॥
स्वर्णप्राकारसहिता स्वर्णाट्टालकसंस्थिता॥१७॥ परिघाभिः परिवृता प-
रीखाभिर्निर्मलोदकैः॥ नानाप्रवनशोभाढ्या दिव्यनादिभिरावृता॥१८॥
गृहैर्विचित्रशोभाढ्यैर्मणिस्तंभमयैः शुभैः॥ पश्चिमद्वारमासाद्य ग-
जवाहाः सहस्रशः॥१९॥ उत्तरे द्वारि तिष्ठंति साश्ववाहाः सपत्तयः॥
त्रिंशत्यर्बुदसंख्याकाः प्राच्यामपि तथैव च॥२०॥ रथिनो राक्षसा वीराः
द्वारं दक्षिणमास्थिताः॥ मध्यकक्ष्ये पृथक्संख्या नागजाश्वरथपत्तयः॥२१॥
रक्षयंति सदा लंकां नेगनास्त्रकुशलं प्रभो॥ संक्रमे विविधे लंकां शत-
घ्नीमिश्रसंयुतां॥२२॥ एवं स्थितेपि देवेश शृणु तत्वं विचेष्टितं॥ दश-
ननबलौघस्य चतुर्थांशो मयाहतः॥ दग्धा लंकापुरी स्वर्णप्राका-
रा कर्षिता मया॥ शतघ्न्यः संक्रमाश्चैव नाशिता मे रघूत्तम॥२४॥
देव सद्दर्शनाद्देव लंका भस्मीकृता भवेत्॥ प्रस्थानं कुरु देवेश गच्छामो

११२०२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लवणांबुधेः॥२५॥तीरं सह महावीरै र्वानरैर्घोषसमंततः॥अथाहनुमतोवाक्यं
मुवाच रघुनंदनः॥२६॥सुग्रीवसैनिकान्सर्वान्प्रस्थानायाभिचोदय॥इदा
नीमेव विजयो मुहूर्ते परिवर्त्तते॥२७॥अनिष्याम्यिच सीतां मे दक्षणाः
स्फुरते भुजः॥प्रयातु वाहिनी सर्वा वानराणां तरस्विनां॥२९॥अस्मि
न्मुहूर्त्ते गत्वाहं लंकां राक्षससंकुलां॥सप्राकारां सुदुर्द्धर्षां नाशयामि स
रावणां॥२८॥रक्षंतु युथपा सेनामग्रे पृष्ठे च पार्श्वयोः॥हनूमंतमथारु
ह्य गच्छामोग्रे गदं ततः॥३०॥आरुह्य लक्ष्मणोयातु सुग्रीवं हं मया सहा॥ग
जेंगवाक्षोहनुमान्मैंदो द्विविदमैवच॥३१॥नलो नीलः सुषेणश्च जांब
वांश्च तथापरे॥सर्वे गच्छंतु सर्वत्र सेनायाः शत्रुघातिनः॥३२॥इत्याज्ञा
प्य हरीन्रामः प्रतस्थे सह लक्ष्मणः॥सुग्रीवसहितो हर्षात्सेनामध्यग
तो विभुः॥३३॥वानरेंद्रनिभाः सर्वे वानराः कामरूपिणः॥स्वेलंतः परिग
र्जंतो जग्मुस्ते दक्षिणांदिशं॥३४॥भक्षयंतो ययुः सर्वे फलानि च मधु
नि च॥वयं नो राघवस्याग्रे हनिष्यामो च रावणं॥३५॥एवं ते वानरास्त्रे
ष्टाः गच्छंत्येतुल्लविक्रमाः॥हरिज्ञां सुधमानो तौ शुशुभाते रघुत्तमौ॥३६॥
नक्षत्रैः सेविते यद्वच्चंद्रसूर्यौ विवांबरे॥आवत्य पृथ्वीं कृत्स्नां जगाम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१०१०॥

महती चमूः॥३७॥ आस्फोटयंतः पुच्छाग्रानुद्वहंतश्च पादपान्॥ रोलानारो
हयंतश्च जग्मुर्मारुतवेगतः॥३८॥ असंख्यातास्य सर्वत्र वानराः परिपूरि
ताः॥ हृष्टास्ते जग्मुरव्यग्रे रामेण परिपालिताः॥३९॥ गताश्च मार्गे दिवारात्रं क
चिन्तोसज्जतः क्षणं॥ काननानि विचित्राणि पश्यन्मलयसह्ययोः॥४०॥
तं सह्यः समतिक्रम्य मलयं च तथा गिरिं॥ आययुश्चानुपूर्वेण समुद्रं भीम मु५
निस्वनं॥४१॥ अवतीर्य हनुमतः रामः सुग्रीवसंयुतः॥ सलिलाभ्यां समाश्वाय
रामो वचनमब्रवीत्॥४२॥ आगतास्मो वयं सर्वे समुद्रं मकरालयं॥ गंतो ना
गंतुमर्हा शक्यन्ति रुपायेन वानराः॥४३॥ अत्र सेनानिवेशोस्तु मंत्रयामो
स्तु तारणे॥ श्रुत्वा रामस्य वचनं सुग्रीवः सागरांतिके॥४४॥ महोच्छ्रतं त
रंगाढ्यं भीमस्वैन भयंकरं॥ अगाधं गगनाकारं सागरं वीक्ष्य दुःखि
ताः॥४५॥ तरिष्यामः कथं घोरं सागरं वरुणालयं॥ हंतव्योस्माभिरपि रघ
वरावयो राक्षसाधमः॥४६॥ इति चिंताकुलाः सर्वे रामपार्श्वे व्यवस्थि
ताः॥ रामः सीतामनुस्मृत्य दुःखेन महतान्वितः॥४७॥ विलप्य जा
नकीं सीतां बहुधा कार्यमानुषः॥ अद्वितीयश्चिदात्मकः परमात्मा ले
सनातनः॥४८॥ यस्तु जानाति रामस्य स्वरूपं तत्त्वतो जनः॥ ते

॥१०१०॥

217

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेन स्पृष्टानि दुखादि किमुतानंदमव्ययं ॥४९॥ दुखहर्षभयक्रोधक्रोधलोभम
दादयः ॥ अज्ञानलिंगान्येतानि कुतः संति चिदात्मनि ॥५०॥ देहाभिमानिनो
दुखं नादेहस्य परात्मनः ॥ संप्रसादे द्वयाभावात्सुखमात्रं हि दृश्यते ॥५१॥ बु
द्ध्याद्यभावात्संसुप्तौ दुखं तत्र न दृश्यते ॥ अतो दुखादिकं सर्वं बुद्धेर्वचने
संशयः ॥५२॥ रामः परात्मा पुरुषः पुराणो नित्योदितो नित्यसुखो निरीहः ॥
तथापि मायागुणसंगतोसौ सुखीव दुखीव विभाव्यते बुधैः ॥५३॥ इति श्री
मदध्या॰ उ॰ युद्धकांडे प्रथमः सर्गः ॥१॥ लंकायां रावणो दृष्ट्वा लंकार्यं
हनुमता ॥ दुष्करं दैवतैर्वापि ह्रिया किंचिदवाङ्मुखः ॥१॥ आहूय मं
त्रिणः सर्वानिदं वचनमब्रवीत् ॥ हनूमता कृतं कर्म भवद्भिर्दृष्टमेव च ॥२॥ प्र
विश्य लंकां दुर्धर्षां दृष्ट्वा सीतां दुरासदां ॥ हत्वा च राक्षसान्वीरानक्षं मंदोदरी
सुतं ॥३॥ दग्ध्वा लंकामशेषेण लंघयित्वा च सागरं ॥ युष्मान्सर्वानतिक्रम्य
स्वस्थो गात्पुनरेव सः ॥४॥ किं कर्तव्यमितोस्माभिर्यूयं मंत्रविशारदः ॥
मंत्रयध्वं प्रयत्नेन यत्कृतं मे हितं भवेत् ॥५॥ रावणस्य वचः श्रुत्वा राक्षसा
स्तमथाब्रुवन् ॥ देव शंका कुतो रामात्तव लोकजितो रणे ॥६॥ इंद्रस्तु बद्धो
निक्षिप्तः पुत्रेण तव पत्तने ॥ जीत्वा कुबेरमानीय पुष्पकं भुज्यते त्वया ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यमो जितः कालदंडाद्युयं नाभूत वप्रभो वरुणो हुं कृतेनैव जितः सर्वेपि राक्ष १०११
साः ॥८॥ मयो माहासुरो प्रीत्या कन्यां दत्वा स्वयं नव ॥ तद्वरो वर्त्तने द्यापि किमुनान्य
माहासुराः ॥ ९ ॥ हनूमाधर्षणं यत्कृतं देवत्वाद्यत्तं च नः ॥ वानरो यं किमस्माकमस्मि
न्योरूषद्दर्शने ॥ १० ॥ ईदृक्रूपे स्थितमस्माभिर्दूषयंतेन किंभवेत् ॥ वयं प्रमत्ताः किं
तेन वंचिता स्मो हनूमता ॥ ११ ॥ जानीमो यदि तं सर्वे कथं जीवन्नाभिष्यति ॥ अत्राप
यज्जगत्कृत्स्नमवारेण रमानुषं ॥ १२ ॥ कृत्वा यास्यामहे सर्वे प्रत्येकं वा नियोज
य ॥ कुंभकर्णस्तदा प्राह रावणो राक्षसेश्वरं ॥ १३ ॥ आरब्धं च यथा कर्म स्वात्म
नाशाय केवलं ॥ न दृष्टोसि तदा भाग्यात् रामेणो महात्मना ॥ १४ ॥ यदि पश्यति रा
मस्त्वां जीवन्नायासि रावण ॥ रामो न मानुषो देवः साक्षान्नारायणोव्ययः ॥ १५
सीता भगवती लक्ष्मी रामपत्नी यशस्विनी ॥ राक्षसानां विनाशाय त्वयानीता
सुमहा ॥ १६ ॥ विषपीडं मिवागीर्य माहासीनो यथा तथा ॥ अनीता जानकी पश्चात्
त्वया विंवा भविष्यति ॥ १७ ॥ यद्यप्यनुचितं कर्म त्वया कृतमजानता ॥ सर्वं क्षमं
करिष्यामि स्वस्थचित्तो भव प्रभो ॥ १८ ॥ कुंभकर्णवचः श्रुत्वा वाक्यमिंद्रजि
दब्रवीत् ॥ देहि देव ममानुज्ञां हत्वा रामं सलक्ष्मणं ॥ १९ ॥ सुग्रीवं वानरांश्चै
व पुनरायास्य लेक्षणात् ॥ तत्रागतो भागवतप्रधानो विभीषणो बुद्धिमतां
॥१०११ वरिष्ठः ॥ श्रीरामपादद्वयएकतानः प्रणम्य देवारिमुपोपविष्टः ॥ २० ॥ वि

२१९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विलोक्य कुंभमप्रवादिदेसान्मत्तः प्रमत्तानतिविस्मयेन॥ विलोक्य कामातुर
मप्रमत्तो दशाननं प्राह विशुद्धबुद्धिः॥२१॥ न कुंभकर्णेंद्रजितौ च राजन् तथा मा
हापार्श्वमहोदरौ तौ॥ निकुंभकुंभौ च तथातिकायः स्थातुं न शक्ता युधि राघ
वस्य॥२२॥ सीताभिधानेन महाग्रहेण ग्रस्तोसि राजन् न च ते विमोक्षः॥ तामेव
सत्कृत्य महाधनेन दत्वाभिरामाय सुखी भव त्वं॥२३॥ यावन्न रामस्य शिताः शि
लीमुखाः॥ लंकामभिव्याप्य शिरांसि रक्षसां॥ छिंदंति तावद्रघुनायकस्य भा
र्यां जानकीं त्वं प्रतिदातुमर्हसि॥२४॥ यावन्न गावाक्षः कपयो महाबलाः हरींद्रतुल्या
नखदंष्ट्रायुधिनः॥ लंकां समाक्रम्य विनाशयंति तावद्द्रुतं देहि रघूत्तमाय॥२५ तौ
जीवन्न रामेण विमोक्ष्यसे त्वं गुप्तः सुरेंद्रैरपि शंकरेण॥ न देवराजांकगतो न
मृत्योः पातालकानपि संप्रविष्टः॥२६॥ सुमंगलं पवित्रं च बिभीषणवचः
खलः॥ प्रतिजग्राह नैवासौ म्रियमाण इवौषधं॥२७॥ कालेन चोदितो दै
त्यो बिभीषणमथाब्रवीत्॥ मित्रभावेन शत्रुर्मे जातो नास्त्येव संशयः॥२९
अनार्यनिकृतघ्नेन संगतिर्मे न युज्यते विनाशमभिकांक्षंति ज्ञातीनां ज्ञातयः
सदा॥३०॥ योन्यस्त्वेवंविधं ब्रूयात् हन्यामेतां निशाचर॥ हन्मि त्वस्मिन् क्षणेनैव
धिक्त्वां रक्षःकुलाधमं॥३१॥ रावणेनैवमुक्तस्तु परुषं स बिभीषणः॥
उत्पपात सभामध्यात् गदापाणिर्महाबलः॥३२॥ चतुर्भिर्मंत्रिभिः सार्द्धं

मु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१०१२

गगनस्थोऽब्रवीद्वचः॥ क्रोधेन महताविष्टो राक्षसं दृष्ट्वा क्रूरं॥३३॥ मा विनाशा
मुपेहीति प्रियवादिनमेव मां॥ धिक् क्रूराश्चि वृथा मां त्वं जेष्टो भ्रातापितुः समः॥३४॥
कालो राघवरूपेण जातो दशरथालये॥ कालीनामभिधानेन जाता जनककर्म
दीरे॥३५॥ तावुभावागतौ तत्र भूमेर्भारापनुत्तये॥ तेनैव प्रेरितस्त्वं तु न
भृणोषि हितं मम॥३६॥ श्रीरामः प्रकृते साक्षात्परस्तात्सर्वदा स्थितः॥ ब
हिरंतश्च भूतानां स सर्वः सर्वत्र संस्थितः॥३७॥ नामरूपादिभेदेन तत्त
न्मयइवामलः॥ यथा नानाप्रकारेषु वृक्षेष्वेको महाबलः॥३८॥ तत्तदास
क्तिभेदेन विद्यते ज्ञानचक्षुषा॥ पंचाकोशादिभेदेन तत्तद्रूप इवोच्यते॥३९॥
नीलपीतादियोगेन निर्मलः स्फटिको यथा॥ स एव नित्यमुक्तोऽपि स्वमा
यागुणबिंबितः॥४०॥ कालः प्रधानं पुरुषोऽव्यक्तं चेति चतुर्विधः॥ प्रधान
पुरुषाभ्यां सजगत्कृत्स्नं सृजत्यजः॥४१॥ कालरूपेण कलतां जगतः कुरुते
व्ययः॥ कालरूपी स भगवान् मेरोरूपेण मायया॥४२॥ ब्रह्मणा प्रार्थितो देव
स्तवार्थमिहागतः॥ देते न्यथा कथं कुर्यात्स संकल्पं रघूत्तमः॥४३॥ हनि
ष्यति त्वां रामस्तु सपुत्रबलवानहो हस्मानं नराक्रामि दृष्टुं रामे पाराव
१०१२॥ णा॥४४॥ त्वां राक्षसकुलं कृत्स्नं तेनो गमिरा घवं॥ मयि यानेसुरवीप्सता

220

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रामस्य भुवने चिरं॥४५॥बिभीषणो रावणबाध्यतःक्षणाद्वि सृज्य सर्वस्वमपरि
छदं गृहं॥जगाम रामस्य पदारविंदयोः सेवाभिकांक्षी परिपूर्णमानसः॥४६॥
॥इतिश्रीमद०उमा०युद्धकांडे द्वितीयः सर्गः॥२॥बिभीषणो महाभागश्च
तुर्भिर्मंत्रिभिः सह आगत्य गगने राम संमुखे समवस्थितः॥१॥उच्चैरुवा
च भोस्वामिन् राम राजिवलोचन॥रावणस्यानुजो हं ते दारहर्त्तुर्बिभी
षणः॥२॥नाम्नाहं तेन निरस्तोहं त्वामेव शरणं गतः॥हितमुक्तं मया देव
तस्यैवाविहितात्मनः॥३॥सीतां रामाय वैदेहीं प्रेषयेति पुनः पुनः॥उक्तो
पि नष्टचेतोसौ कालपाशवशं गतः॥४॥हंतुं मां खड्गमादाय प्राद्रवद्रा
क्षसाधमः॥ततोचिरेण सचिवैश्चतुर्भिः सहितोभयात्॥५॥त्वामेव भ
वमोक्षाय मुमुक्षुः शरणं गतः॥बिभीषणवचः श्रुत्वा सुग्रीवो वाक्य
मब्रवीत्॥६॥विश्वासार्हो न ते राम मायावी राक्षसाधमः॥सीताहर्तुर्वि
शेषेण रावणस्यानुजो बली॥७॥मंत्रिभिः सायुधैरस्मान्विवरे हंनिष्य॰ स
त्ति॥तदाज्ञापय मे देव वानरैर्हन्यतामिमं॥८॥ममैवं भाति ते राम बुध्या किं
निश्चितं वद॥श्रुत्वा सुग्रीववचनं रामः सस्मितमब्रवीत्॥९॥यदीच्छा
मि कपिश्रेष्ठ लोकान्सर्वान्सहेश्वरान्॥निमिषार्द्धेन संहत्यात्सृजामि च नि

२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१०९२

मेषनः॥१०॥ अतो मया भयं दत्तं शीघ्रमानय राक्षसं॥ सकृदेव प्रपंन्याय तव
चास्मीति याचते॥११॥ अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम॥ रामस्य वचनं श्रु
त्वा सुग्रीवो हृष्टमानसः॥१२॥ बिभीषणमथानाय्य दर्शयामास राघवं॥ बिभी
षणस्तु साष्टांगं प्रणिपत्य रघूत्तमं॥१३॥ हर्षगद्गदया वाचा भक्त्या च प
रयान्वितः॥ रामं श्यामं विशालाक्ष्यं प्रसंन्नमुखपंकजं॥१४॥ धनुर्बाण
धरं रंगं तं लक्ष्मणेन समन्वितं॥ कृतांजलिपुटो भूत्वा स्तोतुं समुपचक्र
मे॥१५॥ बिभीषण उवाच॥ नमस्ते राम राजेंद्र नमः सीतामनोरम॥ नम
स्ते चंडकोदंड नमस्ते भक्तवत्सल॥१६॥ नमोनंताय शांताय रामायामि
ततेजसे॥ सुग्रीवमित्राय ते रघूणां पतये नमः॥१७॥ जगदुत्पत्तिना
शानां कारणाय महात्मने॥ त्रैलोक्यगुरवेनादिगृहस्थाय नमो नमः॥१८॥
त्वमादिर्जगतां राम त्वमेव स्थितिकारणं॥ त्वमंते निधनं स्थानं स्वेच्छाचा
रस्त्वमेव हि॥१९॥ चराचराणां भूतानां बहिरंतश्च राघव॥ व्याप्यव्यापक
रूपेण त्वं भासि जगन्मयः॥२०॥ त्वन्मायया हृतज्ञाना नष्टात्मानो वि
॥१०९३ चेतसः॥२१॥ गतागतं प्रपद्यंते पापपुण्यवशात्सदा॥ तावत्सत्यं जग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्भूतिमुक्तिकारजनैर्यथा ॥ यावन्न ज्ञास्यसे ज्ञानं चेतसा नान्यगामिना ॥ २२ ॥ तद
न्तानास्तिदा भक्ताः पुत्रदारगृहादिषु ॥ रमंते विषयान्सर्वानंते दुःखनरान्विभो ॥ २३ ॥
त्वमिंद्रोग्निर्यमो रक्षो वरुणश्च तथानिलः ॥ कुबेरश्च तथा रुद्रो त्वमेव पुरु
षोत्तम ॥ २४ ॥ त्वं मणोरणीयांश्च स्थूलात्स्थूलतरः प्रभो ॥ त्वं पितासर्व
लोकानां माता धाता त्वमेव हि ॥ २५ ॥ आदिमध्यांतरहितः परिपूर्णोच्युतो
व्ययः ॥ त्वं पाणिपादरहितश्चक्षुःश्रोत्रवर्जितः ॥ २६ ॥ श्रोता द्रष्टा गृहीता च
जवनस्त्वं स्वछंदरोषतः ॥ कोशेभ्यो व्यतिरिक्तस्त्वं निर्गुणो निरुपाश्रयः ॥ २७ ॥
निर्विकल्पो निर्विकारो निर्ममायश्च निरीश्वरः ॥ षड्भावरहितो नादिपुरुषः
प्रकृतेः परः ॥ २८ ॥ मयया गुह्यमानस्त्वं मनुष्य इव भाषसे ॥ ज्ञात्वा त्वां निर्गुण
मजं वैष्णवा मोक्षगामिनः ॥ २९ ॥ अहं त्वत्पादसद्भक्तिनिःश्रेणीं प्राप्य राघव ॥
इच्छामि ज्ञानयोगाख्यं सौख्यमारोढुमीश्वर ॥ ३० ॥ नमः सीतापते राम नमः
कारुणिकोत्तम ॥ रावणारे नमस्तेस्तु त्राहि मां भवसागरात् ॥ ३१ ॥ ततः प्रस
न्नः प्रोवाच श्रीरामो भक्तवत्सलः ॥ वरं वृणीष्व भद्रं ते वांछितं वरदो
स्म्यु स्म्यहं ॥ ३२ ॥ विभीषण उवाच ॥ धन्योस्मि कृतकृत्योस्मि कृतकार्योस्मि
राघव ॥ ३३ ॥ त्वत्पाददर्शनादेव विमुक्तोस्मि न संशयः ॥ ३३ ॥ नास्ति मत्स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।२०१४॥

दत्तो धन्यो नास्ति मत्सदृशः शुचिः॥ नास्ति मत्सदृशो लोके राम त्वन्मन्नि दर्शनात्तु॥३४॥
कर्मबंधविनाशाय यत्स्यात् ज्ञानं भक्तिलक्षणं॥ विज्ञानं परमार्थं च देहि मे रघुनं
दन॥३५॥ न याचे राम राजेंद्र सुखं विषयसंभवं॥ त्वत्पादकमले सक्ता भक्तिरे
व सदास्तु मे॥३६॥ ओमित्युक्त्वा पुनः प्रीतो रामः प्रोवाच राक्षसं॥ शृणु वक्ष्या
मि ते भद्र रहस्यं मम निश्चितं॥३७॥ मद्भक्तानां प्रशांतानां योगिनां वित
रागिणां॥ हृदये सीतया नित्यं वसाम्यत्र न संशयः॥३८॥ तस्मात्त्वं सर्वदा शां
तः सर्वकल्मषवर्जितः॥ मां ध्यात्वा मोक्ष्यसे नित्यं घोरसंसारसागरात्॥३९॥
स्तोत्रमेतत्पठेद्यस्तु लिखेद्वा शृणुयादपि॥ मत्प्रीतये ममाभिष्टं मम सा
रूप्यमाप्नुयात्॥४०॥ इत्युक्त्वा लक्ष्मणं प्राह श्रीरामो भक्तिभक्तिमान्॥
पश्यत्विदानीमेवैष मम संदर्शने फलं॥४१॥ लंकाराज्येभिषुंच्याग्निं जल
मानय सागरात्॥ यावच्चंद्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी॥४२॥ याव
न्मम कथा लोके तावद्राज्यं करोत्वसौ॥ इत्युक्त्वा लक्ष्मणेनाभ्येरानाय्य क
लशैर्जलं॥४३॥ लंकाराज्याधिपत्यार्थमभिषेकं रमापतिः॥ कारया
मास सचिवैर्लक्ष्मणेन विशेषतः॥४४॥ साधु साध्विति ते सर्वे वानरा
स्तुष्टुवुभ्रं रां सुग्रीवोपि परिष्वज्य बीभीषणमथाब्रवीत्॥४५॥

२०१४

४२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विभीषणावयं सर्वे रामस्य परमात्मनः॥ किंकरास्तत्र मुख्यस्त्वं भक्त्या रामपरिग्र
हात्॥४६॥ रावणस्य विनाशे त्वं साहाय्यं कर्तुमर्हसि॥ बिभीषण उवाच॥ अहं कि
यान्सहायस्त्वं रामस्य जगतिपते॥ किंतु दास्यं करिष्येहं भक्त्या शक्त्या यथामत॥४७॥
दशग्रीवेण संदिष्टः शुको नाम माहासुरः॥ संस्थितो ह्यंबरे वाक्यं सुग्रीवमि
दमब्रवीत्॥४८॥ त्वामाह रावणो राजा भ्रातरं राक्षसाधिपः॥ माहाकुलप्रसु
तस्त्वं राजासि वनचारिणां॥४९॥ मम भ्रातृसमानस्त्वं तव नास्त्यर्थविप्लुतः॥
अहं यद्यहरं भार्यां राजपुत्रस्य किं तव॥५०॥ किष्किंधां याहि हरिभिर्लंकां
शक्या न देवतैः॥ प्राप्तुं किं मानवैरल्पसारैर्वानरयूथपैः॥५१॥ तं प्राप्य यु
तं वचनं तूर्णि शुश्रूत्स्व वानरः॥ प्राप्यद्य ततदाक्षिप्य निहंतं दृढमुष्टिभिः॥५२॥
वानरैर्हन्यमानस्तु शुको राममथाब्रवीत्॥ न दूतान्हंति राजेंद्र वानरान्वा
नरप्रभो॥५३॥ रामः श्रुत्वा तदा वाक्यं शुकस्य परिवेदितं॥ मा वधिष्ठेति रा
मस्तान्वारयामास वानरान्॥५४॥ पुनरंबरमासाद्य शुकः सुग्रीवमब्रवी
त्॥ ब्रूहि राजन्दशग्रीवं किं वक्ष्यामि व्रजाम्यहं॥५५॥ सुग्रीव उवाच॥ यथा
वाली मम भ्राता तथाहं राक्षसाधम॥ हंतव्यस्त्वं मया यत्नात्सपुत्रबल
वाहनः॥५६॥ ब्रूहि नेमे रामस्त्वं दुःस्पर्शी हि त्वा कयास्यसि॥ ततो रामाज्ञया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धृत्वा शुकं बध्वान्यरक्षयत् ॥५७॥ शार्दूलोपि ततः पूर्वं दृष्ट्वा कपिबलं महत् ॥ यथा ।२०१५
वत्कथयामास रावणाय स रावणः ॥५८॥ दीर्घचिंतापरो भूत्वा निश्वसन्नास मंदिरे ॥
ततः समुद्रमावेक्ष्य रामो रक्तांतलोचनः ॥५९॥ पश्य लक्ष्मण दुष्टोसौ वारिधिर्मामुपा
गतं ॥ नाभिनंदति दुष्टात्मा दर्शनार्थं ममार्घ्यं मे ॥६०॥ जानाति मानुषोयं मां किं क
रिष्यति वानरैः ॥ अद्य पश्य महाबाहो शोषयिष्यामि वारिधिं ॥६१॥ पादेनैव
गमिष्यंति वानरा विगतज्वराः ॥ इत्युक्त्वा क्रोधताम्राक्षः आरोपितधनुर्ध
रः ॥६२॥ तूणीराद्बाणमादाय कालाग्निसदृशप्रभः ॥ संधाय चापमाकृष्य
रामो वाक्यमथाब्रवीत् ॥६३॥ पश्यंतु सर्वभूतानि रामस्य शरविक्रमं ॥ इ
दानीं भस्मसात्कुर्यां समुद्रं सरितां पतिं ॥६४॥ एवं ब्रुवति रामे तु सशैलव
नकानना ॥ चचाल वसुधा द्यौश्च दिशश्च तमसावृताः ॥६५॥ चुक्षुभे सा
गरो वेलां भयाद्योजनमत्यगात् ॥ तिमिनक्रझषा मीनाः प्रतप्ताः परितत्र
सुः ॥६६॥ एतस्मिन्नंतरे साक्षात्सागरो दिव्यरूपधृक् ॥ दिव्याभरणसंप
न्नः स्वभासा भासयन् दिशः ॥६७॥ स्वांतस्थदिव्यरत्नानि पाणिभ्यां परिगृ
ह्य सः ॥ पादयोः पुरतः क्षिप्त्वा रामस्योपायनं बहु ॥६८॥ दंडवत्प्रणिपत्याह
।२०१५ रामं रक्तांतलोचनं ॥ त्राहि त्राहि जगन्नाथ राम त्रैलोक्यरक्षक ॥६९॥
अहोहं राम ते सृष्टः सृजता निखिलं जगत् ॥ स्वभावमन्यथा कर्तुं कः शक्तो

२२८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवनिर्मितं॥७०॥स्थूलानि पंचभूतानि जायंते वस्वभावतः॥ निर्गुणस्त्वं नि
प्रभो राकारो यदा मायायो गुणान्वी॥७१॥ लीलयांगीकरोषि त्वं तदा ते राजवान् प्रभो॥
गुणात्मनो विराजस्य सत्वाद्देवा बभूविरे॥७२॥ रजोगुणात्प्रदक्षाद्या मन्योर्भूत
पतिस्तव॥ त्वामहं मायया छन्नं लीलया मानुषाकृतिं॥७३॥ जडबुद्धिर्जडो
मुर्खः कथं जानामि निर्गुणं॥ दंड एव हि मुर्खाणां सन्मार्गे प्रापकः प्रभुः॥७४॥
प्रभूणाममरश्रेष्ठ पशूनां लकुटो यथा॥ शरणं ते व्रजामि त्वां शरण्यं भक्त
वत्सल॥७५॥ अभयं देहि मे राम लंकामार्गं ददामि ते॥ श्रीराम उवाच॥ अमो
यं मामको बाणः कस्मिन्देशे निपात्यतां॥ लक्ष्यं दर्शय मे शीघ्रं बाणस्यामोघपा
तिनः॥७६॥ रामस्य वचनं श्रुत्वा करे धृत्वा महाशरं॥ महोदधिर्महातेजा
राघवं वाक्यमब्रवीत्॥७७॥ रामोत्तरप्रदेशे तु द्रुमकुल्य इति श्रुतः॥ प्र
देशस्तत्र बहवः पापात्मानो दिवानिशं॥७८॥ बाधंते मां रघुश्रेष्ठ तत्र ते
पात्यतां शरः॥ रामेण सृष्टो बाणस्तु क्षणादाभीरमंडलं॥७९॥ हत्वा पुनः
समागत्य तूणीरे पूर्ववत्स्थितः॥ ततोऽब्रवीद्रघुश्रेष्ठं सागरो विनयान्वितः॥८०॥
नलः सेतुं करोतु अस्मिन्जले मे विश्वकर्मणः॥ सुतो धीमान्समर्थोऽस्मिन्का
र्ये लब्धवरो हरिः॥८१॥ कीर्तिं जानंतु ते लोकाः सर्वलोकमलापहां॥ र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृत्का राघवं नलाय येयो सिंधुरदस्यत ॥८॥ ततो रामस्तु सुग्रीवलक्ष्मणाभ्यां स
मन्वितः ॥ नलमाज्ञापयन्सैन्यसीघ्रं वानरैः सेतुबंधने ॥ ९ ॥ ततोतिहृष्टः प्लव
गेंद्र यूथपैर्महानगेंद्रप्रतिमैर्युतो नलः ॥ बबंध सेतुं शतयोजनायतं सु
विस्तरं पर्वतपादपैर्दृढं ॥ १० ॥ इति श्री० उमा० लंकाकांडे तृतीयः सर्गः ॥ ३ ॥
सेतुमारभ्यमानस्तु तत्र रामेश्वरं शिवं ॥ संस्थाप्य पूजयित्वाह रामो लो
कहिताय च ॥ १ ॥ प्रणामे सेतुबंधे दृष्ट्वा रामेश्वरं शिवं ॥ ब्रह्महत्यादि पा
पेभ्यो मुच्यते यदनुग्रहात् ॥ २ ॥ सेतुबंधे नरः स्नात्वा दृष्ट्वा रामेश्वरं हरं ॥
संकल्पनियतो भूत्वा गत्वा वाराणसीं नरः ॥ ३ ॥ आनीय गंगासलिलै रा
मेशमभिषिच्य च ॥ समुद्रे क्षिप्त तद्वारा ब्रह्मप्राप्नोत्यसंशयं ॥ ४ ॥ कृतानि
प्रथमेनान्हा योजनानि चतुर्दश ॥ द्वितीयेन तथा चान्हा योजनानां तु विंश
तिं ॥ ५ ॥ तृतीये तथा चान्हा योजनान्येकविंशतिं ॥ चतुर्थेन तथा चान्हा
द्वाविंशतिरिति स्मृतं ॥ ६ ॥ पंचमेन त्रयोविंशद्योजनान्येनानां समंत
तः ॥ बबंध सागरे सेतुं नलो वानरसंमतैः ॥ ७ ॥ ततेनैजगमुश्च कृ
॥२०७५ पयो योजनानां शतं दृढं ॥ असंख्याताः सुवेलाद्रिं रुरुहुः प्लवगेश्व
रव्या । राः ॥ ८५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आरुह्य मारुतिं रामो लक्ष्मणो प्यंगदं तथा ॥ दिदृक्षु राघवो लंकां मारुरोहा
चलं महत् ॥ ९ ॥ दृष्ट्वा लंकां सुविस्तीर्णां नानाचित्रध्वजाकुलां ॥ चित्रप्रा
सादसंबाधां स्वर्णप्राकारतोरणां ॥ १० ॥ परिखाभिः शतघ्नीभिः संक्रमैश्च विरा
जितं ॥ प्रासादोपरि विस्तीर्णप्रदेशे दशकंधरः ॥ ११ ॥ मंत्रीभिः सहितो वीरैः
किरीट दशकोज्वलः ॥ नीलाद्रिशिखराकारश्च कालमेघसमप्रभः ॥ १२ ॥ र
त्नदंडैश्छत्रसीतैरनेकैरुपशोभितैः ॥ एतस्मिन्नंतरे बद्धो मुक्तो रामेण वा
वैशुकः ॥ १३ ॥ वानरैस्ताडितः सम्यक् दशाननमुपागतः ॥ प्रहसन् रावणः
प्राह पीडितः किं करैः शुकः ॥ १४ ॥ सागरस्योत्तरे तीरे ब्रूवं तं वचनं तथा ॥ तत
उत्प्लुत्य कपयो गृहीत्वा मां क्षणात्तत ॥ १५ ॥ मुष्टिभिः र्नखदंष्ट्रैश्च हंतुं लोढुं प्र
चक्रमे ॥ ततो मां राम रक्षेति क्रोशंतं रघुपुंगवः ॥ १६ ॥ विसृज्यतामिति
प्राह विसृष्टोहं कपीश्वरैः ॥ ततोहमागतो भीत्या दृष्ट्वा तद्वानरं बलं ॥ १७ ॥ रा
क्षसानां बलौघस्य वानरेंद्र बलस्य च ॥ नैतयो विद्यते संधिर्देवदानवयो
रिव ॥ १८ ॥ पुनः प्राकारमायांति क्षिप्रमेकतरं कुरु ॥ सीतां वास्मै प्रय
च्छाशु युद्धं वादीयतां प्रभो ॥ १९ ॥ मामाह राम स्त्वं ब्रूहि रावणं मद्वचः शुक ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पद्बलं च समाश्रित्य सीतां मे हृतवानसि ॥२०॥ नद्दृरीय यथाकामं ससैन्यस्सह ॥१०७॥
बान्धवः ॥ श्वः काले नगरीं लंकां सप्राकारां सतोरणां ॥२१॥ राक्षसं च बलं पश्य
न्नानैर्विध्वंसितं मया ॥ घोरं रोषबलं मोक्ष्ये बलं धारय रावण ॥२२॥ इत्युक्त्वा पु
रमाष्य रामः कमललोचनः ॥ एकस्थानगता यत्र चत्वारः पुरुषर्षभाः ॥२३॥ श्री
रामो लक्ष्मणश्चैव सुग्रीवश्च बिभीषणः ॥ एवमेव समर्थास्ते लंकां नाश
यितुं प्रभो ॥२४॥ उत्साह्यमस्मीकरणे सर्वे तिष्ठंति वानराः ॥ तस्य याद्दक्कार्व्य ब
लं दृष्टं रूपं प्रहरणानि च ॥२५॥ वधिष्यंति पूरं सर्वे मुकस्तिष्ठतु तेन्नयः ॥ य
श्च्य वानरसेनाया समसंख्यातां प्रपूरीतां ॥२६॥ ये जंति वानरास्तत्र पश्य
पर्वतसंन्निभाः ॥ न शक्यास्ते गणयितुं प्रधान्येन ब्रवीमि ते ॥२७॥ ए
ष योभिमुखो लंकां नदन्न तिष्ठति वानरः ॥ यूथपानां सहस्त्राणां
शतेन परिवारितः ॥२८॥ सुग्रीवः सेनाधिपतिः नीलो नामाग्निनं
दनः ॥ एष पर्वतश्रृंगाभः पद्मकिंजल्कसंन्निभः ॥२९॥ स्फोटयस्य
ति संरब्धो लांगुलं च पुनः पुनः ॥ युवराजोंगदो नाम वालिपुत्रोति
॥१०७॥ वीर्यवान् ॥३०॥ येन दृष्टा जनकजा रामस्यातीव वल्लभः ॥ हनूमा

नेष विख्यातो हतो येन तत्मजः ॥३१॥ श्वेतो रजतसंकाशो महाबुद्धिपरा
क्रमः ॥ तूर्णं सुग्रीवमागत्य पुनर्गच्छति वानरः ॥३२॥ यस्त्वेषो सिंहसंकाशः
पश्यस बलविक्रमः ॥ रंभो नाम महासत्वो लंकां नाशयितुं क्षमः ॥३३॥ ए
ष पश्यति वेलंकां दिधक्षन्निव वानरः ॥ शरभो नाम राजेंद्र कोटियूथपना
यकः ॥३४॥ पनसश्च महावीर्यो मैंदश्च द्विविदस्तथा ॥ नलश्च सेतुक
र्ता सो विश्वकर्मसुतो बली ॥३५॥ वानराणां वर्णितेवा संख्या केवा कुरईश्व
रः ॥ शूराः सर्वे महाकायाः सर्वे युद्धाभिकांक्षिणः ॥३६॥ शक्ताः सर्वे च योधि
तुं लंकां रक्षोगणैः सह ॥ एतेषां बलसंख्यानं संक्षेपेण वच्मि ते शृणु ॥३७॥
येषां कोटिसहस्राणि नव पंच च सप्त च ॥ तथा शंखसहस्राणि तथार्बु
दशतानि च ॥३८॥ सुग्रीवसचिवानां ते बलमेतत्प्रकीर्तितं ॥ अन्ये
षां तु बलं नाहं वक्तुं शक्तोस्मि रावण ॥३९॥ रामो न मानुषो साक्षादादि
नारायणः परः ॥ सीता साक्षाज्जगद्धातु चिच्छक्तिर्जगदात्मिका ॥४०॥
तारूपमिव समुत्पन्नं जगत्स्थावरजंगमं ॥ तस्माद्रामश्च सीता च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जगतस्तुषष्ट्वसौ ॥४१॥ पितरो पृथिवी पात्रा नयोर्वैरं कथं भवेत् ॥ आज्ञान ॥२०१८॥
ताद्वयासिताज्जगन्मातेव जानकी ॥४२॥ क्षणनाशिनि संसारे शरीरे क्ष
णभंगुरे ॥ पंचभूतात्मके राजन् पंचविंशतितत्त्वके ॥४३॥ मलमांसास्थि
दुर्गंधमूत्रविष्टेहं शुतालये ॥ केवलस्तद्व्यतिरिक्तः स्वकार्ये तत्र जडात्मके ॥४४॥
सततं ब्रह्मसहत्यादि पातकानिरूतानि ते ॥ भोगभोक्तानुयो देहः स देहोऽत्र
पतिष्यति ॥४५॥ पुण्यपापे समायाते जीवे न सुखदुःखयोः ॥ कारयेद्देह
योगादि नात्माप्रकुरुते निरंतरं ॥४६॥ यावद्देहोऽस्मि कर्तास्मि ह्यमहं कुरु
ते वरागः ॥ मध्यास्तावद्देवस्याजन्मनाशादिसंभवः ॥४७॥ न देहस्य
ऊ स्वदेहादावभिमानं माहामते ॥ आत्मा हि निर्मलः शुद्धः विज्ञानात्मा
चलोऽव्ययः ॥४८॥ स्वाज्ञानेन वशतो बंधं प्रतिपद्य विमुह्यते ॥ तस्माद्
शुद्धभावेन ज्ञात्वात्मानं सदा स्मर ॥४९॥ विचरंति [illegible] जनाः सर्वे
पुत्रदारगृहादिषु ॥ निरयेष्वपि भोगः स्याद् शूकरतनावपि ॥५०॥
देहं लब्ध्वा विवेकाढ्यं द्विजत्वं च विशेषतः ॥ तत्रापि भारते वर्षे कर्म
भूम्ना सुदुर्लभं ॥५१॥ को विद्वानात्मसात्कृत्वा देहं भोगानुगो भवेत् ॥
२०१८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतस्त्वं ब्राह्मणो भूत्वा पौलस्त्य तनयोऽपि सन् ॥५२॥ अज्ञानीव सदा भोगा
ननुधावसि किं मुधा ॥ इतः परं वा त्यक्त्वा त्वं सर्वसंगसमाश्रयं ॥५३॥ राममेवै
व परात्मानं भक्तिभावेन सर्वदा ॥ सीतां समर्प्य रामाय तत्पादानुचरो भव ॥
॥५४॥ विमुक्तः सर्वपापेभ्यो विष्णुलोकं प्रयास्यसि ॥ नो चेद्गमिष्यसे यो
धः पुनरावृत्तिवर्जितः ॥५५॥ अंगीकुरुष्व मद्वाक्यं हितमेव वदामि ते ॥
सत्संगतिं कुरु भजस्व हरिं शरण्यं श्रीराघवं मरकतोपलकान्तिकान्तं ॥
सीतासमेतमतनिर्बद्धतचापबाणं सुग्रीवलक्ष्मणविभीषणसेवि
तांघ्रिं ॥५७॥ इति श्री० उमा० युद्धकांडे चतुर्थः सर्गः ॥४॥ ॥ श्रुत्वा शुक
मुखाद्गीतं वाक्यमज्ञानतां गतं ॥ रावणः क्रोधसंरक्तोऽदहन्निव त
मब्रवीत् ॥१॥ अनुजीव्यसि दुर्बुद्धे गुरुवद्भाषसे कथं ॥ अस्मान् शासितुमिते
न रक्षामि त्वां यद्यपि वधोचितं ॥ २ ॥ इतो गच्छ विमूढ त्वं मे वंशो तु न मे क्षमः ॥
महाप्रसाद इति कांक्षेवपमानो ययौ गृहं ॥ ४ ॥ शुकोऽपि ब्राह्मणः पूर्वं ब्रह्मि
ष्ठो ब्रह्मवित्तमः ॥ वानप्रस्थविधानेन वने तिष्ठन् स कर्मकृत् ॥५८॥
देवानामपि वृद्ध्यर्थं विनाशाय सुरद्विषां ॥ चराकपक्षवितत मवि च्छिन्नं

× शास्मि नाहं त्रिजगतां त्वं मां लक्ष्मण न लज्जसे ॥५२
१० × इदानीमेव हन्मि त्वां किं तु पूर्वं क्षमे तव ॥ × १०

।।२.१९।।

माहामतिः ।।६।। राक्षसानां विरोधेन शुको देवहितोद्यतः ।। वज्रदंष्ट्र इति ख्यातस्त
त्रैको राक्षसो महान् ।।७।। अंतरंप्रेप्सुराविष्टः शुकापकरणोद्यतः ।। कदाचिदागतोग
स्त्यस्तस्याश्रमपदं मुने ।।८।। तेन संपूजितोगस्त्यो भोजनार्थं निमंत्रितः ।। गतेस्ना
नं मुनौ कुंभसंभवे प्राप्य चांतरं ।।९।। अगस्त्यरूपधृक् सोपि राक्षसः शुकमब्र
वीत् ।। यदि दास्यसि मे ब्रह्मन् भोजनं देहि सामिषं ।।१०।। बहुकालं न भुक्तं मे
मांसं छागं गसंभवं ।। तथेति कारयामास मांसभोजनविस्तरं ।।११।। उप
विष्टे मुनौ भोक्तुं राक्षसो ग्लीव सुंदरं ।। शुकभार्यावपुर्धृत्वा तां वांतर्महिय
नवस्त्रः ।।१२।। नरमांसं तदा तस्मै सुपक्वं बहुविस्तरं ।। ददौ वीतर्दधे विप्र र
क्षस्तो दृष्ट्वा चुकोप सः ।।१३।। अमेध्यं मानुषं मांसमगस्त्यः शुकमब्रवी
त् ।। अभक्ष्यं मानुषं मांसं दत्तवानसि दुर्मते ।।१४।। मह्यं त्वं राक्षसो भव
तिष्ठ त्वं मानुषाशनः ।। इति शापभयः प्रोवाच याप्राहगस्त्यं मनेसया ।। दे
दानीं भाषितं मे द्युमांसं देहि विस्तरं ।।१५।। तथैव दत्तं मे देवकिं मेऽद्य
।।१-१९।। पं ददास्यसि ।। ध्यात्वा शुकस्य वचनं मुहूर्तं ध्यानमास्थितः ।। ज्ञात्वा रक्ष
हतं सर्वं ततः प्राह शुकं सुधीः ।।१७।। तवापकारिणा सर्वं राक्षसेन कृतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिद्धं॥ अविचार्यैवमेदत्तः शापस्तेमुनिसत्तम॥१८॥ तथापिमेवचोमोघमेवमे
वभविष्यसि॥ राक्षसंवपुरास्थायरावणस्यसाहाय्यकृत्॥१९॥ तिष्ठतावद्यु
दारामोदशाननवधायहि॥ आगमिष्यतिलंकायाःसमीपंवानरैःसह॥२०॥
प्रेषितोरावणेनत्वंचारोभूत्वारघूत्तमं॥ दृष्ट्वाशापाद्विनिर्मुक्तोबोधयित्वाचरा
वणं॥ तत्वज्ञानंततोमुक्तोपरंपदमवाप्स्यसि॥२१॥ इत्युक्तोगस्त्यमुनिनाशु
कोब्राह्मणसत्तमः॥२२॥ बभूवराक्षसःसद्योरावणंप्राप्यसंस्थितः॥ इदा
नींचाररूपेणदृष्ट्वारामंसानुजं॥२३॥ रावणंतत्वविज्ञानंबोधयित्वापुनर्द्वि
जं॥ पूर्ववद्ब्राह्मणोभूत्वास्थितोवैखानसैःसह॥२४॥ ततःसमागतोद्रष्टुंमा
वान्राक्षसोमहान्॥ बुद्धिमान्नीतिनिपुणोराज्ञोमातुःप्रियःपिता॥२५॥
प्राहतंराक्षसंवीरंसुप्रीतोवांतरात्मना॥ शृणुराजन्वचोमेयच्छ्रुत्वाकुरु
यथेप्सितं॥२६॥ यदाप्रविष्टानगरींजानकीरामवल्लभा॥ तदादिपुर्यांदृश्यं
तेनिमित्तानिदशानन॥२७॥ घोराणिनाशहेतूनितानिमेवदतःशृणु॥
रारेवस्तनितनिर्घोषामेघाःप्रतिभयंकराः॥२८॥ शोणितैर्वीर्भिर्विवर्षति
लंकामुपर्येवसर्वदा॥ सीदंतिदेवलिंगानिस्विद्यंतिप्रज्वलंतिच॥२९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१०२०

कालिकाः पांडुरैर्दंतैः प्रसरंत्यग्रसंस्थिताः ॥ खरा गोषु प्रजायंते मूषका नकुलैः
सह ॥ ३३ ॥ मार्जारेण तु युध्यंति पन्नगा गरुडेन च ॥ करालो विकटो मुंडः पुरुषः
कृष्णपिंगलः ॥ ३१ ॥ कालो गृहाणि सर्वेषां काले काले त्वपेक्षते ॥ एतान्य
न्यानि दृश्यंते निमित्तान्युद्भवंति च ॥ ३२ ॥ अतः कुलस्य रक्षार्थं शांतिं कुरु
दशानन ॥ सीतां सत्कृत्य सधनां रामायाशु प्रयच्छ भो ॥ ३३ ॥ रामं नारायणं विद्धि
विद्वेषं त्यज राघवे ॥ मत्प्रसादकृतमाश्रित्य ज्ञानिनो भवसागरं ॥ ३४ ॥ तरंति भक्ति
पूतांतास्ततो रामो न मानुषः ॥ भजस्व भक्तिभावेन रामं सर्वहृदालयं ॥ ३५ ॥ मुद्ध
पिहं दुराचारोऽकृपापूतोऽभविष्यसे ॥ मद्वाक्यं कुरु राजेंद्र कुलं कोऽत्र लहेत वै ॥ ३६ ॥
ततो मात्मवतो वाक्यं हितमुक्तं दशाननः ॥ नमर्षयत्ति दुष्टात्मा कालस्य व
रा शमागतः ॥ ३७ ॥ मानवं रूपपां राममेकाग्गरवामगाश्रयं ॥ समर्थं मन्यसे
केन हीनमुक्तं मुनिप्रियं ॥ ३८ ॥ रामेण प्रेषितो नूनं भाषसे त्वमनर्गलं ॥ गच्छ
वृद्धोसि बंधुस्त्वं सोढुं सर्वं वयोदितं ॥ ३९ ॥ इतो महत्पदवीं दहत्वेव नचरः
स्तव ॥ इत्युक्त्वा सर्वसचिवैः सहितः प्रस्थितस्तदा ॥ ४० ॥ प्रासादाग्रे स
मासीनोपविश्य त्वा नरसैनिकान् ॥ युद्धाय योजयन्सर्वराक्षसान्समुपस्थि
तः ॥ ४१ ॥ रामोऽपि धनुरादाय लक्ष्मणेन समाहतं ॥ दृष्ट्वा रावणमासीनं को

१०२०

236

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पिनकलुषीकृतः ॥४२॥ किरीटिनं समासीनं मंत्रिभिः परिवेष्टितं रावणं काकु
निमेनैव बाणेनैकेन राघवः ॥४३॥ म्वितछत्रसहस्राणि किरीटदशकं नृ नू
था ॥ चिछेद निमिषार्द्धेन तद्द्भुतमिवाभवत् ॥४४॥ तर्ज्जितो रावणस्तूर्णं वि
वेशभवनं स्वकं आहूय राक्षसान्सर्वान् प्रहस्तप्रमुखान्बलः ॥४५॥ वानरैः
सह युद्धाय चोदयामास सत्वरः ॥ ततो भेरीमृदंगाद्यैः पणवानकगोमुखैः ॥ १६
सिंहै महिषोष्ट्रैः खरैः सर्वैः द्विपिभिः हृतवाहनः ॥ खड्गमुसलधनुष्याश्च यष्टितोमर
शक्तिभिः ॥४७॥ लक्षिताः सर्वतो लंकाप्रतिद्वारमुपाययुः ॥ तत्सर्वमेव रामे
ण चोदिता वानरर्षभाः ॥४८॥ उद्धृत्य गिरिशृंगाणि शिखराणि महांति च
तरूंश्चोत्पाट्य विविधान्युद्धाय हरियूथपाः ॥४९॥ प्रेक्षमाणा रावणस्य ता
न्यनीकानि भागशः ॥ राघवप्रियकामार्थं लंकामारुरुहुस्तदा ॥५०॥ ते द्रुमैः
पर्वताग्रैश्च मुष्टिभिश्च प्लवंगमाः ॥ ततः सहस्रयूथाश्च कोटियूथाश्च यू
थपाः ॥५१॥ कोटीशतयूथाश्च रुरुधुर्नगरं भृशं ॥ अप्लवंतः प्लवंतश्च
गर्जंतश्च प्लवंगमाः ॥५२॥ रामो जयत्यतिबलो लक्ष्मणश्च महाबलः ॥ राजा
जयति सुग्रीवो राघवेनाभिपालितः ॥५३॥ इत्येवं घोषयंतश्च समं युयुधिरे
रिभिः ॥ हनूमानंगदश्चैव कुमुदो नील एव च ॥५४॥ नलश्च शरभश्चैव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैंदो द्विविद एव च ॥ जांबवान्दधिवक्त्रश्च केसरी तार एव च ॥ ५५ ॥ अन्ये च बलि
नः सर्वे यूथपाश्च प्लवंगमाः ॥ द्वाराण्याप्लुत्य लंकायाः सर्वतो रुरुधुस्तदा ॥ ५६ ॥
तदा वृक्षैर्महाकायाः पर्वताग्रैश्च वानराः ॥ विजघ्नुस्तानि रक्षांसि नखैर्दंतैश्च
वेष्टिताः ॥ ५७ ॥ राक्षसाश्च तदा भीता द्वारेभ्यः सर्वतो रुषा ॥ निर्गच्छंति दि
पालैश्च खड्गैः शूलैः परश्वधैः ॥ ५८ ॥ निजघ्नुर्वानरानीकं महाकाया महा
बलाः ॥ राक्षसांश्च तथा जघ्नुर्वानरा जितकाशिनः ॥ ५९ ॥ तथा बभूव सम
कर्दमशो रोमांसमांसशोणितकैः ॥ रक्षसां वानराणां च संबभूवाद्भुतोपमः ॥ ६० ॥
णितेन ते हयैश्च गजैश्चैव रथैः कांचनसंनिभैः ॥ राक्षसान्वानरान्जघ्नुः वान
राश्चैव राक्षसान् ॥ ६१ ॥ रामेण विहता दृष्ट्वा हरयो दिविसंअंजाः ॥ रघु ॐ
र्बलिहृष्टास्तथा चीताम नाद्रवा ॥ ६२ ॥ तोसौ भिमर्षपापेन रावणे
नाभिपालितान् हतश्रीकान् हृतबलान् राक्षसानजघ्नुरोजसा ॥ ६३ ॥
चतुर्थांशावशेषेण निहतं राक्षसं बलं ॥ स्वसैन्ये निहतं दृष्ट्वा मेघनादो
तीदुष्टधीः ॥ ६४ ॥ ब्रह्मदत्तवरः श्रीमानंतर्धानं गतो सुरः ॥ सर्वास्त्रकुश
१२०२७॥ लीञोग्नि ब्रह्मास्त्रेण समंततः ॥ ६५ ॥ नानाविधानि शस्त्राणि वानरा

238

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नीकमर्दयन्॥ ववर्षशरजालानितदद्भुतमिवाभवत्॥६६॥ रामोप्यमानयन्ब्रा
स्त्रमस्त्रविदांवरः॥ क्षणेनतल्लीसुपासार्थददर्शपतितंबलं॥६७॥ वानराणां
रघुश्रेष्ठश्चुकोपानलसंन्निभः॥ चापमानयसौमित्रेब्रह्मास्त्रेणासुरंक्षणात्॥६८॥
भस्मीकरोमिमेपश्यबलमद्यरघूत्तम॥ मेघनादोपितच्छ्रुत्वारामवाक्यमतंद्रि
तः॥६९॥ तूर्णंजगामनगरंमाययामायिकोसुरः॥ पतितंनुवानरानीकंवीक्ष्यदे
रामोतिदुःखितः॥७०॥ उवाचमारुतिंक्षिप्रंगत्वाक्षीरंमहोदधिं॥ तत्रद्रोण
गिरिर्नामदिव्यौषधिसमुद्भवः॥७१॥ तमानयाद्यवेगेनगत्वासंजीवयमौभमने॥ हा७
वानरोघान्महासत्वान्कीर्तिस्तेसुस्थिराभवेत्॥७२॥ अज्ञाप्रमाणमित्युक्
त्वाजगाममानिलनंदनः॥ आनीयचगिरिंसर्वान्वानरान्वानरर्षभान्॥७३॥
जीवयित्वापुनस्तत्रस्थापयित्वाययौद्रुतं॥ पूर्ववद्भैरवंनादंवानराणांबलौ
द्धतः॥७४॥ श्रुत्वाविस्मयमापन्नोरावणोवाक्यमब्रवीत्॥ राघवोमेमहा
शत्रूरामोदेवविनिर्मितः॥७५॥ रक्षितुंतंसमरेशीघ्रंगच्छंतुममयूथपाः॥ मं
त्रिणोबांधवाःशूरायेचमत्प्रियकांक्षिणाः॥७६॥ सर्वेगच्छंतुयुद्धायत्वरितं
ममशासनात्॥ येनगच्छंतियुद्धायभीरवःप्रायोविक्लवान्॥ तान्हनिष्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म्यहं सर्वान्मृधासनपराङ्मुखान्॥ तच्छ्रुत्वा भयसंत्रस्ता निर्जग्मु रणकोविदाः॥
अतिकायः प्रहस्तश्च माहानादमहोदरौ॥ देवशत्रुनिकुंभश्च देवांतकनरांतकौ॥ ८०॥
अपरे बलिनः सर्वे ययुर्युद्धाय वानरैः॥ एते चान्ये च बहवः शूराः शतसहस्रशः॥ ८१
प्रविश्य वानरं सैन्यं ममथुर्बलदर्पिताः॥ भुशुंडैर्भिंडिमालैश्च बाणैः खड्गैः पर
श्वधैः॥ ८२॥ अन्यैश्च विविधैरस्त्रैर्निर्जघ्नुर्हरियूथपान्॥ ते पादपैः पर्वताग्रैः
नखदंष्ट्रैश्च मुष्टिभिः॥ ८३॥ प्राणैर्विमोचयामासुः सर्वराक्षसयूथपान्॥
रामेण निहताः केचित्सुग्रीवेण तथापरे॥ ८४॥ हनूमता चांगदेन लक्ष्म
णेन महात्मना॥ यूथपैर्वानराणां ते निहताः सर्वराक्षसाः॥ ८५॥ रामतेजः
समाविश्य वानरा बलिनोऽभवन्॥ रामशक्तिविहीनानामेव शक्तिः कुतो
भवेत्॥ ८६॥ सर्वेश्वरः सर्वमयो विधाता मायामनुष्यत्वविडंबनेन॥ स
दाचिदानंदमयोऽपि रामो युद्धादिलीलां वितनोति मायां॥ ८७॥ इति श्री
मदध्यात्मरामायणे उमा० युद्धकांडे पंचमः सर्गः॥ ५॥ श्रुत्वा युद्धब
लं नष्टमतिकायमुखं महत्॥ रावणो दुःखसंतप्तो क्रोधेन महतावृतः॥ १॥
निधायेंद्रजितं लंकारक्षणार्थे महाद्युतिः॥ स्वयं जगाम युद्धाय रामेण
सहराक्षसैः॥ २॥ दिव्यं स्पंदनमारुह्य सर्वशस्त्रास्त्रसंयुतं॥ राममेवाभि

240

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुद्राव राक्षसेन्द्रो महाबलः ॥३॥ वानरान् बहुशो हत्वा बाणै रात्रिंचरोपमैः ॥
पातयामास सुग्रीवप्रमुखान्यूथनायकान् ॥४॥ गदापाणिर्महासत्वं तत्र द
ष्ट्वा विषण्णं ॥ उत्ससर्ज महाशक्तिं मयदत्तां बिभीषणे ॥५॥ तामायांतीं स
मालोक्य बिभीषणविघातिनीं ॥ गदन्ताभयायायं रामेण वधार्हो नायमासुरः ॥६॥
दृष्ट्वा लक्ष्मणो धीमं चापमादाय वीर्यवान् ॥ विभीषणस्य पुरतः स्थि
तः क्रौंच इवाचलः ॥७॥ सा शक्तिं लक्ष्मणतनुं विवेशामोघशक्तितः ॥
यावत्यः शक्तयो लोके मायायाः संभवंती हि ॥८॥ तासामाधारभूतस्य
लक्ष्मणाख्यस्य महात्मनः ॥ मायाशक्त्या भवेत्किं वा शेषांशस्य हरेः तनोः ॥९॥
तथापि मानुषंभावमापन्नः स्तदनुव्रतः ॥ मूर्छितः पतितो भूमौ ॥ तमा
दातुं दशाननः ॥१०॥ हस्तैस्तोलयितुं शक्तो न बभूवातिविस्मितः ॥ सर्व
स्य जगतः सारं विराजं परमेश्वरं ॥११॥ कथं लोकाश्रयं विष्णुं तोलयेल्ल
घु राक्षसः ॥ गृहीतकामं सौमित्रीं रावणं वीक्ष्य मारुतिः ॥ आजघानोरसि
क्रुद्धो वज्रकल्पेन मुष्टिना ॥ तेन मुष्टिप्रहारेण जानुभ्यामपतद्भुवि ॥१२॥
आस्यैश्च नेत्रश्रवणैरुद्वमन्रुधिरं बहु ॥ विघूर्णमाननयनो रथो

॥१९०२३५

पस्थुपाविशात्॥१४॥ अथ लक्ष्मणमादाय हनुमान्रावणादिना॥ अनयद्रा
मसामीप्यं बाहुभ्यां परिगृह्य ते॥१५॥ हनूमंतः सुहृत्वेन भक्त्या च परमेश्वरः॥ ल
घुत्वमगमत्सैद्धि वो गुरूणां गुरुरव्ययः॥१६॥ सा शक्तिरपि तं त्यक्त्वा ज्ञात्वा नारा
यणांशजं॥ रावणस्य रथं प्रागाद्रावणोऽपि नितान्तस्ततः॥१७॥ संग्राममवाप्यज
ग्राह बाणासनमथो रुषा॥ राममेवाभिदुद्राव दृष्ट्वा रामोऽपि तं रुषा॥१८॥
आरुह्य जगतां नाथो हनूमंतं माहाबलं॥ रथस्थं रावणं दृष्ट्वा अभिदुद्राव
राघवः॥१९॥ ज्याशब्दमकरोत्तीव्रं वज्रनिष्पेषनिःस्वनं॥ रामो गंभीरया वा
चा राक्षसेंद्रमुवाच ह॥२०॥ राक्षसाधम तिष्ठाद्य क्व गमिष्यसि मे पुरः॥
कृतापराधमेवं मे सर्वत्र समदर्शनः॥२१॥ येन बाणेन निहता राक्ष
सा जनास्थाने तेनैव त्वां हनिष्यामि तिष्ठाद्य मम गोचरे॥२२॥ श्रीराम
स्य वचः श्रुत्वा रावणो मारुतात्मजं॥ वहंतं राघवं संख्ये शरैस्तीक्ष्णैरता
डयत्॥२३॥ हतस्यापि शरैस्तीक्ष्णैर्वायुसुनोः स्वतेजसा॥ व्यवर्द्धत पु
नः स्तेजो ननर्द च माहाकपिः॥२४॥ ततो दृष्ट्वा हनूमंतं सव्रणं सरघु
त्तमः॥ क्रोधमाहारयामास कालरुद्र इवापरः॥२५॥ साश्वं रथं

॥१९०२३

(242)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्वंसं तं राक्षसौघं धनुरंजसा॥ छत्रं पताकां तरसाच्छिछेद सितसायकैः॥२६॥
ततो महाशरेनाशु रावणस्य रघूत्तमः॥ विव्याध वज्रकल्पेन पाकारिरि
व पर्वतं॥२७॥ रामबाणाहतो वीरश्चचाल च मुमोह ह॥ हस्तान्निपतितश्चा
पस्तं समीक्ष्य रघूत्तमः॥२८॥ अर्द्धचंद्रेणाच्छिछेद तत्किरीटं रविप्रभं॥ अनु
जानामि गच्छ स्वामीदानीं बाणपीडितः॥२९॥ प्रविश्य लंकामाश्वास्य श्वः
पश्यसि बलं मम॥ रामबाणेन संविद्धो हतदर्पोथ रावणः॥३०॥ महत्याल
ज्जया युक्तो लंकां प्रविशदातुरः॥ रामोपि लक्ष्मणं दृष्ट्वा मूर्छितं पतितं
भुवि॥३१॥ मानुषत्वमुपाश्रित्य स्त्रीजनयानुशोच तं॥ ततः प्राह हनूमं
तं सखे जीवय लक्ष्मणं॥३२॥ महौषधिं समानीय पूर्ववद्वानरानपि॥
तथेति राघवेणोक्तो जगामाशु महाकपिः॥३३॥ हनूमान्वायुवेगेन
क्षणात्तीर्णो महोदधिं॥ एतस्मिन्नंतरे चारो रावणायन्यवेदयत्॥३४॥
रामेण प्रेषितो देवहनूमान्क्षीरसागरं॥ गतो नेतुं लक्ष्मणस्यजीवना
र्थं महौषधीः॥३५॥ श्रुत्वा चारवचनं राजा चिंतापरोऽभवत्॥ जगा
म रात्रावेकाकी कालनेमिगृहं क्षणात्॥३६॥ गृहागतं समालोक्य राव
णं विस्मयान्वितो॥ कालनेमिरुवाचेदं प्रांजलिर्भयविह्वलः॥३७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२०२८॥

अर्घ्यादिकं ततः कृत्वा रावणस्याग्रतः स्थितः ॥ किं ते करोमि सुवाचेदं रावणो दुःखपी
डितः ॥ ३८ ॥ ममापि कालवशतः कष्टमेतदुपस्थितं ॥ मम शक्तिहतो वीरो लक्ष्मणः
पतितो भुवि ॥ ३९ ॥ तं जीवयितुमानेतुमौषधीर्हनुमानतः ॥ यथा तस्य न
विघ्नं स्यात्तथा कुरु महामते ॥ मायया मुनिवेषेण मोहयस्व महाकपिं ॥ काल
क्षेपो यथा भूयात्तथा कृत्वा हि मंदिरं ॥ ४१ ॥ रावणस्य वचः श्रुत्वा कालनेमिरु
वाच तं ॥ रावणो रावणो मे घ शृणु धारयतत्त्वतः ॥ ४२ ॥ प्रियं ते करवाण्येव
न प्राणान्धारयाम्यहं ॥ मारीचस्य यदारण्ये पुराभून्मृगरूपिणः ॥ ४३ ॥ त
थैव मे न संदेहो न विष्णुर्विदन्नानघ ॥ हताः पुत्राश्च पौत्राश्च बांधवा राक्ष
साश्च ते ॥ ४४ ॥ घातयित्वा सुतकुलं जीवितेनापि किं तव ॥ राज्येन वा सीत
या वा किं देहेन जडात्मना ॥ ४५ ॥ सीतां प्रयच्छ रामाय राज्यं देहि विभीषणे ॥
वनं याहि महाबाहो रम्यं मुनिगणाश्रयं ॥ ४६ ॥ स्नात्वा प्रातः शुभज
ले कृत्वा संध्यादिकां क्रियाः ॥ ततः एकांतमाश्रित्य सुखासनपरिग्रहः ॥
॥ ४७ ॥ विसृज्य सर्वतः संगमितरान्विषयान्बहिः ॥ बहिः प्रवृत्तः क्षि
२०२८॥ गणांशनैः प्रत्यक्प्रवाहय ॥ ४८ ॥ प्रकृतेर्भिन्नमात्मानं विचारय स
दानघ ॥ चराचरं जगत्कृत्स्नं देहबुद्धीन्द्रियादिकं ॥ ४९ ॥ आब्रह्मस्तंभ

२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पर्यंतं दृश्यते श्रूयते च यत्॥ सैषा प्रकृतिरित्युक्ता सैव मायेति कीर्तिता:५०
सर्गस्थितिविनाशाय जगद्वृक्षस्य कारणं॥ लोहितश्वेतकृष्णादि प्रजाः सृजति
सर्वदा॥५१॥ कामक्रोधादि पुत्राद्या हिंसातृष्णादि कन्यका॥ मोहयत्यनिशं
देवमात्मानं स्वगुणैर्विभुं॥५२॥ कर्तृत्वभोक्तृत्वमुखान्स्वगुणानात्मनीश्वरे॥ आरोप्य
स्ववशं कृत्वा तेन क्रीडति सर्वदा॥५३॥ शुद्धोप्यात्मा यया युक्तः पश्यत्येव
बहिः सदा॥ विस्मृत्य च स्वमात्मानं मायागुणविमोहितः॥५४॥ यदा स
द्गुरुणा युक्तो बोध्यते बोधरूपिणा॥ निवृत्तदृष्टिरात्मानं पश्यत्येव सदा
स्फुटं॥५५॥ जीवन्मुक्तस्तदा देही मुच्यते प्राकृतैर्गुणैः॥ त्वमप्येवं सदा
त्मानं विचार्य नियतेंद्रियः॥५६॥ प्रकृतेरन्यमात्मानं ज्ञात्वा मुक्तो भविष्य
सि॥ ध्यानं तु सदा समर्थोसि सगुणं देवमाश्रय॥५७॥ हृत्पद्मकर्णिके स्व
र्णपीठे मणिगणान्विते॥ मृदुश्लक्ष्णतरे तत्र जानक्या सह संस्थितं॥५८॥
वीरासनं विशालाक्षं विद्युत्पुंजनिभांबरं॥ किरीटहारकेयूरकौस्तुभा
दिभिरन्वितं॥५९॥ नूपुरैः कटकैर्भातं तथैव वनमालया॥ लक्ष्मणेन
धनुर्द्धृक्करेण परिसेवितं॥६०॥ एवं ध्यात्वा सदात्मानं रामं सर्वहृदि स्थि
तं॥ भक्त्या परमया युक्तो मुच्यते नात्र संशयः॥६१॥ शृणु वैच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रितं रामभक्तैर्नियमनन्यधीः ॥ एवं चेल्लभते पुण्याग्निपौनिच माहात्म्यपि ॥६२॥
क्षणादेव विनश्यंति यथाग्नेस्तूलराशयः ॥६३॥ भजस्व रामं परिपूर्णमेकं
विहाय वैरं निजभक्तियुक्तः ॥ हृदा सदा भावितभावरूपं मनामरूपं पु
रुषं पुराणं ॥६४॥ इति श्री० उ० युद्ध० षष्ठस्सर्गः ॥६॥ कालनेमिवचः श्रुत्वा
रावणो मतसंन्निभं ॥ जज्वाल क्रोधताम्राक्षः सर्पिरद्भिरिवाग्निवत् ॥१॥
निहंन्मि त्वां दुरात्मानं मच्छासनपराङ्मुखं ॥ परैः किंचिद्गृहीत्वा त्वं जायसे रामकिंकरः ॥२॥
कालनेमिरुवाचेदं चेशवणं देव किं क्रुधा ॥ नरोचते मे वचनं यदि गत्वा करोमि तत् ॥३॥
इत्युक्त्वा प्रययौ शीघ्रं कालनेमिर्महासुरः ॥ चोदितो रावणेनेव हनूमद्विघ्नका
रणात् ॥४॥ स गत्वा हिमवत्पार्श्वे तपोवनमकल्पयत् ॥ तत्र शिष्यैः परिवृतो मु
निवेषधरः खलः ॥५॥ गच्छतो मार्गमासाद्य वायुसूनोर्महात्मनः ॥ ततो गत्वा
ददर्शायं हनूमानाश्रमं शुभं ॥६॥ चिंतयामास मनसा श्रीरामं पवनात्मजः ॥
पुरा न दृष्टमेतन्मे मुनिमंडलमद्भुतं ॥७॥ मार्गो विभ्रंशितो वा मे भ्रमो वा
चित्तसंभवः ॥ यद्वा विश्याश्रमपदं दृष्ट्वा मुनिमतोषतः ॥८॥ पीत्वा जलं
१०२५॥ ततो यामि द्रोणाचलमनुत्तमं ॥ इत्युक्त्वा प्रविवेशायं सर्वतो योजनाय
तं ॥९॥ आश्रमं कदलीनालखर्जूरफलसादिभिः ॥ समावृतं पद्मफ

लैनमन्त्रनगरैर्वेश्मप्रपादपैः॥१०॥वैरभावविनिर्मुक्तं सुद्धनिर्मललक्षणं॥तस्मि
न्माहाश्रमेरम्येकालनेमिःसराक्षसः॥११॥इंद्रयोगंसमास्थायन्नकारशिव
पूजनं॥हनूमानभिवाद्याहगौरवेणमाहासुरं॥१२॥भगवान्नामदूतोहं
हनूमान्नामनामतः॥रामकार्येणमहताक्षीराब्धिंगतमुद्यमं॥१३॥तृष्णामां
बाधतेब्रह्मन्नुदकंकुत्रविद्यते॥यथेष्टंपातुमिच्छामिकथ्यतांमेमुनिश्वर॥
॥१४॥तच्छ्रुत्वामारुतेर्वाक्यंकालनेमिस्तमब्रवीत्॥कमंडलुगतंतोयंम
मसंपातुमर्हसि॥१५॥भुंक्ष्वचेमानिपक्वानिफलानितदनंतरं॥निवस
त्वंसुखेनात्रनिद्रामेहिसमाश्रमं॥१६॥भूतंभव्यंभविष्यंचजानामितप
सास्वयं॥उच्छिश्रितोलक्ष्मणःसर्वेवानरारामवीक्षिताः॥१७॥तच्छ्रुत्वाह
नूमानाहकमंडलुजलेनमे॥नशाम्यत्यधिकातृष्णाततोदर्शायमेज
लं॥१८॥तथेत्याज्ञापयामासवमायोविकल्पितं॥वटोदर्शयविस्तीर्णंवा
युसूनोजलाशयं॥१९॥निमील्यचाक्षिपीतोयंपीत्वागच्छममांतिकं॥
उपदेक्ष्यामितेमंत्रंयेनद्रक्ष्यसिचौषधीः॥२०॥तथेत्युक्तदर्शितंशीघ्रं
वटुनासलिलाशयं॥प्रविश्यहनूमानापअपिबन्मिलितेक्षणः॥२१॥
ततआगत्यमकरीमाहाकायामाहाकपिं॥अग्रसत्तंमाहावेगान्मारुतिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२०.२८

घोररूपिणी॥२२॥ततोददर्शहनूमानुग्रसंतीमगरीरूषा॥दारयामासहस्ता
भ्यांवदनेसाममारह॥२३॥ततोंतरिक्षेददृशेदिव्यरूपधरांगना॥धान्यमालि
तिविख्याताहनूमंतमथाब्रवीत्॥२४॥त्वत्प्रसादादहंदेहंशापमुक्ताकपी
श्वर॥शप्ताहंमुनिनापूर्वमप्सराकारणांतरे॥२५॥आश्रमेयस्त्वतेदृष्टःका
लनेमिर्महासुरः॥रावणप्रहितोमार्गेविघ्नंकर्तुंतवानघ॥२६॥मुनिवेषा
धरोनासौमुनिर्विप्रविहंसकः॥जहिदुष्टंगच्छशीघ्रंद्रोणाचलमनुत्त
मं॥२७॥गच्छाम्यहंब्रह्मलोकंत्वत्स्पर्शाद्धूतकल्मषा॥इत्युक्त्वासाययौस्वर्गं
हनूमानप्ययाश्रमं॥२८॥आगतंतंसमालोक्यकालनेमिरभाषत॥किं
ग्विलंबेनमहत्तातववानरसत्तम॥२९॥गृहाणमंत्रोमंत्रास्त्वंदेहिमेगु
रुदक्षिणां॥इत्युक्तोहनूमान्मुष्टिंदृढंबध्वाहसन्सं॥३०॥गृहाणदक्षि
णांमत्तोइत्युक्त्वानिजघानतं॥विसृज्यमुनिवेषंसकालनेमिर्महासु
रः॥३१॥युयुधेवायुपुत्रेणनानामायाविधानतः॥महामायिकदर्
तोसौहनूमान्मायिनांरिपुः॥३२॥जघानमुष्टिनाशीघ्रंभग्नमूर्द्धा
ममारसः॥ततःक्षीरनिधिंगत्वादृष्ट्वाद्रोणंमहागिरिं॥३३॥अदृष्ट्वौ

॥२०.२६

चौषधीस्तत्र गिमुसाठ्यसत्वरः॥ गृहीत्वा वायुवेगेन गत्वा रामस्य संन्नि
धिं॥३४॥ उवाच हनूमान् राममानीतोयं महागिरिः॥ यद्युक्तं कुरु देवेत्रा
विलंबो नात्र युज्यते॥३५॥ स्तच्छ्रुत्वाहनूमतो वाक्यं रामः संतुष्टमानसः॥ गृ
हीत्वा चौषधीः शीघ्रं सुषेणाख्य महामतिः॥३६॥ चिकित्सां कारयामास
लक्ष्मणाय महात्मने॥ सुसुप्तोत्थित इव तदा बुध्वा प्रोवाच लक्ष्मणः॥३७॥
तिष्ठ तिष्ठ क्व गंतासि हन्मीदानीं दशाननं॥ इति ब्रुवंतमालिंग्य मुर्ध्नी
व घ्राय राघवः॥३८॥ मारुतिं प्राह वत्साद्य त्वत्प्रसादान्महाकपे॥ नि
रामयं प्रपश्यामि लक्ष्मणं भ्रातरं मम॥३९॥ इत्युक्त्वा वानरैः सार्द्धं सु
ग्रीवेण समन्वितः॥ विभीषणमतेनैव युद्धार्थं समुपस्थितः॥४०॥ पा
षाणपादपैश्चैव पर्वताग्रैश्च वानराः॥ युद्धायाभिमुखा भूत्वा ययुः सर्वे
युयुत्सवः॥४१॥ रावणोविव्यथे रामबाणैर्विद्धो महासुरः॥ मातंग इव
सिंहेन गरुडेनैव पन्नगः॥४२॥ अभिभूतोभवद्राजा राघवेण मा
हात्मना॥ सिंहासने समाविश्य राक्षसानिदमब्रवीत्॥४३॥ मानुषेणै
व मे मृत्युर्माह पूर्वं पितामहः॥ मानुषो हि न मां हंतुं शक्तोस्ति भुवि कश्च
न॥४४॥ ततो नारायणः साक्षान्मानुषोभुन्न संशयः॥ रामो दाशर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

थिर्भूत्वा मां हन्तुं समुपस्थितः ॥४५॥ अनरण्येन यत्पूर्वं शप्तोहं राक्षसे
श्वरः ॥ उत्पत्स्यते च मद्वंशे परमात्मा सनातनः ॥४६॥ तेन त्वं पुत्रपौत्रैश्च
बांधवैश्च समन्वितः ॥ हनिष्यसे न संदेह इत्युक्त्वा मां दिवं गतः ॥४७॥ स
एव रामः संजातो मदर्थं मां हनिष्यति ॥ कुंभकर्णस्तु मूढात्मा सदा निद्रा
वशं गतः ॥४८॥ तं विबोध्य महासत्वमानयंतु ममांतिके ॥ इत्युक्तास्ते मा
हाकायाः स्तं यं गत्वा तु यत्नतः ॥४९॥ विबोध्य कुंभकर्णं ते निन्यू रावणा
संन्निधिं ॥ नमस्कृत्य स राजानमासनोपरि संस्थितं ॥५०॥ तमाह रा
वणो राजा भ्रातरं दीनया गिरा ॥ कुंभकर्ण निबोधेस्त्वं मम कष्टमुप
स्थितं ॥५१॥ रामेण निहताः शूराः पुत्रापौत्राश्च बांधवाः ॥ किं कर्त
व्यमिदानीं मे मृत्युकालः समागतः ॥५२॥ एष दाशरथी रामः सुग्री
वसहितो बली ॥ समुद्रं सबलं तीर्त्वा मूलं नः परिकृंतति ॥५३॥ ये रा
क्षसा मुख्यतमास्ते हता वानरैर्युधि ॥ वानराणां क्षयं युद्धे न पश्या
मि कदाचन ॥५४॥ नात्रायस्व माहाबाहो यदर्थं परिबोधितः ॥ भ्रातु
र्थे महासत्व कुरु कर्म सुदुष्करं ॥५५॥ श्रुत्वा तद्रावणेंद्रस्य वचनं परि
देवितं ॥ कुंभकर्णो जहासोच्चैर्वचनं चेदमब्रवीत् ॥५६॥ कुंभकर्ण०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुरामंत्रविचारेतेगदितंयन्मयानघ॥एवमेवमयाप्रोक्तोरामोनारायणःपरः५७
सीतापियोगमायेतिबोधितोपिनबुध्यसे॥एकदाहंवनेशीनोविन्ध्यगंगायांस्थि
तोनिशि॥५८॥दृष्टोमयामुनिःसाक्षान्नारदोदिव्यदर्शनः॥तमब्रुवन्महा
भागकुतोगंतासिमेवद॥इत्युक्तोनारदःप्राहदेवानांमंत्रसंस्थितः॥
तत्रोसन्नमुदंतंवोवक्ष्याम्यहंशृणुतत्वतः॥६०॥युवाभ्यांपीडितादेवाःस
र्वेविष्णुमुपागताः॥ऊचुस्तेदेवदेवेशंसंस्तुत्वासमाहिताः॥६१॥ज
हिरावणमक्षोभ्यंदेवत्रैलोक्यकंटकं॥मानुषेणमृतिस्तस्यकल्पिता
त्वंहृतापुरा॥६२॥अतस्त्वंमानुषोभूत्वाजहित्रैलोक्यकंटकं॥तथेत्या
हमहाविष्णुःसत्यसंकल्पईश्वरः॥६३॥राजारघुकुलेदेवोरामइत्यभि
विश्रुतः॥सहनिष्यगोमर्वा॥नित्युक्त्वाप्रययौमुनिः॥६४॥अतोजानी
हिरामंत्वंपरब्रह्मसनातनं॥त्यजवैरंभजस्वाद्यमायामानुषरूपिणं॥६५
भजतोभक्तिभावेनप्रसीदतिरघूत्तमः॥भक्तिर्जनित्रीज्ञानस्यभ
क्तिर्मोक्षप्रदायिनी॥६६॥भक्तिहीनेनयत्किंचित्कृतंसर्वमसत्समं॥
अवताराःसंतिबहवोविष्णोःकालानुसारिणः॥६७॥तेषांसहस्रसदृ
शोरामोज्ञानवतांवरः॥रामंभजंतिनिपुणामनसावचसानिशं॥६८
अनयासेनसंसारंतीर्त्वायांतिहतेःपदं॥येरामेवसनंतंचविष्णुहृत्स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२.२८

सांख्यायंति तस्य चरितानि परं तिसंतः ॥ युक्तास्त एवभव भोग महाधिप
श्रोः सीतापतेः पदमनंतसुखं प्रयांति ॥ ६९ ॥ इति श्रीमद्व्यास० उमा०
युद्धकांडे सप्तमः सर्गः ॥ ७ ॥ कुंभकर्णवचः श्रुत्वा भ्रुकुटीविकटाननः ॥
रक्ताग्रीवो जगादेदं मासनादुसन्निवाः ॥ इमानीतानमेज्ञानं[illegible] बो
धनाय सुबुद्धिमान् ॥ मयाहृतं क्षमी हन्त्य युद्धस्व यदि रोचते ॥ २ ॥ नो चेत्कु
म्भ सुषुप्सार्थं निद्रां त्वं बाधते पुनः ॥ रावणस्य वचः श्रु[illegible] हा कुंभ
कर्णो माहाबलः ॥ ३ ॥ रुष्टोयमिति विज्ञाय तूर्णं युद्धाय निर्य
ययौ ॥ स लंघयित्वा प्राकारं माहापर्वतसंन्निभः ॥ ४ ॥ निर्ययौ न
गरात्तूर्णं भीषयन्हरिसैनिकान् ॥ स ननाद माहानादं स स समुद्रमु
न्निनादयन् ॥ ५ ॥ वानरान्कवलयामास बाहुभ्यां भक्षयन्रुषा ॥ कुं
भकर्णस्तदा दृष्ट्वा सपक्षमिव पर्वतं ॥ ६ ॥ दुद्रुवुर्वानराः सर्वे कालां
तकमिवाखिलाः ॥ ऋक्ष मं तं हरिवाहिन्यो मुद्गरेण माहाबलं ॥ ७ ॥
कवलयंतं हरीन्वेगाद्भक्षयंतं समंततः ॥ चूर्णयंतं मुद्गरेण पाणि
पादैरनेकधा ॥ ८ ॥ कुंभकर्णं तदा दृष्ट्वा गदापाणिर्बिभीषणः ॥
ननाम चरणौ तस्य भ्रातुर्ज्येष्ठस्य बुद्धिमान् ॥ ९ ॥ बिभीषणस्य

२.२८

१४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ्रातर्मे दयां कुरु महामते ॥ रावणस्तु मया भ्रातर्बहुधा परिबोधितः ॥१०॥
सीतां देहीति रामाय रामः साक्षाज्जनार्दनः ॥ न शृणोति च मोहं तु त्वद्बंधु
र्धर्ममप्युक्तवान् ॥११॥ धिक् त्वं गच्छति मां हत्वा यदा पापिति रावणः ॥ च
तुर्भिर्मंत्रिभिः साकं रामं शरणमागतः ॥१२॥ तच्छ्रुत्वा कुंभकर्णोपि ज्ञात्वा
भ्रातरमागतं ॥ समालिंग्य च गच्छ त्वं जीव रामपदाश्रयः ॥१३॥ कुलसं
रक्षणार्थाय राक्षसानां हिताय च ॥ महाभागवतोसि त्वं पुरा मे नारदा
च्छ्रुतं ॥१४॥ गच्छ तात मयेदानीं द्रष्टव्यं ते मम किंचन ॥ मदीयो वा परो वा
पि मदमत्तविलोचन ॥१५॥ इत्युक्तोश्रुमुखो भ्रातुश्चरणावभिवं
द्य सः ॥ रामपार्श्वमुपागत्य चिंतापरस्तूपस्थितः ॥१६॥ कुंभकर्णोपि
हस्ताभ्यां पादाभ्यां पेषयन्हरीन् ॥ चचार वानरीं सेनां कल्पयन्द
न्तिहस्तवत् ॥१७॥ दृष्ट्वा तं राघवः क्रुद्धो वायव्यं शस्त्रमादरात् ॥
चिक्षेप कुंभकर्णाय तेन चिच्छेद राक्षसः ॥१८॥ मुक्तस्य दक्षिणं ह
स्तं तेन घोरं ननाद सः ॥ सहस्तपतितो भूमावनेकान्मर्दयन्कपी
न् ॥१९॥ पतनेनाश्रिताः सर्वे वानराश्च यवेपिताः ॥ रामराक्षसयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युद्धं पश्यन्तः पर्यवस्थिताः ॥२०॥ कुंभकर्णश्छिन्नहस्तः शालमुद्यम्य २·२०
वेगतः ॥ समरे राघवं हंतुं दुद्राव तमथाछिनत् ॥२१॥ शालेन सहि
तं वामहस्तमैंद्रेणाराघवः ॥ छिन्नबाहुमथायांतं नर्दंतं वीक्ष्य राघवः
॥२२॥ द्वावर्द्धचंद्रौ निशितावादायास्य पदद्वयं ॥ चिछेद पतितौ पादौ
लंकाद्वारि महास्वनौ ॥२३॥ निकृत्तपाणिपादोप्यि कुंभकर्णोतिभी
षणः ॥ वडवामुखवद्वक्त्रं व्यादाय रघुनंदनं ॥२४॥ अभिदुद्राव
निनदन् राहुश्चंद्रमसं यथा ॥ आपूरयन्निशिताग्रैर्सायकैस्त
द्रघुत्तमः ॥२५॥ शरपूरितवक्त्रोसौ चुक्रोशातिभयंकरः ॥ अ
थ सूर्यप्रतिकाशमैंद्रं शरमनुत्तमं ॥२६॥ वज्राग्निसमं शा
मभिक्षेपासुरमृत्यवे ॥ स तं पर्वतसंकाशं स्फुरत्कुंडलदंष्ट्र
कं ॥२७॥ चकर्त्त रक्षोधिपतेः शिरो वृत्रमिवाशनिः ॥ तच्छिरः प
तितं लंकाद्वारि कायो महोदधेः ॥२८॥ शिरोस्य रोधयद्द्वारं कायो
२·२९ नक्राश्च चूर्णयन् ॥ ततो देवाः सऋषयो गंधर्वाः पन्नगाः खगाः ॥
२९

सिद्धा यक्षा गुह्यकाश्च अप्सरोभिश्च राघवं ॥ इडीरे कुसुमाकारैर्वर्षं
तस्त्वाविनिंदिताः ॥३०॥ आजगाम तदा रामं द्रष्टुं देवमुनीश्वरः ॥ नारदो ग
गनात्तूर्णं स्वभासा भासयद्दिशः ॥३१॥ राममिंदिवरश्यामं मुदारांगं धनु
र्धरं रत्नोत्तमासनविन्यस्तालालसमेद्रास्त्रांचितबाहुकं ॥३२॥ दयार्द्रदृष्ट्या पश्यंतं
वानरानसुरपीडितान् ॥ दृष्ट्वा गद्गदया वाचा भक्त्या स्तोतुं प्रचक्रमे ॥३३॥ ना
रद उवाच ॥ देवदेव जगन्नाथ परमात्मा सनातन ॥ नारायणाखिलाधार
विश्वसाक्षिन्नमोस्तु ते ॥३४॥ विशुद्धज्ञानरूपोपि त्वं लोकानतिवंचयन् ॥
मायया मनुजाकारः सुखदुःखादिमानिव ॥३५॥ त्वं मायया गुह्यमानः स
र्वेषां हृदि संस्थितः स्वयंज्योतिःस्वभावस्त्वं व्यक्त एवामलात्मनं ॥३६॥ उन्मील
यन्सृजस्येतन्नेत्रे राम जगत्त्रयं ॥ उपसंह्रियते सर्वं त्वया चक्षुर्निमील
नात् ॥३७॥ यस्मिन्सर्वमिदं भाति यतश्चैतच्चराचरं ॥ यस्मान्नकिंचिल्लोके
स्मिंस्तस्मै ते ब्रह्मणे नमः ॥३८॥ प्रकृतिः पुरुषं कालं व्यक्ताव्यक्तस्वरूपिणं ॥ यं
जानंति मुनिश्रेष्ठास्तस्मै रामाय ते नमः ॥३९॥ विकाररहितं शुद्धं ज्ञानरूपं
श्रुतिर्जगौ ॥ तो सर्वज ॰ गदाकारमूर्त्तिः चाप्याह साक्षिनिः ॥४०॥ विरोधो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृश्यते देवैर्वैदिकावेदवादिनः॥ निश्चयं नाधिगच्छंति तत्प्रसादं विना बुधः॥४१॥
मायया क्रीडतो देव नविरोधो मनागपि॥ रश्मिजालं रवेर्यद्वद्दृश्यते जलवद्बु
मानुः॥४२॥ भ्रांतिज्ञानात्तथा राम दृश्यि सर्वं प्रकल्पते॥ मनसो विषयं देव
रूपं ते निर्गुणं परं॥४३॥ कथं दृश्यं भवेद्देव दृश्या भासे भजे कथं॥ अ
तस्त्ववतारेषु रूपाणि निपुणा भुवि॥४४॥ भजंति बुद्धिसंपन्नास्तरंत्ये
व भवार्णवं॥ कामक्रोधादयस्तत्र शत्रवः परिपंथिनः॥४५॥ क्षीणयंति
सदा चेतो मार्जारा मूषकान्यथा॥ तन्नाम स्मरतां नित्यं तद्रूपमपि मान
से॥४६॥ तत्सुजाग्निरतानां ते कथा मत्परात्मनां॥ तदुक्तं सेगिनां राम
संसारो गोष्पदायते॥४७॥ अनस्तस्य गुणं रूपं ध्यायाहं सर्वदा हृदि॥
मुक्तश्चरामि लोकेषु पूज्योहं सर्वदैवतैः॥४८॥ राम त्वया महत्कार्यं ह
तं देवहितेच्छया॥ कुंभकर्णवधे नाद्य भूभारोयं गतः प्रभो॥४९॥
श्वोहनिष्यति सौमित्रिरिंद्रजेतारमाहवे॥ हनिष्यसि तथा राम त्वं प
रश्वो दशकंधरं॥५०॥ पश्यामि सर्वदेवैस्तु सिद्धैः सह नभोगतः॥ अ
२० नुगृहीष्व मां देव गमिष्यामि सुरालयं॥५१॥ इत्युक्त्वा राममामंत्र्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नारदो भगवानृषिः ॥ ययो देवैः पूज्यमानो ब्रह्मलोकमकल्मषं ॥ ५२ ॥ भ्रा
तरं निहतं श्रुत्वा कुंभकर्णं महाबलं ॥ रावणः शोकसंतप्तो रामेणाक्लिष्टक
र्मणा ॥ ५३ ॥ मूर्छितः पतितो भूमौ वुथ्थाय विललाप ह ॥ पितृव्यं निहतं श्रु
त्वा पितरं चातिविह्वलं ॥ ५४ ॥ इंद्रजिद्बाह शोकार्त्तं शोकं त्यज महामते ॥
मयि जीवति राजेंद्र मेघनादे महाबले ॥ ५५ ॥ दुःखस्यावसरः कुत्र देवां
तक महामते ॥ व्येतु ते दुःखमखिलं स्वस्थो भव महीपते ॥ ५६ ॥ सर्वैः स
म्यक् करिष्यामि हनिष्यामि च ते रिपून् ॥ गत्वा निकुंभिलां सद्यस्तर्पइत्वा
हुताशनं ॥ ५७ ॥ लब्ध्वा रथादिकं तस्मादजेयोहं भवाम्यरेः ॥ इत्युक्
त्वा त्वरितं गत्वा निर्दिष्टं हवनस्थलं ॥ ५८ ॥ रक्तमाल्यांबरधरो रक्तगं
धानुलेपनः ॥ निकुंभिलास्थले होमो नीहवनायोपचक्रमे ॥ ५९ ॥ वि
बिभीषणोपि तच्छ्रुत्वा मेघनादस्य चेष्टितं ॥ प्राह रामाय सकलं हो
मारंभं दुरात्मनः ॥ ६० ॥ समाप्यते चहोमोयं मेघनादस्य दुर्मतेः ॥
तदाजय्यो भवेद्राम मेघनादः सुरासुरैः ॥ ६१ ॥ अतः शीघ्रं लक्ष्म
णानघातयिष्यामि रावणिं ॥ अनुज्ञापय मया सार्द्धं लक्ष्मणं बलि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यु०का०१॥

नां वरं॥६२॥हनिष्यति न संदेहो मेघनादं तवानुजः॥श्रीराम उवाच॥अहं
मेवागमिष्यामि हंतुमिंद्रजितं रिपुं॥६३॥आग्नेयेन महास्त्रेण सर्वराक्षे
सघातिना॥विभीषणोपि तं प्राह नासावन्यैर्निहन्यते॥६४॥यस्तु द्वा
दशाब्दवर्षाणि निद्राहारविवर्जितः॥तेनैव मृत्युर्निर्दिष्टो ब्रह्मणास्य दुरा
त्मनः॥६५॥लक्ष्मणो यद्यपि योध्याया निर्जगाम त्वया सह॥तदादि निद्राहा
रादीन्न जानाति रघूत्तम॥६६॥सेवार्थं तव राजेंद्र ज्ञातं सर्वमिदं मया॥
॥हनिष्यति न संदेहः सो
तदाज्ञापय राजेंद्र लक्ष्मणं वरया मया॥६७॥हनिष्यति न संदेहः सो
ऽयं साक्षाद्धराधरः॥त्वमेव साक्षाज्जगतामधीशो नारायणो लक्ष्म
णः साक्षाद्धराधरः॥भुवो धराभारनिवारणार्थं जातो जगन्नाटकसूत्र
धारो॥६९॥इति श्रीमद०उमा०युद्धकांडे अष्टमः सर्गः॥८॥विभी
षणवचः श्रुत्वा रामो वाक्यमथाब्रवीत्॥जानामि तस्य रौद्रस्य
मायां दुरंतां विभीषण॥१॥स हि ब्रह्मास्त्रविच्छूरो मायावी च महा
बलः॥जानामि लक्ष्मणस्यापि स्वरूपं मम सेवनं॥२॥ज्ञात्वैवाहमस
महं तूष्णीं भवीष्य कार्यगौरवात्॥इत्युक्त्वा लक्ष्मणं प्राह रामो ज्ञान

यु०का०१५

288

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मतो वरः ॥ ३ ॥ गच्छ लक्ष्मण सैन्येन महता जहि रावणिं ॥ हनुमत्प्रमुखैः सर्वैः
यूथपैः सह लक्ष्मण ॥ ४ ॥ जांबवदृक्षपतिना सह सैन्येन संवृतः ॥ विभीष
णश्च सचिवैः सह त्वामभियास्यति ॥ ५ ॥ अभिज्ञस्तस्य देशस्य जानाति विव
राणि सः ॥ रामस्य वचनं श्रुत्वा लक्ष्मणाय विभीषणः ॥ ६ ॥ जग्राह कार्मुकं श्रे
ष्ठमन्यद्भीमपराक्रमः ॥ रामपादावुपस्पृश्य हृष्टः सौमित्रिरब्रवीत् ॥ ७ ॥ अ
द्य मत्कार्मुकोन्मुक्ताः शरा निर्भिद्य रावणिं ॥ गमिष्यन्ति हि पातालं स्नातुं
भोगावतीजले ॥ ८ ॥ एवमुक्त्वा स सौमित्रिः परिक्रम्य प्रणम्य तं ॥ इन्द्रजि
न्निधनकांक्षी ययौ लघुविक्रमः ॥ ९ ॥ वानरैर्बहुसाहस्रैर्हनुमान्पृष्ठ
तोऽन्वगात् ॥ विभीषणश्च सहितो मंत्रिभिस्तमरिंदमं ययौ ॥ १० ॥ जांबवत्प्र
मुखा ऋक्षाः सौमित्रिं त्वरयाऽन्वयुः ॥ गत्वा निकुंभिलादेशं लक्ष्मणो वी
रसेनया सह ॥ ११ ॥ अपश्यद्बलसंघातं दूराद्राक्षससंकुलं ॥ धनुरानम्य
सौमित्रिर्यत्तोऽभूद्दृढविक्रमः ॥ १२ ॥ अंगदेन च वीरेण जांबवान्राक्षसा
धिपैः ॥ तदा विभीषणः प्राह सौमित्रिं पश्य राक्षसान् ॥ १३ ॥ यदेतद्राक्षसा
नीकं मेघश्यामं विलोक्यते ॥ अस्यानीकस्य महतो भेदे यत्न भवान्भव ॥ १४ ॥

२४९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१०७२

राक्षसेंद्रसुतोप्यस्मिन्न हि दृष्टो भविष्यति॥ अभिद्रवाशु यावद्वै नैतत्कर्म समाप्य
ते॥१५॥ जहि वीर दुरात्मानं हिंसापरमधार्मिकं॥ बिभीषणवचः श्रुत्वा लक्ष्मणः
शुभलक्षणः॥१६॥ ववर्ष शरवर्षाणि राक्षसेंद्रसुतं प्रति॥ पाषाणैः पर्वताग्रै
श्च रक्षांसि च हरियूथपाः॥१७॥ निर्जघ्नुर्वानरानीकं तदा राक्षामहानभूत्॥
स संप्रहारस्तुमुलो संजज्ञे हरिराक्षसानां॥१८॥ इंद्रजित्स्वबलं सर्वं मर्द्यमा
नं विलोक्य सः॥ निकुंभिलां च होमं च सकलं सर्वं विनिर्गतः॥१९॥ रथमा
रुह्य स धनुः क्रोधेन महता गमत्॥ समाव्हयत्स समरे युद्धाय रणमूर्द्धनि॥२०॥
सौमित्रे मेघनादोहं मया जीवन्न मोक्ष्यसे॥ तत्र दृष्ट्वा पितृव्यं स प्राह नि
ष्ठुरभाषणं॥२१॥ इहैव जातः संवृद्धः साक्षाद्भ्राता पितुर्मम॥ यस्त्वं स्व
जनमुत्सृज्य परभृत्यत्वमागतः॥२२॥ कथं द्रुह्यसि पुत्राय पापीयान
सि दुर्मतिः॥ इत्युक्त्वा लक्ष्मणं दृष्ट्वा हनुमत्पृष्ठतः स्थितं॥२३॥ उद्यदा
युधनिस्त्रिंशो रथे महति संस्थितः॥ महाप्रमाणमुद्यम्य घोरं विस्फा
रयद्धनुः॥२४॥ अद्य वो मामका बाणाः प्राणान्हरंति वानराः॥ ततः
शरं दाशरथिः संधायामित्रकर्षणः॥२५॥ ससर्ज राक्षसेंद्राय क्रुद्धः सर्प
इवाश्वसन्॥ इंद्रजिद्रक्तनयनो लक्ष्मणं समुदीक्षत॥२६॥ शक्रारा

१०७२॥

260

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निसमस्थानौ लक्ष्मणेनाहतश्शरैः मुहूर्त्तमभवन्मोहं पुनः प्रत्याहृतेंद्रियः॥ २७॥
ददर्शावस्थितं वीरं वीरो दशरथात्मजं॥ सोभिचक्राम सौमित्रिं क्रोधात्संर
क्तलोचनः॥ २८॥ शरं धनुषि संधाय लक्ष्मणं चेदमब्रवीत्॥ यदि ते प्रथ
मे युद्धे न दृष्टो मे पराक्रमः॥ २९॥ अद्य त्वां दर्शयिष्यामि तिष्ठेदानीं व्यवस्थि
तः॥ इत्युक्त्वा सप्तभिर्बाणैरभिविव्याध लक्ष्मणं॥ ३०॥ दशभिस्तु हनूमन्तं ती
क्ष्णधारैः शरोत्तमैः॥ ततः शरशतेनैव सुप्रयुक्तेन वीर्यवान्॥ ३१॥
क्रोधाद्द्विगुणसंरब्धो निर्बिभेद बिभीषणं॥ लक्ष्मणोपि तथा शत्रुं शरै
रवर्षैरवाकिरत्॥ ३२॥ तस्य बाणैः सुसंविद्धं कवचं कांचनप्रभं॥ व्यशी
र्यत रथोपस्थे तिलशः पतितं भुवि॥ ३३॥ ततः शरसहस्रेण संक्रुद्धो
रावणात्मजः॥ बिभेद समरे वीरं लक्ष्मणं भीमविक्रमं॥ ३४॥ व्यशी
र्यत पतद्दिव्यं कवचं लक्ष्मणस्य च॥ कृतप्रतिकृतान्योन्यं सर्वतो रु
धिरोक्षितौ॥ ३५॥ ततस्मिन्नंतरे वीरो लक्ष्मणः पंचभिः शरैः॥ राव
णेः सारथिं साश्वं रथं च समचूर्णयत्॥ ३६॥ चिच्छेद कार्मुकं तस्य
दर्शयन्हस्तलाघवं॥ सोन्यत्कार्मुकमादाय सज्यं चक्रे त्वरान्वितः॥ ३७॥

२६१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तच्चापमपि चिच्छेद लक्ष्मणस्त्रिभिराशुगैः॥ तमेवं छिन्नधन्वानं विव्या
धानेकसायकैः॥३९॥ पुनरन्यत्समादाय कार्मुकं भीमविक्रमः॥ इंद्र
जिल्लक्ष्मणं बाणाञ्जालैरादित्यसंन्निभैः॥४०॥ बिभेद वानरान्सर्वान्बा
णैनापूरयन्नुत्तालैः॥ तैरिंद्रं समादाय लक्ष्मणो रावणिं प्रति॥४१॥ संधाया
तः कृष्य कर्णान्ते कार्मुकं दृढनिष्ठुरं॥ उवाच लक्ष्मणो वीरः स्मरन्रामपदाबु
जं॥४२॥ धर्मात्मा सत्यसंधश्च रामो दाशरथिर्यदि॥ त्रिलोक्यामप्रति
द्वंद्वस्तेनेदं जहि रावणिं॥४३॥ इत्युक्त्वा बाणमाकर्णाद्विकृष्य तमजि
ह्मगं॥ लक्ष्मणः समरे वीरः संसर्जेंद्रजितं प्रति॥४४॥ सशरः सशि
रस्त्राणं श्रीमज्ज्वलितकुंडलं॥ प्रमथ्येंद्रजितः कायात्पातयामा
स भूतले॥४५॥ ततः प्रमुदिताः देवाः कीर्तयंतो रघूत्तमं॥ ववृषु
पुष्पवर्षाणि स्तुवंतश्च मुहुर्मुहुः॥४६॥ जहर्ष शक्रो भगवान्सह दे
वैः महर्षिभिः॥ आकाशेपि हि देवानां शुश्रुवे दुंदुभिस्वनं॥४७॥ वि
मलं गगनं चासीत्स्थिरा च विश्वधारिणी॥ निहतं रावणिं दृष्ट्वा जयलक्ष्म
समन्वितः॥४८॥ गतश्रमश्च सौमित्रिः शंखमापूरयद्रणे॥ सिंहनादः

२८२

ततः स्वल्वाज्यानरा हूम करोद्धिभुः ॥४९॥ तेन नादेन संहृष्टा वानराश्च गतभ्रमाः ॥
वानरेंद्रैश्च सहितो लक्ष्मणो हृष्टमानसः ॥५०॥ लक्ष्मणः परितुष्टात्मा द
दर्शाग्रेस्य राघवं ॥ हनूमज्जाम्बवाभ्यां च सहितो विनयान्वितः ॥५१॥ ववंदे
भ्रातरं रामं सहितो विनयान्वितः ॥ तत्प्रसादाद्रघुश्रेष्ठ हतो रावणिराह
वे ॥५२॥ श्रुत्वा तं लक्ष्मणं मन्त्र्यमानेमालिंग्य रघूत्तमः ॥ मूर्ध्न्यवघ्राय मुदि
तः सस्नेहमिदमब्रवीत् ॥५३॥ साधु लक्ष्मण तुष्टोस्मि कर्मणे दुष्करं कृतं ॥
मेघनादस्य निधने जितं सर्वमरिंदम ॥५४॥ हौ औ रात्रे स्त्रिभिर्वीर कथंचि
द्विनिपातितः ॥ निःसपत्नः कृतो स्म्यद्य निर्यास्यति हि रावणः ॥५५॥ पुत्र
शोकान्मया योद्धुं तं हनिष्यामि रावणं ॥ मेघनादं हतं श्रुत्वा लक्ष्मणेन महा
हावलं ॥५६॥ रावणः पतितो भूमौ मूर्छितः पुनरुत्थितः ॥ विललापाति
दीनात्मा पुत्रशोकेन रावणः ॥५७॥ पुत्रस्य गुणकर्माणि संस्मरन्नर्थदेव
यत् ॥ अद्य देवगणाः सर्वे लोकपालाः महर्षयः ॥५८॥ हतमिंद्रजितं ज्ञा
त्वा सुखं वस्यत्ति निर्भयाः ॥ इत्यादि बहुशः पुत्रं लालसो विललाप सः ॥५९
ततः परमसंक्रुद्धो रावणो राक्षसाधिपः ॥ उवाच राक्षसान्सर्वा

263

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२०७४

न्विनाशयिषुमाहवे॥६०॥सपुत्रवधसंतप्तः भूरक्रोधसमन्वितः॥सवीक्ष्य
रावणोबुध्याहंतुंसीतांप्रदुद्रुवे॥६१॥खड्गहस्तंपाणिमथायांतंक्रुद्धंदृष्ट्वादशाननं
राक्षसंमध्यगासीताभयत्रस्ताकुलाभवत्॥६२॥एतस्मिन्नंतरेतस्यसचि
वोबुद्धिमान्शुचिः॥सुपार्श्वोनाममेधावीरावणंवाक्यमब्रवीत्॥६३॥कथंना
मदशग्रीवसाक्षाद्वैश्रवणानुजः॥वेदविद्याव्रतस्नातःस्वकर्मफलनिष्ठितः॥६४
अनेकगुणसंपन्नः कथंस्त्रीवधमिच्छसि॥अस्माभिस्सहितोयुद्धे हत्वारामं
चलक्ष्मणं॥६५॥प्राप्स्यसेजानकींशीघ्रमित्युक्तःसंन्यवर्तत॥ततोदुरात्मा
सुहृदेननिवेदितंवचःसुधर्म्यंप्रतिगृह्यरावणः॥गृहंजगामाशुसुखान्वावि
मुक्तधीःपुनःसभांचप्रययौसुहृद्वृतः॥६६॥इतिश्रीमद०उमा०युद्धकां
डेनवमःसर्गः॥९॥सविचार्यसभामध्येराक्षसैःसहमंत्रिभिः॥निर्ययुस्ते
वहिश्चिष्टास्तेराक्षसैःसहरावणं॥१॥शलभाःशलभैर्युक्ताः प्रज्वलंतमिवा
नलं॥ततोरामेणनिहताःसर्वेतेराक्षसाःदृढं॥२॥स्वयंरामेणनिहता
स्तीक्ष्णबाणेनवक्षसि॥व्यथितःस्वपुरिं तंलंकांप्रविवेशदशाननः॥३
दृष्ट्वारामस्यवक्रुद्धःपौरुषंचाप्यमानुषं।रावणोमारुतेर्विवेशशीघ्रं

०७४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रुत्वांतिकं यौ यो॥४॥ नमस्कृत्य दशग्रीवः शुक्रं प्रांजलिरब्रवीत्॥ भगवन् राघ
वेनेव लंकाराक्षसयूथे॥५॥ विनाशिता नामहादैत्या निहता पुत्रबांधवाः॥ कथं
मे दुःखसंदोहस्त्वयि तिष्ठति सद्गुरौ॥६॥ इति विज्ञापितो दैत्यैः गुरुः प्राह दश
ननं॥ होमं कुरु प्रयत्नेन रहसि त्वं दशानन॥७॥ यदि विघ्नो न ते होमे नहि होमा
नलस्थितः॥ महारक्षो वाहाश्च चापतूणीरसायकाः॥८॥ संभविष्यंति ते तु
ष्टस्तव ममजेयो भविष्यसि॥ गृहाण मंत्रान्मे दत्तान्नाना होमं कुरु द्रुतं॥९॥ इत्युक्तो
स्मरितं तदा रावणो राक्षसाधिपः॥ गुहां पातालसदृशीं मंदिरे स्वे चकार ह॥१०॥
लंकाद्वारकपाटादि बध्वा सर्वं प्रयत्नतः॥ होमद्रव्याणि संपाद्य यास्युक्तान्यभि
चारिके॥११॥ गुहां प्रविश्य चैकांते मौनी होमं प्रचक्रमे॥ उत्थितं धूम्रमालोक्य मा
हांतं रावणानुजः॥१२॥ रामाय दर्शयामास होमधूमं भयाकुलः॥ पश्य राम दश
ग्रीवो होमं कर्त्तुं समाचरन्॥१३॥ यदि होमसमाप्तिः स्यात्तदाजेयो भविष्यति॥१४॥
अतो विघ्नाय होमस्य प्रेषयाशु हरीश्वरान्॥१४॥ तथेति रामः सुग्रीवसमन्वि
ता महाकपीन्॥ हनुमत्प्रमुखान्सर्वान्नादिदेश महाबलान्॥१५॥ प्राकारान्तं
घरूहांते गत्वा रावणमंदिरं॥ दशकोटिप्लवंगानां गता मंदिररक्षकान्॥१६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२०३५५

चूर्णयामासरथांश्च गजांश्चाप्यहनत्स यातून्॥ ततश्च तारमामप्रभातेहस्तुसंज्ञ
या॥१७॥ बिभीषणश्च भार्यासा होमस्थानमरक्षयत्॥ गुहापिधानपाषाण
मंगदः पादघट्टनैः॥१८॥ चूर्णीकृत्यामहासत्वः प्रविवेश महागुहां॥ दृष्ट्वा दशा
ननं तत्र मीलिताक्षं दृढासनं॥१९॥ ततोंगदाज्ञयासर्वेवानराविविशुर्द्रुतं॥ गत
त्रकोलाहलं चक्रुः स्ताडयंतश्च सेवकान्॥२०॥ संभारांश्चिक्षिपुस्तत्र
होमकुंडे समंततः॥ सत्वमाच्छिद्य हस्ताच्च रावणं सबलौरुषा॥२१॥ तेनैव
संजघानाशु हनूमान् प्लवगाग्रणीः॥ भ्रंतिदं तैश्च काष्ठैश्च वानरास्त
मितस्ततः॥२२॥ नजहौ रावणो ध्यानं हन्युर्विजगीषया॥ प्रविश्यांतःपुरे
वेश्मन्यंगदो वेगवत्तरः॥२३॥ समानयत्केशबंधे धृत्वा मंदोदरीं शुभां॥
रावणस्य वपुरतो विलपंतीमनाथवत्॥२४॥ विददारांगदस्तस्याः कंचु
कं रत्नभूषितं॥ मुक्ता विमुक्ता पतिताः समंताद्रत्नसंचयैः॥२५॥ श्रो
णिसूत्रं निपतीतं त्रुटितं रत्नचित्रितं॥ कटिप्रदेशाद्धि स्रस्ता नीवीत
स्यैव पेतुः पतः॥२६॥ भूषणानि च सर्वाणि पतितानि समंततः॥ देवगं
धर्वकन्याश्च नाडितो निप्लवंगमैः॥२७॥ मंदोदरी रुरोदाथ राव

॥२०३५॥

२६६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णस्याग्रतो भर्तृं॥ क्रोशंतीं करुणा दीना जगाद दशकंधरं॥२८॥ निर्लज्जोसि प
रैरेव केशपाशैर्विकृष्यते॥ भार्या तवैव पुरतः किं जहोसि न लज्जसे॥२९॥ हन्य
ते पश्यतो यस्य भार्या पापैरशत्रुभिः॥ मर्तव्यं तेन तत्रैव जीवितान्मरणं वरं॥३०॥
हे मेघनाद ते माता क्लिश्यते बत वानरैः॥ संजीवनी मे दुःखमीदृशं कथमुद्धवेत्
३१ भर्याज्ञौले च संत्यक्का मर्त्ता मे जीविताशयः॥ श्रुत्वा न दृष्ट्वा न नरं मंदोदर्यादि
शाननः॥३२॥ उत्तस्थौ खड्गमादाय त्यजेद्देवीमितो ब्रुवन्॥ जघानांगद मव्य
यः कटिदेशे दशाननः॥३३॥ तदोत्सृज्य ययुः सर्वे विध्वंस्य हवनं महत्॥ दे
वाधीनमिदं भद्रे जीवितं किंन दृश्यते॥३४॥ त्यज शोकं विशालाक्षी ज्ञानमा
लंब्य निश्चितं॥ अज्ञानप्रभवं शोकं शोको ज्ञानविनाशकृत्॥३५॥ अज्ञा
नप्रभवाहंधीः शरीरादिष्वनात्मसु॥ तन्मूलं पुत्रदारादिसंबंधः संसृतिस्ततः
दा॥३६॥ हर्षशोकभयक्रोधलोभमोहमदादयः॥ अज्ञानप्रभवा ह्येते जन्मम
त्युजरादयः॥३७॥ आत्मा तु केवलं शुद्धो व्यतिरेकोह्यलेपकः॥ आनंदरूपो
ज्ञानात्मा सर्वभावविवर्जितः॥३८॥ न संयोगो वियोगो वा विद्यते केनचित्स
तः॥ एवं ज्ञात्वा स्वमात्मानं त्यज शोकमनिंदिते॥३९॥ इदानीमेव गच्छामि हत्वा रा
मं सलक्ष्मणं॥ आगमिष्यामि नो चेन्मां दारयिष्यति सायकैः॥४०॥ श्रीरामाव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रकस्मैत्व न ततो गच्छामि न सदंगा [illegible] कर्त्तव्या क्रिया मच्छासनात्प्रिये ॥४१॥
सीतां हत्वा मया सार्द्धं लंकां प्रवेक्ष्यसि [illegible] एवं श्रुत्वा वचस्तस्य स्त्रेरावणस्यातिदु
खिनः ॥४२॥ उवाच नाथ मे वाक्यं श्रु [illegible] तथा कुरु ॥ शक्यो न राघवो जेतुं त्वया
चान्यैः कदाचन ॥४३॥ रामो देव व [illegible] साक्षात्प्रधानपुरुषेश्वरः ॥ मत्स्योभूत्पु
पुराकल्पे मनुं वैवस्वतं प्रभुं ॥ [illegible] र रक्षस कल्पापह्नो राघवो भक्तवत्सलः ॥
रामो कूर्मोभवत्पूर्वं लक्षयोजनविस्तृतः ॥४५॥ समुद्रमथने पृष्ठे दधारकं
क काञ्चनं ॥ हिरण्याक्षोतिदुर्वृत्तो हतोनेन महात्मना ॥४६॥ क्रोडरूपेण
वपुषा क्षोणीमुद्धरता क्वचित् ॥ विदारितकंटकं दैत्यं हिरण्यकशिपुं पुरा ॥४७॥
हतवान्नारसिंहेन वपुषा रघुनंदनः ॥ विक्रमैस्त्रिभिरेवासौ बलिं
बध्वा जगत्त्रयं ॥४८॥ आक्रम्यादात्सुरेंद्राय भृत्याय रघुसत्तमः ॥
तान् हत्वा बहुशो रामो भुवं जित्वा ददौ मुने ॥४९॥ स एव सांप्रतं जा
तो रघुवंशे परात्परः ॥ भवदर्थे रघुश्रेष्ठो मानुषत्वमुपागतः ॥५०॥
तस्य भार्या किमर्थं वा हृता सीता वने त्वया तु ॥ मम पुत्रविनाशार्थं न
वापि निधनाय च ॥५१॥ हत्वा परं च वैदेहीं प्रेषयस्व रघूत्तमे ॥ विभीष
णाय राज्यं तु दत्वा गच्छाम हे वनं ॥५२॥ मंदोदरी वचः श्रुत्वा रावणो वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्यमब्रवीत्॥ कथं मंदरणे पुत्रा भ्रातृनाक्षसमंडलं॥५३॥ घातयित्वा राघवे
णाजीवाम्यिवनगोचरः॥ रामेणासह योत्स्यामि रामबाणैः सुन्दरीश्रेगेः॥५४॥ वि
दार्यमाणो यास्यामि तद्विष्णोः परमं पदं॥ जानामि राघवं विष्णुं लक्ष्मीं जाना
मि जानकीं॥५५॥ ज्ञात्वैवं जानकी सीता मया नीता वनाद्बलात्॥ रामेण नि
धनं प्राप्य गास्यामि ति परं पदं॥५६॥ विमुच्य त्वां तु संसारे गमिष्यामि सह
प्रिये॥ परानंदमयी शुद्धा सेव्यते या मुमुक्षुभिः॥५७॥ तां गतिं तु गमिष्यामि
हतो रामेण संयुगे॥ प्रक्षाल्य कल्मषाणीह मुक्तिं यास्यामि दुर्लभां॥५८॥
कूजरादि पंचकलरंगयुतं श्रमाद्यं दारात्मजाप्तधनबंधुसखाभियुक्तं॥
क्रोधीनलोभनिजरोषमनंगजालं संसारसागरमतीत्य हरिं व्रजामि॥५९॥
इति श्रीमद्॰ उ॰ युधकांडे दशमोध्यायः॥१०॥ रक्षसावचनं श्रेम्या राज्ञीं
मंदोदरीं तदा॥ रावणः प्रययौ योद्धुं रामेणासह संयुगे॥१॥ दृढं स्यंदनमास्था
य तो घोरे निशाचरैः॥ चक्रैश्चाष्टभिर्युक्तं सवरूथं सकूबरं॥२॥ पि
चवदनैर्घोरैः खरैर्युक्तं भयावहं॥ सर्वास्त्रशस्त्रसहितं सर्वोपस्करसं
युतं॥३॥ निश्चक्राम अथ सहसा रावणो भीषणाकृतिः॥ आयांतं रावणं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्ट्वा रावणं रणकर्कशं ॥४॥ स तु स्थित्वैनदा सेना वानरी राममयाल्पिता ॥ ह १०३७॥
नूमानथ चोत्पत्य रावणं योद्धुमाययौ ॥५॥ आगत्य हनूमान् सो वक्षस्यतुलविक्रमः ॥
मुष्टिबंधं दृढं बध्वा ताडयामास वेगतः ॥ स तेन मुष्टिप्रहारेण जानुभ्यामपतद्रथे ॥
मूर्छितोथ मुहूर्तेन रावणः पुनरुत्थितः ॥७॥ उवाच चे हनूमंतं शूरोसि मम संम
तः ॥ हनूमानाह नं धिक् त्वां यत्त्वं जीवसि रावण ॥८॥ त्वं तावन्मुष्टिना वक्षो मम ता
डय शठ पापात्मन् मयाहतः प्राणान्मोक्ष्यसे नात्र संशयः ॥९॥ तथेति मुष्टिना
वक्षो रावणेनाभिताडितः ॥ विघूर्णमाननयनः किंचित्कलुषमाययौ ॥१०॥ संज्ञा
मवाप्य कपीन्द्रः रावणं हंतुमुद्यतः ॥ ततोन्यत्र गतो भीत्या रावणो राक्षसाधिपः ॥११॥
हनूमानंगदश्चैव नलश्चैव नीलस्तथैव च ॥ चचार समरे नगेन्द्र दृष्ट्वा राक्षसपुंग
वान् ॥१२॥ अग्निवर्णस्तथा सर्वे रामाणां खड्गरोमकं ॥ तथा चक्षिरूरोमाणं निर्ज
घ्नुः क्रमतो सुगान् ॥१३॥ चचार श्वतु रोहत्वा राक्षसान् भीमविक्रमान् ॥ सिं
हनादं प्रचुक्रुशुस्ता रामपार्श्वमुपाययुः ॥१४॥ ततः क्रुद्धो दशग्रीवः संदष्टदश
नच्छदः ॥ विवृत्तनयनं क्रूरो राममेवान्वधावत ॥१५॥ दशग्रीवो रथस्थोपि राममेव
१०३७॥ ज्ञोपमैः शरैः अजघान महाघोरैर्धाराभिरिव तोयदः ॥१६॥ रामस्य पुरतः सर्वान्
वानरानपि विव्यधे ॥ ततः पावकसंकाशैः शरैः कांचनभूषितैः ॥१७॥ अभ्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वर्षैरुणोरामोद्राग्नीवसमाहितः॥रथंरावणं दृष्ट्वाभूमीस्थं रघुनंदनं॥आहू
य मातुलिं शक्रो वचनं चेदमब्रवीत्॥रथनममभूमिस्थं शीघ्रं याहि रघूत्तमं॥१९
त्वरीतं प्रतलं गत्वा कुरु कार्यं ममानघ॥एवमुक्तोथ तं नत्वा मातुलिर्देवसारथिः २०
ततो हयैश्च संयोज्य हरितैः स्यंदनोत्तमं॥स्वर्गाज्जयार्थं रामस्य ह्युपचक्राममा
तुलिः॥२१॥अब्रवीत्तु ततो रामं सप्रतर्कयरथे स्थितः॥प्रांजलिर्देवराजेन प्रेषितो
स्मि रघूत्तम॥२२॥रथोयं देवराजस्य विजयाय तव प्रभो॥प्रेषितोयं महाराज
धनुरैंद्रं च भूषितं॥२३॥अभेद्यं कवचं खड्गं दिव्यं तूणीयुगं तथा॥र स्कसं ते न्ने
परिक्रम्य नमस्कृत्य रघूत्तमं॥२५॥आरुरोह रथं रामो लोकान् लक्ष्म्याभियो
जयन्॥ततो प्रवृत्तं महायुद्धं भैरवं रोमहर्षणं॥२६॥महात्मनो राघवस्य राव
णस्य च धीमतः॥आग्नेयेन च आग्नेयं दैवं दैवेन राघवः॥२७॥अस्त्रं राक्षस
राजस्य जघान परमास्त्रवित्॥ततस्ससर्ज नेघोरं राक्षसं चास्त्रमर्थवित्॥२८॥
क्रोधेन महताविष्टो रामस्योपरि रावणः॥रावणस्य धनुर्मुक्ताः सर्पाभूत्वा
महाविषाः॥२९॥शराः कांचनपुंखाभाः राघवं परितोपतन्॥ते शरैः सर्पि
वदनैर्महद्भिरनलं मुखैः॥३०॥दिशश्च विदिशश्चैव व्याप्तास्तत्र शराः
भवन्॥रामः सर्पवतो दृष्ट्वा समंतात् परिपूरितान्॥३१॥सौपर्णमस्त्रं

×आरुह्यैव रथं राम रावणं जहि राक्षसं॥२४॥
१×मया सारथिना देव वृत्रं देवपतिर्यथा॥×१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१०३८५

तद्घोरं पुरः प्रावर्त्तयद्रणे॥ रामस्य मुक्तास्ते बाणा भूत्वा गरुडरूपिणः॥३२॥ चि
च्छिदुः सर्पबाणांस्तांस्समंतात्सर्पशात्रवः॥ अस्त्रे प्रतिहते युद्धे रामेण दशकं
धरः॥३३॥ अभ्यवर्षत्ततो रामं घोराभिः शरवृष्टिभिः॥ ततः पुनः शरैर्नीकै
राममक्लिष्टकारिणं॥३४॥ अर्दयित्वा तु घोरेण मातलिं प्रत्यविध्यत॥ पात
यित्वा रथोपस्थे रथं केतुं च कांचनं॥३५॥ ऐंद्रानश्वानभ्यहनत् रावणः क्रोध
मूर्छितः॥ विषेदुर्देवगंधर्वाश्चारणाः पितरस्तथा॥३६॥ आर्त्ताकारं हरिं दृ
ष्ट्वा व्यथिताश्च महर्षयः॥ व्यथिता वानरेंद्राश्च बभूवुः सविभीषणाः॥३७॥ द
शास्यो विंशतिभुजः प्रगृहीतशरासनः॥ ददृशे रावणस्तत्र मैनाक इव पर्व
तः॥३८॥ रामस्तु भ्रुकुटिवक्त्रः क्रोधसंरक्तलोचनः॥ कोपं चकार सहसा
निर्दहन्निव राक्षसं॥३९॥ धनुरादाय देवेंद्रधनुराकारमद्भुतं॥ गृहीत्वा पा
णिना बाणं कालानलसमप्रभं॥४०॥ निर्दहन्निव चक्षुर्भ्यां ददर्श रिपुमं
तिके॥ पराक्रमं दर्शयितुं तेजसा प्रज्वलन्निव॥४१॥ प्रचक्रमे कालरू
पी सर्वलोकस्य पश्यतः॥ विकृष्य चापं रामस्तु रावणं प्रतिविध्यतु॥४२॥
हर्षयन्वानरानीकं कालांतक इवाबभौ॥ क्रुद्धं रामस्य वदनं दृष्ट्वा शत्रुः प्र
धावत॥४३॥ तत्रसुः सर्वभूतानि चचाल च वसुंधरा॥ रामं दृष्ट्वा महा

१०३८॥

228

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रौद्रं मुसलास्त्रं सुदारुणाः॥४४॥ त्रस्तानि सर्वभूतानि रावणं चाविरादुयुं॥ वि
मानस्थासुरगणाः सिद्धगंधर्वकिंन्नराः॥४५॥ ददृशुस्ते महायुद्धं लोकसंवर्त्तको
पमं॥ मूर्छितो रावणस्याथ बहवो रुधिरोक्षिताः॥४६॥ गगनात्पातं निस्मुता
ल दिव्य फलानि हि॥ न दिनं न च वै रात्रि न संध्या न दिनोपि वा॥४७॥ प्रकाशान्ते
न लक्ष्यं दृश्यते तत्र संगरो॥ ततो रामो बभूवाथ विस्मयाविष्टमानसः॥४८॥
शतमेकोत्तरं छिन्नं शिरसां चैककवर्चसां॥ न चैव रावणः श्रांतो दृश्यते जीवि
तक्षये॥४९॥ ततः सर्वास्त्रविद्वीरः कौशल्यानंदवर्द्धनः॥ अस्त्रैर्बहुभि
र्युक्तश्चिंतयामास राघवः॥५०॥ यैर्बाणैर्निहता दैत्या महासत्वपराक्रमाः॥
त एते निष्फलं याता रावणस्य विघातने॥५१॥ इति चिंताकुले रामे समीपस्थो
बिभिषणः॥ उवाच राघवं वाक्यं ब्रह्मदत्तवरो ह्यसौ॥५२॥ विछिन्ना बाह
वोप्यस्य विछिन्नानि शिरांसि च उत्पत्स्यंति पुनः शीघ्रमित्याह भगवा
नजः॥५३॥ नाभिदेशे मृतं तस्य कुंडलाकारसंस्थितं॥ तच्छोषयानला
स्त्रेण तस्य मृत्युस्ततो भवेत्॥५४॥ बिभीषणवचः श्रुत्वा रामः शीघ्र
पराक्रमः॥ पावकास्त्रं तथा संयोज्य नाभिं विव्याध राक्षसं॥५५॥ अनंत
रं च विछेदत्रिशिरांसि च महाबलः॥ बाहूनपि च संरब्धो रावणस्य रघूत्तमः॥५६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततो घोरमहाशक्तिः माशाय दशकंधरः ॥ बिभीषणवधार्थाय चिक्षेप क्रोधवि
ह्वलः ॥५७॥ चिच्छेद राघवो बाणैस्तां सितैर्हेमभूषितैः ॥ दशग्रीवशिरश्छेदात्तदा
तेजो विगर्जितं ॥५८॥ म्लानरूपो बभूवाथ छिन्नैः शीर्षैर्यथा करैः ॥ एकेन मुख्य
शिरसा बाहुभ्यां रावणो बभौ ॥५९॥ रावणस्तु पुनः क्रुद्धो नानाशस्त्रप्र
ष्टिभिः ॥ ववर्ष रामं तं रामस्तथा बाणैर्ववर्षितं ॥ ६०॥ ततो युद्धमभूद्घोरं तु
मुलं रोमहर्षणं ॥ अथ संस्मारयामास मातली राघवं तदा ॥ ६१॥ विसृज्या
स्त्रं वधायास्य ब्राह्मं प्रशीघ्रं रघूत्तम ॥ विनाशकालः संदिष्टो यः सुरैः सोऽद्य
वर्त्तते ॥ ६२॥ उत्तमांगं न चैतस्य छेत्तव्यं राघव त्वया ॥ नैव शीर्ष्णि प्रभाम
ध्ये वध्य एष हि मर्मणि ॥ ६३॥ ततः संस्मारितो रामस्तेन वाक्येन मातलेः ॥
जग्राह स शरं दीप्तं निःश्वसंतमिवोरगं ॥ ६४॥ यस्य पार्श्वे तु पवनः
फले भास्करपावकौ ॥ शरीरमाकाशमयं गौरवं मेरुमंदरौ ॥ ६५॥ प
र्वस्वपि च विन्यस्ता लोकपाला महौजसः ॥ जाज्वल्यमानं वपुषा भातं
भास्करवर्चसा ॥ ६६॥ तमुग्रमस्त्रं लोकानां भयनाशनमद्भुतं ॥ अभि
मंत्र्य ततो रामः स तमग्रे हि महाभुजः ॥ [illegible] ॥ वेदप्रोक्तेन विधिना संदधे का

रा॰२९१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुकं बरुली॥ तस्मिन्संधीयमाने तु राघवेण शरोत्तमे॥ ६८॥ सर्वभूतानि विवि
चचाल च वसुंधरा॥ सरावणाय संक्रुद्धो भृशमानम्य कार्मुकं॥ ६९॥ चिक्षेप परमा
यत्तस्तदस्त्रं मर्मघातिनं॥ स वज्रमिव दुर्द्धर्षं वज्रपाणिविसर्जितं॥ ७०॥ कृ
तांत इव घोरोयौरास्त्रेन्यपतद्रावणोरसि॥ स निमग्नो महाघोरशरीरांतकरः
परः॥ ७१॥ बिभेद हृदयं तूर्णं रावणस्य महात्मनः॥ रावणस्य हरन्प्राणान्
विवेश धरणीतले॥ ७२॥ स शरो रावणं हत्वा रामतूणीरमाविशत्॥ तस्य ह
स्तात्स पातात्सुसशरं कार्मुकं महत्॥ ७३॥ गतासुर्भ्रममवेगेन राक्षसेंद्रापत
द्भुवि॥ तं दृष्ट्वा पतितं भूमौ हतशेषाश्च राक्षसाः॥ ७४॥ हतनाथा भयत्रस्ता
दुद्रुवुः सर्वतो दिशं॥ दशग्रीवस्य निधनं विजयं राघवस्य च॥ ७५॥ ततो
नितेदुः संहृष्टाः वानरा जितकांक्षिनः॥ वदंतो रामविजयं रावणस्य च तद्व
द्धं॥ ७६॥ अथांतरिक्षे व्यनदत्सौम्यस्त्रिदशदुंदुभिः॥ पपात पुष्पवृष्टि
श्च समंताद्राघवोपरि॥ ७७॥ तुष्टुवुर्मुनयः सिद्धाश्चारणाश्च दिवौकसाः॥
अथांतरिक्षे ननृतुः सर्वशोप्सरसो मुदा॥ ७८॥ रावणस्य च देहाद्यं ज्योति
रादित्यवत्स्फुरत्॥ प्रविवेश रघुश्रेष्ठं देवानां पश्यतां सतां॥ ७९॥ देवा तु स्तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रहोभाग्यं रावणस्य महात्मनः ॥ वयं तु सात्विका देवा विष्णोः कारुण्यभाजनाः ॥ १० ॥
भयदुखादिनिर्व्याप्ताः संसारे परिवर्त्तिनः ॥ अयं तु राक्षसः क्रूरो ब्रह्महा तीव्ररा
क्षसः ॥ ११ ॥ परदाररतो विष्णुद्वेषी तापसहिंसकः ॥ पश्यतस्सर्वमेतत्सु राममेव
प्रविष्टवान् ॥ १२ ॥ एवं ब्रुवत्सु देवेषु नारदः प्राह सस्मितः ॥ श्रृणुतात्र सुरा यूयं
धर्मतत्त्वविचक्षणाः ॥ १३ ॥ रावणो राघवद्वेषादनिशं प्रहृदि भावयेत् ॥ अत्मैः स
ह सदा राममचरितं द्वेषसंयुतः ॥ १४ ॥ स्मरता रामास्त्वनिधनं सदा सर्वत्र राघवं ॥
पश्यन्ननुदिनं स्वप्ने राममेवानुधावति ॥ १५ ॥ क्रोधोपि रावणस्याप्युगुरुवो
चाधिको भवेत् ॥ रामेण निहतश्चासौ निर्द्धूताशेषकल्मषः ॥ १६ ॥ रामसा
युज्यमेवाप रावणो मुक्तबंधनः ॥ पापिष्ठो वा दुरात्मा परधनपरदारेषु सक्तो
यदि स्यान्नित्यं स्नेहाद्भयाद्वा हृदि रघुतिलकं भावयेत्संपरेतः ॥ स्मृत्वा
शुद्धांतरंगो भवजनितततानेकदोषैर्विमुक्तः सद्यो रामस्य विष्णोः सुरेव
रप्रणुतं याति वैकुंठधामं ॥ १७ ॥ हत्वा युद्धे दशास्यं त्रिभुवनविषमं वाम
हस्तेन न्यस्तमेवि ष्टभ्य मित्रिष्टन्नितरकरधृतं भ्रामयन्बाणमेकं ॥ आरक्तोपां
तनेत्रं शरदलितवपुः सूर्यकोटिप्रकाशो वीरः श्रीबंधुरामैर्गस्त्रिदशरा
पतिनुतः पातु मां वीररामः ॥ १८ ॥ इति श्री० उ० उत्तरकांडे एकादशसर्गः ॥ ११ ॥

उ० ४०॥

278

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रामो विभीषणं दृष्ट्वा हनूमंतं तथांगदं ॥ लक्ष्मणं कपिराजं च जांबवंतं तथापरान् ॥१॥
परितुष्टेन मनसा सर्वानेवाब्रवीद्वचः ॥ भवतां बाहुवीर्येण निहतो रावणो मया ॥२॥
कीर्त्तिः ख्यास्यति वो पुण्या यावच्चंद्रदिवाकरौ ॥ कीर्त्तयिष्यंति भवतां कथां त्रैलो
क्यपावनीं ॥३॥ मयोपेतां कलिहरीं यास्यंति परमां गतिं ॥ एतस्मिन्नंतरे दृष्ट्वा राव
णं पतितं भुवि ॥४॥ मंदोदरीमुखाः सर्वाः स्त्रियो रावणपालिताः ॥ पतिता रावण
स्याग्रे स्नेहाच्चांतः पर्यवेदयन् ॥५॥ विभीषणास्तु त्राच्चार्त्तः शोकेन महतावृतः ॥ पतितो
रावणस्याग्रे बंधुभिः पर्यदेवयन् ॥६॥ रामस्तु लक्ष्मणं प्राह बोधयस्व विभीष
णं ॥ करोतु भ्रातुः संस्कारं किं विलंबेन मानद ॥७॥ स्त्रियो मंदोदरीमुख्या वनितावि
लपंतीश्च ॥ निवारयतु ताः सर्वाः राक्षसी रावणप्रियाः ॥८॥ एवमुक्ताथ रामेण लक्ष्म
णो गाद्विभीषणं ॥ उवाच मत्तकोपांते पतितं मत्तकोपमं ॥९॥ शोकेन महताविष्टं
सौमित्रिरिदमब्रवीत् ॥ यं त्वं शोचसि तं दुःखेन कार्यं न च विभीषण ॥१०॥ ते वास्य
कर्मभिः सृष्टैः पुरेदानीमतः परं ॥ यद्वज्जलौघपतिताः शिकृतार्योत्तिनद्गताः ॥११॥
संयुज्यंते वियुज्यंते तथा कालेन देहिनः ॥ यथा धाना सुवेधानान्न वैति न भ
वंति च ॥१२॥ एवं भवंति भूतानि प्रेरितानि रामायया ॥ त्वं हि मे वयमन्ये तु तु
ल्याः कालवशोद्भवाः ॥१३॥ जन्म मृत्युर्यदा यस्मात्तदा तस्माद्विपद्यति ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इश्वरः सर्वभूतान्निस्रजतिहंस्यजः ॥१४॥ असंसृष्टेरस्वतंत्रैरनपेक्षो हि बालवत्॥
देहेन देहिनो जीवाद्देहाद्देहोभिजायते ॥१५॥ बीजाद्वृव यथा बिजं देहेभ्य इव तास्व-
तः ॥ देहिदेहविभागोयमविवेककृतः पुरा ॥१६॥ नानाहं जन्मनानाश्चक्षयावृद्धिः १०४१
क्रियाफलं च दृष्टुरात्मास्य न तु कर्मी यथाग्नेर्दारुविक्रिया ॥१७॥ लिंगमेदेहसंयोगादात्मे-
न्यात्मन्यसद्गृहात्॥ मायायथा तथा नान्यं ध्यायतो ह्यसदाग्रहात्॥१८॥ प्रसुप्तः स्या-
द्देहमानात्तदोत्पत्ति न संसृतिः ॥ जीवतो यथात द्बुद्धियुक्तस्यानहंकृतेः ॥१९॥ तस्मा-
न्मायामनोमात्रं जह्यहं मम तात्मनः ॥ रामभद्रे भगवति मनो धेह्यात्मनीश्वरे ॥२०॥
सर्वभूतात्मनि परे मायामानुषरूपिणी ॥ बाह्येंद्रियार्थसंबंधान्त्याज्यत्वा
मनः शनैः ॥२१॥ तत्र दोषान्दृष्टैवैवा रामानंदे नियोजय ॥ देहबुध्योभवेद्भ्रांतिः
पितामातासुहृत्स्त्रियः ॥२२॥ विलक्षणं यदा देहात् ज्ञानात्मात्मनात्मना ॥ तदा कः
कस्यवा बंधुः ॥ क्वतो नामातापितासुहृत्तु ॥२३॥ मिथ्यात्मानं वरागज्ञातादारागारा
दयः सदा ॥ शब्दादयश्च विषया विविधाश्चैव संपदः ॥२४॥ बलं कोशो भृत्य
र्गो राज्यं भूमिः सुतादयः ॥ अज्ञानजत्वात्सर्वे ते क्षणसंगमभंगुराः ॥२५॥ उत्ति-
ष्ठोत्तिष्ठ सदा रामं भावयन्नाभिभावितः ॥ अनुवर्तस्व राज्यादीन्सुखं च
प्रारब्धमन्वहं ॥२६॥ भूतं न चिन्त्यच वज्ञ नु वर्तमानमथाचरन्॥ विहरस्व
पन्यायं भवदोषैर्नलिप्यसे ॥२७॥ ओपयति रामस्तोपश्रान्तुः सोपरा
ग्नौ

२०४१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यिकं॥ तत्कुरुष्व यथान्यायं रुदतीश्चापि योषितः॥२८॥ निवारय महाबाहो युद्धं लंकां
गच्छतु मा चिरं॥ एवं तथा वदत्वचनं लक्ष्मणाग्रज बिभीषणः॥२९॥ त्यक्त्वा शोक
चमोहं श्रीरामपार्श्वमुपागमत्॥ निमंत्र्य बुध्य धर्मज्ञो चमार्थ्य सहितं वचः॥३०॥
रामस्यैवानुरत्यर्थमुत्तरं पर्य भाषयत्॥ नत्वा समन्वहं क्रूरं सत्क धर्मवि
प्रभो॥५ तं महत्॥३१॥ नाहीं स्मी दिवसस्त्कतुं परदाराभिमर्शनं॥ श्रुत्वा तद्वचनं प्रीतो रामो
वचनमब्रवीत्॥३२॥ मरणांतानि वैराणि निवृत्तं नः प्रयोजनं॥ क्रियतामस्य सं
स्कारो ममाप्येष यथा तव॥३४॥ रामाज्ञां शिरसा धृत्वासौ धर्मे व बिभीषणः॥
सांत्ववाक्यैर्महाबुद्धिं राज्ञीं मंदोदरीं तथा॥३५॥ सांत्वयामास धर्मात्मा धर्मबुद्धि
बिभीषणः॥ त्वरयामास धर्मज्ञः संस्कारार्थं स्वबांधवान्॥३६॥ विंसानि वेत्त्रय
विधिवत्सितमेधैर्विधानतः॥ आहिताग्नेर्यथाकार्यं रावणस्य बिभीषणः॥३७॥
तथैव सर्वमकरोद्धर्चुभिः सह मंत्रिभिः॥ दग्धौ च पावकं तस्य विधियुक्तं बिभी
षणः॥३८॥ स्नात्वा चैवार्द्रवस्त्रेण तिलान्दर्भाभिमिश्रितान्॥ उदकेन च
उदकेन च विमिश्रान्तान् प्रादाय विधिपूर्वकं॥३९॥ आदाय चोदकं तस्मै मूर्
ध्नी चैनं प्रणम्य च॥ ताः स्त्रियो नर्त्तयामास सांत्वयुक्तः पुनः पुनः॥४०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गम्यतामिति नाः सर्वा विविशुर्नगरं तदा ॥ प्रविष्टेषु च सर्वेषु राक्षसेषु बिभीषणः ॥
रामपार्श्वमुपागम्य तदा तिष्ठन्निवेदितवान् ॥ रामोऽपि सहसैन्येन ससुग्रीवः सल
क्ष्मणः ॥४१॥ हर्षं लेभे रिपुं हत्वा यथा वृत्रं शतक्रतुः ॥ मातलिश्च तदा रामं प
रिक्रम्याभिवंद्य च ॥४२॥ अनुज्ञातश्च रामेण ययौ स्वर्गं विहायसा ॥ ततो हृष्टम
ना रामो लक्ष्मणं चेदमब्रवीत् ॥४३॥ बिभीषणाय मे लंकाराज्यं दत्तं पुरैव हि ॥
इदानीमपि गत्वा त्वं लंकामध्ये बिभीषणः ॥४४॥ अभिषेचय विप्रेभ्यो मंत्रवृद्धि
पूर्वकं ॥ इत्युक्तो लक्ष्मणस्तूर्णं जगाम सह वानरैः ॥४५॥ लंकां स्वर्णक
लशैः समुद्रजलसंयुतैः अभिषेकं शुभं चक्रे राक्षसेंद्रस्य धीमतः ॥४६॥ त
तः पौरजनैः सार्द्धं नानोपायनपाणिभिः ॥ बिभीषणश्च सौमित्रिरुपायनपु
रस्कृतः ॥४७॥ दंडप्रणाममकरोद्रामस्याक्लिष्टकर्मणः ॥ रामो बिभीषणं दृष्ट्वा
प्राप्तराज्यं मुदान्वितः ॥४८॥ कृतकृत्यमिवात्मानममन्यत सहानुजः ॥ सुग्रीवं
च समालिंग्य रामो वाक्यमथाब्रवीत् ॥४९॥ साहाय्येन त्वया वीर जितो मे राव
णो महान् ॥ बिभीषणोऽपि लंकायामभिषिक्तो मयानघ ॥५०॥ ततः प्रा
ह हनुमंतं पार्श्वस्थं विनयान्वितं ॥ बिभीषणस्यानुमतो गच्छ त्वं रावणालय
यं ॥५१॥ जानक्यै सर्वमाख्याहि रावणस्य वधादिकं ॥ जानक्याः प्रतिवाक्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैथिलीक्षेममेवनिवेदय॥५२॥एवमाज्ञापितोधीमान्रामेणपवनात्मजः॥प्रविवेशपुरीं
लंकांपूज्यमानोनिशाचरैः॥५३॥प्रविश्यरावणगृहंशिंशपामूलमाश्रितां॥
ददर्शजानकींदेवींकृशांदीनामनिंदितां॥५४॥राक्षसीभिःपरिवृतांध्यायंतीं
राममेवहि॥विनयावनतोभूत्वाप्रणम्यपवनात्मजः॥५५॥कृतांजलिपुटोभूत्वा
रहोभूत्वाग्रतःस्थितः॥तंदृष्ट्वाजानकीतूष्णींस्थित्वापूर्वंस्मृतिंययौ॥५६॥ज्ञा
त्वातंरामदूतंसाहर्षात्सौम्यमुखीभव॥सत्वांसौम्यमुखींदृष्ट्वातस्याःपवननं
दनः॥५७॥रामस्यभाषितंसर्वमाख्यातुमुपचक्रमे॥देवीरामःससुग्रीवोबिभीष
णसहायवान्॥कुशलीवानराणांचससैन्यस्यसलक्ष्मणः॥रावणंससुतंह
त्वासबलंसहमंत्रिभिः॥५९॥त्वामाहकुशलंरामोराज्येकृत्वाबिभीषणं॥श्रु
त्वाभर्तुःशुभंवाक्यंहर्षगद्गदयागिरा॥६०॥किंतेप्रियंकरोम्यद्यनपश्यामिज
गत्त्रये॥समंतेप्रियवाक्यस्यरत्नान्याभरणानिच॥६१॥एवमुक्तस्तुवैदेह्या
प्रत्युवाचप्लवंगमः॥रत्नौघाद्विविधाद्दापिदेवीराज्याद्विशिष्यते॥६२॥ह
तशत्रुंविजयिनंरामंपश्यामिसुस्थिरं॥तस्यतद्वचनंश्रुत्वामैथिलीप्रा
हमारुतिं॥६३॥सर्वेसौम्यागुणाःसौम्यत्वय्येवपरिनिष्ठिताः॥रामंद्रक्ष्यामि
शीघ्रंमामाज्ञापयतुराघवः॥६४॥तथेतितांनमस्कृत्ययथौद्रष्टुंरघूत्त
मं॥जानक्याभाषितंसर्वंरामस्याग्रेन्यवेदयत्॥६५॥यन्निमित्तोयंसमारं
भःकर्मणांचफलोदयः॥तांदेवींशोकसंतप्तांद्रष्टुमर्हसिमैथिलीं॥६६॥

281

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवमुक्तो हनुमता रामो ज्ञानवतां वरः ॥ मायासीतां परित्यज्य जनकीमनलस्थितां ॥६७॥
आदातुमनसा ध्यात्वा रामः प्राह बिभीषणं ॥ गच्छ राजन् जनकजामानयाशु ममां
तिकं ॥६८॥ स्नातां विरजवस्त्राढ्यां सर्वाभरणभूषितां ॥ बिभीषणोपि तच्छ्रुत्वा
जगाम सह मारुतिः ॥६९॥ राक्षसीभिः सुवृद्धाभिः स्नापयित्वाथ मैथिलीं ॥ सर्वा
भरणसंपन्नामारोप्य शिबिकोत्तमे ॥७०॥ यष्टिकैर्बहुभिर्गुप्तां कंचु
कोष्णीषकैः शुभां ॥ ततो द्रष्टुमागताः सर्वे वानरा जनकात्मजां ॥७१॥ तान्वारयं
तो बहवः सर्वतो वेत्रपाणयः ॥ कोलाहलं प्रकुर्वंतो रामपार्श्वमुपाययुः ॥७२॥
दृष्ट्वा तां शिबिकारूढां दूरादथ रघूत्तमः ॥ बिभीषण किमर्थं ते वानरान्वा
रयंति हि ॥७३॥ पश्यंतु वानराः सर्वे मैथिलीं मातरं यथा ॥ पादचारेण सा
यातु जानकी मम संन्निधिं ॥७४॥ रामोपि दृष्ट्वा तां मायासीतां कार्यार्थनि
र्मितां ॥ अवाच्यवादान्बहुशः प्राह तां रघुनंदनः ॥७५॥ अमृष्यमा
णा सा सीता वचनं राघवोदितं ॥ लक्ष्मणं प्राह मे शीघ्रं प्रज्वालय हुता
नं ॥७६॥ विश्वासार्थं हि रामस्य लोकानां प्रत्ययाय च ॥ राघवस्य मतं ज्ञा
त्वा लक्ष्मणोपि तदैव हि ॥७७॥ महाकाष्ठचयं कृत्वा ज्वालयित्वा हुताशनं ॥
रामपार्श्वमुपागम्य तस्थौ तूष्णीमरिंदमः ॥७८॥ ततः सीता परिक्रम्य
राघवं भक्तिसंयुता ॥ पश्यतां सर्वलोकानां देवराक्षसयोषितां ॥७९॥

282

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रत्यदेवताभ्यश्च ब्राह्मणेभ्यश्च मैथिली॥ बद्धांजलिपुटा चेदमुवाचाग्निसमीपगा॥८०॥ यथा मे हृदयं नित्यं नोपसर्पति राघवात्॥ तथा लोकस्य साक्षी मां सर्वतः पातु पावकः॥८१॥ एवमुक्त्वा तु वैदेही परिक्रम्य हुताशनं॥ विवेश ज्वलनं दीप्तं निर्भयेन हृदा सती॥८२॥ दृष्ट्वा ततो भूतगणाः ससिद्धा सीतां महावह्निगतां प्रशान्तां॥ परस्परं प्राकुरतोरसमीतां रामः श्रियं स्वां कथमत्यजद्धि मुग्धां॥८३॥ इति श्रीम॰ उ॰ लंकाकांडे द्वादशः सर्गः॥१२॥ श्री

ततः शक्रः सहस्राक्षो यमश्च वरुणस्तथा कुबेरश्च महातेजाः पिनाकी वृषवाहनः॥१॥ ब्रह्मा ब्रह्मविदां श्रेष्ठो मुनिभिः सिद्धचारणैः॥ पितरो ऋषयः साध्या गंधर्वाप्सरसो गणाः॥२॥ एते चान्ये विमानाग्र्यैराजग्मुर्यत्र राघवः॥ अब्रवन्परमात्मानं रामं प्रांजलयश्च ते॥३॥ कर्ता हि सर्वलोकानां साक्षी विज्ञानविग्रहः॥ वसूनामष्टमोऽसि त्वं रुद्राणां शंकरो भवान्॥४॥ आदिकर्तासि लोकानां ब्रह्मा त्वं चतुराननः॥ अश्विनौ घ्राणभूतौ ते चक्षुषी चंद्रभास्करौ॥५॥ लोकानामादिरंतोऽसि नित्य एकः सदोदितः॥ सदा शुद्धः सदा बुद्धः सदा मुक्तो गुणाद्वयः॥६॥ त्वं मायासंवृतानां हि भासि मानुषविग्रहः॥ त्वन्नाम्नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२०४

न्नामस्मरतां राम सदाभाति चिदात्मकः॥ गवेषणेन दृष्टं स्थानमस्माकं नेत्रसास्र
हा॥ त्वया संन्निहितेनादुष्टः पुनः प्राप्तं स्वकं पदं॥ ८॥ एवमुक्त वसुदेवे पुत्रं लास्मा
स्मास्मितामहः॥ अब्रवीत्तपणो नाम भूत्वा रामं सत्यपथिस्थितं॥ ९॥ ब्रं सोचवे॥
वंदे रामं विष्णुमशेषं स्थितिहेतुं त्वामध्यात्मज्ञानिभिरंतर्हृदि भाव्यं॥ हे दि
याहेयद्वंद्वविहीनं परमेकं सत्तामात्रं सर्वहृदिस्थं हृद्दर्पं॥ १०॥ प्राणापानौ
निश्चयबुध्या हृदि रुध्वा छित्वा सर्वं संशयबंधं विषयौघान्॥ पश्यंतीशं
यं गतमोहा यतयस्तं वंदे रामं रत्नकिरीटं रविभासं॥ ११॥ मायातीतं माध
वमाद्यं जगदादिं मानातीतं मोहविनाशं मुनिवंद्यं॥ १२॥ भावाभावप्रत्य
हीनं भवमुख्यैर्भोगासक्तैरर्चितपादांबुजयुग्मं॥ नित्यं शुद्धं बुधमनंतं प्रणवा
ख्यं वंदे रामं वीरमशेषासुरदावं॥ १३॥ त्वं मे नाथो नाथितकार्याखिलधारी व
मानातीतो माधवरूपोऽखिलधारी॥ भक्त्या गम्यो भावितरूपो भवहारी योगाभ्या
सैर्भावितचेतः सहचारी॥ १४॥ त्वामाद्यंतं लोकपतीनां परमेशं लोकाती
तं लौकिकमानैरधिगम्यं॥ भक्तिश्रद्धाभावसमेतैर्भजनीयं वंदे रामं सुं
दरमिंदीवरनीलं॥ १५॥ को वा ज्ञातुं त्वामतिमानं गतमानं मानासक्तो मा
२०४४॥७ योगिध्येयं योगविधानं परिपूर्णं वंदे रामं रंजितलोकं रमणीयं॥ १६॥ × वं.८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

माधवभक्तो मुनिमान्यं॥ वृंदारण्ये वंदितवृंदारकवंद्यं वंदे रामं भवमुखवंद्यं सु
खकंदं॥१६॥ नानाशास्त्रैर्वेदकदंबैः प्रतिपाद्यं नित्यानंदं निर्विषयज्ञानमनादिं
मत्सेवार्थं मानुषभावं प्रतिपन्नं वंदे रामं मरकतवर्णं मथुरेशं॥१७॥ श्रद्धा
युक्तो यः पठतीमं स्तवमाद्यं ब्राह्मं ब्रह्मज्ञानविधानं भुवि मर्त्यः॥ रामं श्यामं
कामितकामं प्रदमीशं ध्यात्वा ध्याता पातकजालैर्विगतः स्यात्॥१८॥ स्तुत्वा
स्तुतिं लोकगुरुर्विभावसुः स्वांके समाधाय विदेहपुत्रिकां॥ विभ्राजमानां विमलारुणद्युतिं रक्तांबरां दिव्यविभूषणांचितां॥१९॥ प्रोवाच
साक्षाज्जगतां रघूत्तमं प्रसन्नमर्वाग्निहरं हुताशनः॥ गृहाण देवीं रघु
नाथ जानकीं पुरा त्वया मय्यवरोपितां वने॥२०॥ विधाय मायां जनकात्म
जां हरे दशाननप्राणविनाशनाय च॥ हतो दशास्यः सह पुत्रबांधवैर्नि
राकृतो नेन भरो भुवः प्रभो॥२१॥ तिरोहिता सा प्रतिबिंबरूपिणी कृता य
दर्थं कृतकृत्यतामगात्॥ ततोतिहृष्टः परिगृह्य जानकीं रामस्तदा तं प्र
श्वा॰१४ तिपूज्य पावकं॥२२॥ स्वांके समावेश्य सदानपायिनीं श्रियं त्रिलोकी
जननीं श्रियः पतिः॥ दृष्ट्वाथ रामं जनकात्मजायुतं श्रिया स्फुरंतं सुर

नायकोमुदा॥ २३॥ मन्नया गिरागाद्गदयासमेत्य स्वलतां जलिस्तातु मथोप
चक्रमे॥ २४॥ ईश्वर उवाच॥ भजेहं सदा राममिंदीवराभं भवारण्यदावान
लाभाभिधानं॥ भवानीहृदा भावितानंदरूपं भवाभाववहेतुं भवादि
प्रपन्नं॥ २५॥ सुरानीकदुःखौघनाशैकहेतुं नराकारदेहं निराकारमी
ड्यं॥ परेशं परानंदरूपं वरेण्यं हरिं राममीशं भजे भारनाशं॥ २६॥ प्रपं
न्नाखिलानंददोहं प्रसन्नं प्रपन्नार्त्तिनिःशेषनाशाभिधेयं॥ तपोयोगं
भाजां सुदूरे विभातं मुदा योगभाजामदूरे विभातं॥ चिदानंदकंदं सदा
राघवेशं विदेहात्मजानंदरूपं प्रपद्ये॥ २८॥ महायोगमायाविशेषानु
युक्तो विभासीश लीलानराकारवृत्तिः॥ त्वदानंदलीलाकथा कूर्णी
पूर्णा सदानंदरूपा भवतीह लोके॥ २९॥ अहं मानपानाभिमत्तोमे मन्न
नवेदाखिलेशाभिमानाभिमानः॥ इदानीं भवत्सादपद्मप्रसादात्त्रि
लोकाधिपत्याभिमानो विनष्टः॥ ३०॥ स्फुरद्रत्नकेयूरहाराभिरामं
धराभारभूतासुरानीकदावं॥ शरच्चंद्रवक्त्रं लसत्पद्मनेत्रं दुरावा
रपारं भजे राघवेशं॥ ३१॥ शराचीशानीलाभनीलांगकांतिं चिरो

धादिरक्षोगणात्लोकत्राणं॥ किरीटादिभिःशोभमानं पुराशक्तिस्तभं भजेरामचंद्रं रघू
णामधीशं॥ ३२॥ ततस्तुचंद्रकोटिप्रकाशादिपीठे समासीनमंके समाधाय
सीतां॥ स्फुरद्धेमवर्णां तडित्पुंजभासं भजेरामचंद्रं निवृत्तार्तितंद्रं॥ ३३॥
ततःप्रोवाच भगवान् भवान्यासहितो भवः॥ रामं कमलपत्राक्षं विमानस्थो
नभःस्थले॥ ३४॥ आगमिष्याम्ययोध्यायां द्रष्टुं त्वां राज्यसत्कृतं॥ इदानी
पश्यपि तेऽरमस्य देहस्य राघव॥ ३५॥ ततो पहुमानस्थं रामामोदशर
थःपुरः॥ ननाम शिरसा पादौ मुदा पत्न्या सहानुजः॥ ३६॥ आलिंग्य मु
र्धन्यवघ्राय रामं दशरथोऽब्रवीत्॥ तारितोऽस्मि त्वया वत्स संसाराद्दुःख
सागरात्॥ ३७॥ इत्युक्त्वा पुनरालिंग्य ययौ रामेण पूजितः॥ रामोऽपि देव
देवेशं दृष्ट्वाप्याह कृतांजलिः॥ ३८॥ मत्कृते निहतान्संख्ये वानरान्संह
तान्मृधे॥ जीवयाशु सुधां दृष्ट्वा सहस्राक्ष ममाज्ञया॥ ३९॥ तथेत्यं
मृतवृष्ट्या ताननुजीवयामास वानरान्॥ ये ये मृताः पूर्वं ते ते सुप्तो पुचे
त्थिता इव॥ ४०॥ पूर्ववद्दृष्टोहृष्टा रामपार्श्वमुपागताः॥ विभीषणस्तु
सोऽप्यंगं प्रणिपत्याब्रवीद्वचः॥ ४१॥ देव मामनुगृह्णीष्व मयि भक्तिर्यदि

287

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दातव॥मंगलस्नानमद्य त्वं कुरु सीतासमन्वितः॥४२॥अलंकृत्य सह भ्रात्रा
त्वागमिष्यामहे वयं॥विभीषणः वचः श्रुत्वा प्रत्युवाच रघूत्तमः॥४३॥सुकु
मारोतिभक्तो मे भरतो मामवेक्षते॥जटावल्कलधारी सशत्रुघ्नसहितः पु
रे॥४४॥कथं तेन विना स्नानं मलंकारादिकं मम॥अतः सुग्रीवमुख्यां
स्त्वं पूजयाशु विशेषतः॥४५॥पूजितेषु कपींद्रेषु पूजितोहं न संशयः॥
इत्युक्तो राघवेनाशु स्वर्णरत्नांबराणि च॥४६॥ववर्ष राक्षसश्रेष्ठो यथाम
यथारुचि॥ततस्तान्वानरान्दृष्ट्वा रामो रत्नैश्च यूथपान्॥४७॥अभिनंद्
यथान्यायं विससर्ज हरीश्वरान्॥विभीषणसमानीतं पुष्पकं सूर्यवर्च
सं॥४८॥आरुरोह ततो रामस्तद्विमानमनुत्तमं॥अंकमादाय वैदेहीं लज्ज
मानां यशस्विनीं॥४९॥लक्ष्मणेन सह भ्रात्रा विक्रांतेन धनुष्मता॥
अब्रवीच्च विमानस्थः श्रीरामः सर्ववानरान्॥५०॥सुग्रीवं हरिराजं
च अंगदं च विभीषणं॥मित्रकार्यं कृतं सर्वैर्यथेष्टं मंतुमर्हथ॥५१॥
अनुज्ञाता मया सर्वे यथेष्टं गंतुमर्हथ॥सुग्रीव प्रतियाह्याशु किष्किं
धां सर्वसैनिकैः॥५२॥स्वराज्येन स्थितो लंकायां मम भक्तो विभीषण॥

289

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नवां धर्षयितुं शक्ताः सेंद्रा अपि दिवौकसाः ॥५३॥ अयोध्यां गंतुमिच्छा
मि राजधानीं पितुर्मम ॥ एवमुक्तास्तु रामेण वानरास्ते महाबलाः ॥५४॥
ऊचुः प्रांजलयः सर्वे राक्षसश्च बिभीषणः ॥ अयोध्यां गंतुमिच्छामि
स्त्वया सह रघूत्तम ॥५५॥ दृष्ट्वा तामभिषेकं च कौशल्यालिंगितप
रं ॥ पश्चाद्वृणीमहे पूर्वं राज्यं मनुज्ञां देहि मे प्रभो ॥५६॥ रामस्तथेति सु
ग्रीवो वानरैः सबिभीषणः ॥ पुष्पकं सहनूमांश्च शीघ्रमारोह सांप्रतं ॥५७॥
ततस्तु पुष्पकं दिव्यं सुग्रीवः सह सेनया ॥ बिभीषणश्च सामात्यः
सर्वे चारुरुहुर्द्रुतं ॥५८॥ तेष्वारूढेषु सर्वेषु कौबेरं परमासनं ॥ रा
घवेणाभ्यनुज्ञातः मुत्पपात विहायसा ॥५९॥ बभौ तेन विमानेन
हंसयुक्तेन भास्वता ॥ प्रहृष्टश्च तदा रामश्चतुर्मुख इवापरः ॥६०॥
ततो बभौ भास्करबिंबतुल्यं कुबेरयानं तपसानुलब्धं ॥ रामेण शो
भां नितरां प्रपेदे सीता समेतेन सहानुजेन ॥६१॥ इतिश्री मद०
उमा० लंकाकांडे त्रयोदशसर्गः ॥१३॥छ॥ पालयित्वा ततश्चक्षुः स
र्वतो रघुनंदनः ॥ अब्रवीन्मैथिलीं सीतां रामः शशिनिभानना ॥१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रिकुटसिखराग्रस्तां पश्यलंकां महाप्रभां॥ एतां रणभुवं पश्य रक्तकर्दमपंकिलां॥२॥
असुराणां प्लवंगानां मत्र वै शसनं महत्॥ अत्र मे निहतः शेते रावणो राक्षसेश्वरः॥३
कुंभकर्णेंद्रजिन्मुख्याः सर्वे वात्र निपातिताः॥ एष सेतुर्मया बद्धः सागरे सलिलाशये॥४
एतच्च दृश्यते तीर्थं सागरस्य महात्मनः॥ सेतुबंध इति ख्यातं त्रैलोक्ये न च पूजितः॥५॥
एतत्पवित्रं परमं दर्शनात्पातकापहं॥ अत्र रामेश्वरो देवो मया शंभुः प्रतिष्ठितः॥६॥
अत्र मां शरणं प्राप्तो मंत्रिभिः सह विभीषणः॥ एषा सुग्रीवनगरी किष्किंधा चित्रकानना॥७
अत्र शमात्तया तारा प्रमुखा हरियोषितः॥ अनयामास सुग्रीवः सीतायाः प्रियकाम्यया॥८
ताभिः सहोत्थितं दीप्तं विमानं प्रेक्ष्य राघवः॥ प्राह चाद्रिं ऋष्यमूकं पश्य बाल्यत्र मे हतः॥९
अगस्त्यस्य सुतीक्ष्णस्य पश्याश्रमपदे शुभे॥ एते वै तापसाः सर्वे दृश्यंते वरवर्णिनि॥१०॥
असौ शैलवरो देवी चित्रकूटप्रकाशते॥ अत्र मां केकयीपुत्रः प्रसादयितुमागतः॥११॥
भरद्वाजाश्रमं पश्य दृश्यते यमुनातटे॥ एषा भागीरथी गंगा दृश्यते लोकपावनी॥१२॥
एषा सा दृश्यते सीते सरयूर्यूपमालिनी॥ एषा सा दृश्यते योध्या प्रणामं कुरु भामिनि॥१३॥
एवं क्रमेण संप्राप्तो भरद्वाजाश्रमं हरिः॥ पूर्णे चतुर्दशे वर्षे पंचम्यां रघुनंदनः॥१४॥
भरद्वाजमुनिं दृष्ट्वा ववंदे सानुजः प्रभुः॥ पप्रच्छ मुनिमासीनं विनयेन रघूत्तमः॥१५॥
शृणोषि कश्चिद्भरतः कुशल्यास्ते सहानुजः॥ सुभिक्षा वर्तते योध्या जीवंति हि च मातरः॥१६
श्रुत्वा रामस्य वचनं भरद्वाजः प्रहृष्टधीः॥ प्राह सर्वे कुशलिनो भरतस्य महात्मनः॥१७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

फलमूलकृताहारोजटावल्कलधारकः॥पादुकेसंन्यस्यराज्येत्वांसुप्रतीक्षते॥१८॥
यद्यत्कृतंत्वयाकर्मदंडकेरघुनंदन॥राक्षसानांविनाशंचसीताहरणपूर्वकं॥१९॥
सर्वंज्ञातंमयारामतपसातेप्रसादतः॥त्वंब्रह्मपरमंसाक्षादादिमध्यांतवर्जितः॥२०॥
त्वमग्रेसलिलंसृष्ट्वातत्रसुप्तोसिभूतकृत्॥नारायणोसिविश्वात्मानराणामंतरात्मकः॥२१
त्वन्नाभिकमलोत्पन्नोब्रह्मालोकपितामहः॥अतस्त्वंजगतामीशःसर्वलोकनमस्कृतः॥२२॥
त्वंविष्णुर्जानकीलक्ष्मीःशेषोयंलक्ष्मणाभिधः॥आत्मनासृजसीदंत्वमात्मन्येवात्ममायया॥२३
नसज्जसेनभोवत्त्वंचिच्छक्त्यासर्वसाक्षिकः॥बहिरंतश्चभूतानांत्वमेवरघुनंदन॥२४॥
पूर्णोपिमूढदृष्टीनांविच्छिन्नइवलक्ष्यसे॥जगत्त्वंजगदाधारस्त्वमेवपरिपालकः॥२५॥
त्वमेवसर्वमखिलंत्वदृतेनान्यत्रकिंचन॥मायासृजसिलोकांश्चस्वगुणैरहमादिभिः॥२६
त्वच्छक्तिप्रेरितारामतस्मात्त्वंप्युपचर्यसे॥यथाचुंबकसान्निध्याच्चलंत्येवायसादयः॥२७
जडास्तथात्वयादृष्टामायासृजतिवैजगत्॥देहद्वयमदेहस्यतवविश्वंरिरक्षिषोः॥२८॥
विराट्स्थूलंशरीरंतेसूत्रंसूक्ष्ममुदाहृतं॥विराजःसंभवंत्येतेअवताराःसहस्रशः॥२९
कार्यांतेप्रविशंत्येवविराजंरघुनंदन॥अवतारकथालोकेयेगायंतिगृणंतिच॥३०॥
अनन्यमनसोमुक्तिस्तेषामेवरघूत्तम॥त्वंब्रह्मणापुराभूमेर्भारहारायराघव॥३१॥
प्रार्थितस्तपसातुष्टस्त्वंजातोसिरघूत्तम॥देवकार्यमशेषेणकृतंतेरामदुष्करं॥३२॥
बहुवर्षसहस्राणिमानुषंदेहमाश्रितः॥कुर्वन्दुष्करकर्माणिलोकद्वयहितायच॥३३॥

२९६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पापहारेण यशसा भुवनं पूरयिष्यसि॥ प्रार्थयामि जगन्नाथं पवित्रं कुरु मे गृहं॥३४॥
स्थित्वाद्य भुक्त्वा सबलः श्वो गमिष्यसि पत्तनं॥ तथेति राघवोतिष्ठत्तस्मिन्नाश्रम उत्तमे॥३५॥
ससैन्यः पूजितस्तेन सीतया लक्ष्मणेन च॥ ततो रामश्चिंतयित्वा मुहूर्त्तं प्राह मारुतिं॥३६॥
इतो गच्छ हनूमंस्त्वमयोध्यां प्रति सत्वरः॥ जानीहि कुशली कच्चिज्जनो नृपतिमंदिरे॥३७॥
शृंगवेरपुरं गत्वा ब्रूहि मित्रं गुहं मम॥ जानकीलक्ष्मणोपेतमागतं मां निवेदय॥३८॥
नंदिग्रामं ततो गत्वा भ्रातरं भरतं मम॥ दृष्ट्वा ब्रूहि सभार्यस्य सभ्रातुः कुशलं मम॥३९॥
सीताया हरणादीनि रावणस्य वधादिकं॥ ब्रूहि क्रमेण मे भ्रातुः सर्वं तत्र विचेष्टितं ४०
सर्वं ज्ञात्वा पुनः शीघ्रमागच्छ मम संन्निधिं॥ तथेति हनुमांस्तत्र मानुषं वपुरास्थितः ४१
नंदीग्रामं ययौ तूर्णं वायुवेगेन मारुतिः॥ गरुत्मानिव वेगेन जिघृक्षन्भुजगोत्तमं॥४२॥
शृंगवेरपुरं प्राप्य गुहमासाद्य मारुतिः॥ उवाच मधुरं वाक्यं प्रहृष्टेनांतरात्मना॥४३॥
रामो दाशरथिः श्रीमान्सखा ते सह सीतया॥ सलक्ष्मणस्त्वां धर्मात्मा क्षेमी कुशलमब्रवीत्॥ ४४
अनुज्ञातोद्य मुनिना भरद्वाजेन राघवः॥ आगमिष्यति तं देवं द्रक्ष्यसि त्वं रघूत्तमं॥४५॥
एवमुक्त्वा महातेजाः संप्रहृष्टतनूरुहं॥ उत्पपात महावेगो वायुवेगेन मारुतिः॥४६॥
सोपश्यद्रामतीर्थं च शरयूं च महानदीं॥ तामतिक्रम्य हनुमान्नंदीग्रामं ययौ मुदा॥४७॥
१४८ क्रोशमात्रे त्वयोध्यायाश्चीरकृष्णाजिनांबरं॥ ददर्श भरतं दीनं कृशमाश्रमवा-
सिनं॥४८॥

292

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मलपंकविदिग्धांगं जटिलं वल्कलांबरं।।फलमूलकृताहारं रामचिंतापरायणं।४९।
पादुके ते पुरस्कृत्य शासयंतं वसुंधरां।।मंत्रिभिः पौरमुख्यैश्च काषायांबरधारिभिः ५०
धृतदेहं मूर्त्तिमंतं साक्षाद्धर्ममिव स्थितं।।उवाच प्रांजलिर्वाक्यं हनूमान्मारुतात्मजः ५१
यं त्वां चिंतयसे रामं तापसं दंडके स्थितं।।अनुशोचसि काकुत्स्थं स त्वां कुशलमब्रवीत् ५२
प्रियमाख्यामि ते देव शोकं त्यज सुदारुणं।।अस्मिन्मुहूर्त्ते भ्रात्रा त्वं रामेण च समागतः ५३
समरे रावणं हत्वा रामः सीतामवाप्य च।।उपयाति समृद्धार्थः ससीतः सहलक्ष्मणः।।५४।।
एवमुक्तो महातेजा भरतो हर्षमूर्छितः।।पपात भुवि चाश्वस्तः कैकेयीप्रियनंदनः ५५
आलिंग्य भरतः शीघ्रं मारुतिं प्रियवादिनं।।आनंदजैरश्रुजलैः सिषेच भरतः कपिं ५६
देवो वा मानुषो वा त्वमनुक्रोशादिहागतः।।प्रियाख्यानस्य ते सौम्य ददामि ब्रुवतः प्रियं ५७
गवां शतसहस्रं च ग्रामाणां च शतं वरं।।सर्वाभरणसंपन्नं मुग्धाः कन्यास्तु षोडश।।५८।।
षी ११ एवमुक्त्वा पुनः प्राह भरतो मारुतात्मजं।।बहूनि नाम वर्षाणि गतस्य सुमहद्वनं।।५९
शृणोम्यहं प्रीतिकरं मम नाथस्य कीर्त्तनं।।कल्याणी बत गाथेयं लौकिकी प्रतिभाति मे ६०
एति जीवंतमानंदो नरं वर्षशतादपि।।राघवस्य हरीणां च कथमासीत्समागमः ६१
तत्त्वमाख्याहि भद्रं ते विश्वसेयं वचस्तव।।एवमुक्तोथ हनूमान्भरतेन महात्मना।।
आचचक्षेथ रामस्य चरितं कृत्स्नशः क्रमात्।।श्रुत्वा तु परमानंदं भरतो मारु
तात्मजात्।।६३ आज्ञापयच्छत्रुहणं मुदायुक्तं मुदान्वितः।।दैवतानि च यावंति
नगरे रघुनंदन।।६४।।

२९३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१५९

नानोपहारबलिभिः पूजयंतु माधिय॥ ततो वैतालिकैश्चैव बंदिनस्तुतिपाठकाः ६५
वारमुख्याश्च शतशो निर्ययौ हृद्यवसंघशः॥ राजदारास्तथामात्याः सेना हस्त्यश्वपत्तयः ६६
ब्राह्मणाश्च तथा पौरा राजानो ये समागताः॥ निर्ययुः राघवस्यास्य द्रष्टुं शशिनिभाननं ६७॥
भरतस्य वचः श्रुत्वा शत्रुघ्नः परिवेष्टितां॥ अलंचक्रुः श्च नगरीं मुक्तारत्नमयोज्वलैः॥६८॥
तोरणैश्च पताकाभिर्विचित्राभिरनेकधा॥ अलंकुर्वंतु वेश्मानि नानाबलिविचक्षणाः ६९॥
निर्ययुस्तु द्विजाः सर्वे रामदर्शनलालसाः॥ हयानां शतसाहस्रं गजानामयुतं तथा॥७०॥
रथानां दशसाहस्रं स्वर्णसूत्रविभूषितं॥ पारमेष्ठीमुपादाय द्रव्याण्युच्चावचानि च॥७१
ततस्तु शिबिकारूढा निर्ययुः राजयोषितः॥ भरतः पादुके न्यस्य शिरसैव कृतांजलिः॥७२॥
शत्रुघ्नं सहितो रामं पादचारेण निर्ययौ॥ ततो ददृशतुर्दूराद्विमानं चंद्रसन्निभं॥७३॥
पुष्पकं सूर्यसंकाशं मनसा ब्रह्मनिर्मितं॥ तस्मिन्भ्रातरौ वैदेह्या रामलक्ष्मणौ॥ ७४॥ विरो॰
सुग्रीवश्च कपिश्रेष्ठो मंत्रिभिश्च विभीषणः॥ दृश्यंते परस्य तजनाद्त्यात्पवनसंज्ञः॥७५॥
ततो हर्षसमुद्भूतो निश्वसो दिवमास्पृशत्॥ स्त्रीबालयुववृद्धानां [illegible]यमिति कीर्तितेयनु ७६ मो॰
रथकुंजरवाजिस्था अवतीर्य महींगताः॥ ददृशुस्ते विमानस्थं जनाः सोममिवांबरे॥ ७७॥
प्रांजलिर्भरतो भूत्वा प्रहृष्टो राघवोन्मुखः॥ ततो विमानाग्रगतं भरतो राघवं मुदा ७८
ववंदे प्रणतो रामं मेरुस्थमिव भास्करं॥ ततो रामाभ्यनुज्ञातं विमानमपतद्भुवि॥७९॥

१५९

२२३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आरोपितो विमानं तद्भरतः सानुजस्तदा ॥ राममासाद्य मुदितः पुनरेवाभ्यवादयत् ॥ ८०॥
समुत्थाप्य चिराद्दृष्टं भरतं रघुनंदनः ॥ भ्रातरं स्वांकमारोप्य मुदा तं परिषस्वजे ॥ ८१॥
ततो लक्ष्मणमासाद्य वैदेहीं नाम कीर्त्तयन् ॥ अभ्यवादयत प्रीतो भरतः प्रेमविह्वलः ८२
सुग्रीवं जांबवंतं च युवराजं तथांगदं ॥ मैंदद्विविदनीलांश्च ऋषभं चैव षस्वजे ॥ ८३॥
सुषेणं च नलं चैव गवाक्षं गंधमादनं ॥ शरभं पनसं चैव भरतः परिषस्वजे ॥ ८४॥
सर्वे ते मानुषं रूपं कृत्वा भरतमादृताः ॥ पप्रच्छुः कुशलं सौम्याः प्रहृष्टाश्च प्लवंगमाः ८५
ततः सुग्रीवमालिंग्य भरतः प्राह भक्तितः ॥ त्वत्सहायेन रामस्य जयोभूद्रावणो हतः ८६
त्वमस्माकं चतुर्णां तु भ्राता सुग्रीव पंचमः ॥ शत्रुघ्नश्च तदा राममभिवाद्य सलक्ष्मणं ८७
सीतायाश्चरणौ पश्चाद्ववंदे विनयान्वितः ॥ रामो मातरमासाद्य विवर्णां शोककर्शितां ८८
जग्राह प्रणतः पादौ मनो मातुः प्रसादयन् ॥ कैकेयीं च सुमित्रां च ननामातितरां ततः ८९
भरतः पादुके ते तु राघवस्य सुपूजिते ॥ योजयामास रामस्य पादयोर्भक्तिसंयुतः ९०॥
राज्यमेतन्न्यासभूतं मया निर्यापितं तव ॥ अद्य मे सफलं जन्म फलितो मे मनोरथः ९१
यत्पश्यामि समायातमयोध्यां त्वामहं प्रभो ॥ कोष्ठागारं गृहं कोशं सैन्यं दशगुणं मया ९२
त्वत्तेजसा जगन्नाथ पालयस्व स्वकं पुरं ॥ इति ब्रुवाणं भरतं दृष्ट्वा सर्वे कपीश्वराः ९३
मुमुचुर्नेत्रजं तोयं प्रशशंसुः मुदान्विताः ॥ ततो रामः प्रहृष्टात्मा भरतं स्वांकगं मुदा ९४
ययौ तेन विमानेन भरतस्याश्रमं तदा ॥ अवरुह्य तदा रामो विमानाग्र्यान्महीतले ९५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अब्रवीत्सुमुखं कंदर्पो गच्छ वैश्रवणं वह ॥ अनुगच्छाद्य जानामि कुबेरं धनपालितं ॥ ९६ ॥
ततो वसिष्ठस्य गुरोः पदांबुजं नवाय यथा देवगुरोः शतक्रतुः ॥ दत्त्वा महार्हासनमुत्त
मं गुरोरुपाविवेशाथ गुरोः समीपतः ॥ ९७ ॥ इति श्रीम० उ० लंकाकांडे चतुर्दशः ॥ १४ ॥
ततस्तु कैकयीपुत्रो भरतो भक्तवत्सलः ॥ शिरस्यंजलिमादाय ज्येष्ठं भ्रातरमब्रवी
त् ॥ १ ॥ माता मे सत्कृता राम दत्तं राज्यं त्वया मम ॥ ददामि तत्तेन पुनर्यथाहमददां मम ॥ २ ॥
दृष्ट्वा तु पादयोर्न्यस्य साष्टांगं प्रणिपत्य च ॥ बहुधा प्रार्थयामास कैकेय्या गुरुणा सह ॥ ३ ॥
नश्चेति प्रतिजग्राह भरताद्राज्यमीश्वरः ॥ मायामाश्रित्य सत्कां नरजेष्ठमुपागतः ॥ ४ ॥
स्वं च राज्यमनुभवो यस्य सुखज्ञानैकरूपिणः ॥ निरस्तातिशयानंदरूपिणः परमा
त्मनः ॥ ५ ॥ मानुषेन तु राज्येन किं तस्य जगदीश्वरात् ॥ यस्य भ्रूभंगमात्रेण वि
लोकीनस्य निक्षणात् ॥ ६ ॥ यस्य चानुग्रहे नास्तु भवं स्यात्खंडलश्रियः ॥ लि
लास्पृष्टा माहात्म्यस्पृष्टेः किं ये मतद्रमापते ॥ ७ ॥ ततः शत्रुघ्नवचनान्निपु
णाः श्मश्रुकृंतकाः ॥ संभृताराज्याभिषेकार्थमानीता राघवस्य हि ॥
पूर्वं तु भरतेन लक्ष्मणेन महात्मनि ॥ सुग्रीवे वानरेंद्रे च राक्षसेंद्रे बि
भीषणे ॥ १० ॥ विशोधितजटः स्नातश्चित्रमाल्यानुलेपनः ॥ महार्ह
वसनोऽप्रीतः तस्थौ तत्र श्रिया ज्वलन् ॥ ११ ॥ प्रतिकर्म च रामस्य लक्ष्मणस्य

× तथापि भजतां नित्यं कामपूरत्वविलसया ॥
× लीला मानुषदेहेन सर्वं पष्यनुवर्तिनं ॥ ९ ॥

१५०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

माहामते॥ कारयाम्यस भरत सीताया राजयोषितः॥१२॥ माहार्हवस्त्राभरणैरलं
चक्रुः सुमध्यमाः॥ ततो वानरपत्नीनां सर्वासामेव शोभनं॥१३॥ आकारयत कौशल्या
प्रहृष्टा पुत्रवत्सला॥ ततः स्यंदनमादाय शत्रुघ्नवचनात्सुधीः॥१४॥ सुमंत्रुः सूर्य
संकाशं योजयित्वाग्रतः स्थितः॥ आरुरोह रथं रामः सत्यव्रतपरायणः॥१५॥ सुग्री
वो वायुराजश्च हनूमांश्च विभीषणः॥१५॥ स्नाता दिव्यांबरधरा दिव्याभरणभूषि
ताः॥ राममन्वयुरग्रे च रथाश्वगजवाहिनः॥१६॥ सुग्रीवपत्न्यः सीता च ययुर्यानैः
पुरं महत्॥ वज्रपाणिर्यथा देवैः हरितश्वरथे स्थितः॥१७॥ प्रययौ रथमास्थाय तदा
रामो महत्पुरं॥ सारथ्यं भरतश्चक्रे रत्नदंडमाद्युतिः॥१८॥ श्वेतातपत्रं शत्रुघ्नो ल
क्ष्मणो व्यजनं दधौ॥ चामरं च समीपस्थो न्यवीजयदरिंदमः॥१९॥ शशिप्रका
शं चापरं जग्राह सुरनायकः॥ दिविजैः सिद्धसंघैश्च ऋषिभिर्दिव्यदर्शनैः॥२०॥
स्तूयमानस्य रामस्य शुश्रुवे मधुरध्वनिः॥ मानुषं रूपमास्थाय वानरा गज
वाहनाः॥२१॥ भेरीशंखनिनादैश्च मृदंगपणवानकैः॥ प्रययौ राघवश्रेष्ठस्तां
पुरीं समलंकृतां॥२२॥ ददृशुस्ते समायांतं राघवं पुरवासिनः॥ दूर्वादलश्याम त
नुं महार्हं किरीटरत्नाभरणांचितांगं॥ आरक्तकंजायतलोचनं तं दृष्ट्वाय युर्मो

२९७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दमतीवपुण्याः ॥२३॥ विचित्ररत्नांचितसूत्रनद्धं पीतांबरं पीनभुजांतरालं ॥ जन
र्घ्यरत्नंफलद्दिव्यहारैर्विराजमानं रघुनंदनं प्रजाः ॥२४॥ सुग्रीवमुख्यैर्हरिभिः प्र
शांतैर्निषेव्यमानं रविलुल्यभासं ॥ कस्तूरिकाचंदनलिप्तगात्रं नीवितकल्मे
कुः पुष्पमालं ॥२५॥ दृष्ट्वास्त्रियो राममुपागतं मुदा प्रहर्षवेगोत्कलितानना स्त्रियः ॥
उपास्य सर्वं गृहकार्यमाहितं हर्म्याणि चैवारुरुहुः स्वलंकृताः ॥२६॥ दृष्ट्वाह
रिं सर्वदृगुत्सवाकृतिं पुष्पैकिरंत्यः स्मितशोभिताननाः ॥ दृग्भिः पुनर्नेत्रम
नोरसायनं स्वानंदमूर्तिं मनसाभिरेमिरे ॥२७॥ रामः स्मितस्निग्धदृशा प्रजा
स्तथापश्यन्प्रजानाथस्त्वापरः प्रभुः ॥ जनैर्जगामाशु स पितुः स्वलंकृतं गृहं
महेंद्रालयसंन्निभं हरिः ॥२८॥ प्रविश्य वेश्मांतरसंस्थितं मुदा रामो ववंदे चर
णौ स्वमातुः ॥ क्रमेण सर्वाः पितृयोषितः प्रभुर्ननाम भक्त्या रघुवंशकेतुः ॥२९
ततो भरतमाहेदं रामः सत्यपराक्रमः ॥ सर्वसंपत्समायुक्तं मम मंदिरमुत्तमं ॥३०॥
मित्राय वानरेंद्राय सुग्रीवाय प्रदीयतां ॥ सर्वेभ्यः सुखवासाय मंदिराणि प्रकल्पय ॥३१॥
रामेणैवं समादिष्टो भरतश्च तथाकरोत् ॥ उवाच च महातेजाः सुग्रीवं राघवानुजः ॥३२॥
राघवस्याभिषेकार्थं चतुःसिंधुजलं शुभं ॥ आनेतुं प्रेषय स्वाशु दूतांस्त्वरितवि
क्रमान् ॥३३॥ प्रेषयामास सुग्रीवो जांबवंतं मरुत्सुतं ॥ अंगदं च सुषेणं च ते ग
ता वायुवेगतः ॥३४॥

२९८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दमतीव पुण्याः ॥२३॥ विचित्ररत्नांचितसूत्रनद्धं पीतांबरं पीनभुजांतरालं ॥ अन
र्घ्यरत्नं फलदिव्यहारैर्विरोचमानं रघुनंदनं प्रजाः ॥२४॥ सुग्रीवमुख्यैर्हरिभिः प्र
शांतैर्निषेव्यमानं रविलुल्यभासं ॥ कस्तूरिकाचंदनलिप्तगात्रं नीवितकल्प
द्रुम पुष्पमालं ॥२५॥ दृष्ट्वा स्त्रियो राममुपागतं मुदा प्रहर्षवेगोत्कलितोननश्रियः ॥
अपास्य सर्वं गृहकार्यमाहितं हर्म्याणि चैवारुरुहुः स्वलंकृताः ॥२६॥ दृष्ट्वा ह
रिं सर्वदृगुत्सवाकृतिं पुष्पैरकिरंत्यः स्मितशोभिताननाः ॥ दृग्भिः पुनर्नेत्रम
नोरसायनं स्वानंदमूर्तिं मनसाभिरेभिरे ॥२७॥ रामः स्मितस्निग्धदृशा प्रजा
स्तथापश्यन्प्रजानाथ खापरः प्रभुः ॥ जनैर्जगामाशु पितुः स्वलंकृतं गृहं
महेंद्रालयसंनिभं हरिः ॥२८॥ प्रविश्य वेश्मांतरसंस्थितं मुदा रामो ववंदे चर
णौ स्वमातुः ॥ क्रमेण सर्वाः पितृयोषितः प्रभुर्ननाम भक्त्या रघुवंशकेतुः ॥२९
ततो भरतमाहेदं रामः सत्यपराक्रमः ॥ सर्वसंपत्समायुक्तं मम मंदिरमुत्तमं ॥३०॥
मित्राय वानरेंद्राय सुग्रीवाय प्रदीयतां ॥ सर्वेभ्यः सुखवासाय मंदिराणि प्रकल्पय ॥३१
रामेणैवं समादिष्टो भरतश्च तथाकरोत् ॥ उवाच च महातेजाः सुग्रीवं राघवानुजः ॥३२॥
राघवस्याभिषेकार्थं चतुःसिंधुजलं शुभं ॥ आनेतुं प्रेषयस्वाशु दूतांस्त्वरितवि
क्रमान् ॥३३॥ प्रेषयामास सुग्रीवो जांबवंतं मरुत्सुतं ॥ अंगदं च सुषेणं च ते गता
वायुवेगतः ॥३४॥

२१४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जलपूर्णान्शतं कुंभान् कलशांश्च समानयत्॥ आनीतं तीर्थसलिलं शत्रुघ्नो मं
त्रिभिः सह॥ ३५॥ राघवस्याभिषेकार्थं वसिष्ठायन्यवेदयत्॥ ततस्तु प्रयतो वृद्धो व
सिष्ठो ब्राह्मणैः सह॥ ३६॥ रामं रत्नमये पीठे ससीतं सन्यवेदयत्॥ वसिष्ठो वा
मदेवश्च जाबालिर्गौतमस्तथा॥ ३७॥ वाल्मीकिश्च तथा चक्रुः सर्वे रामाभिषे
चनं॥ कुशाग्रतुलसीयुक्तं पुण्यगंधजलैर्मुदा॥ ३८॥ अभ्यषिंचन् रघुश्रेष्ठं वसवो वा
सवं यथा॥ ऋत्विग्भिर्ब्राह्मणैः श्रेष्ठैः कन्याभिः सह मंत्रिभिः॥ ३९॥ सर्वौषधिरसैः
श्चैव दैवतैर्नभसि स्थितैः॥ चतुर्भिर्लोकपालैश्च स्तुवद्भिः सगणैस्तथा॥ ४०॥
छत्रं च तस्य जग्राह शत्रुघ्नः पांडुरं शुभं॥ सुग्रीवराक्षसेंद्रौ तौ धेदतुः श्वे
तचामरे॥ ४१॥ मालां च कांचनीं वायुर्ददौ वीराय संनोदितः॥ सर्वरत्न
समायुक्तं मणिकांचनभूषितं॥ ४२॥ ददौ हारं नरेंद्राय स्वयं शक्रस्तु
भक्तितः॥ प्रजगुर्देवगंधर्वा ननृतुश्चाप्सरोगणाः॥ ४३॥ देवदुंदुभयो
नेदुः पुष्पवृष्टिः पपात खात्॥ नवदूर्वादलश्यामं पद्मपत्रायतेक्षणं॥
४४॥ रविकोटिप्रभायुक्तं किरीटेन विराजितं॥ कोटिकंदर्पलावण्यं पी
तांबरसमावृतं॥ ४५॥ दिव्याभरणसंपन्नं दिव्यचंदनलेपनं॥ अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१५२

युतादित्यसंकाशं द्रष्टुं रघुनंदनं ॥४६॥ वामभागे समासीनां सीतां कांचनसंन्निभां
दिव्याभरणसंपन्नां वामांके समुपस्थितां ॥४७॥ रक्तोत्पलकरांभोजां वामेनालिंग्य
संस्थितां ॥ सर्वालंकारयुक्तो माद्रष्ट्या दृष्ट्वा भक्तिसमन्वितः ॥४८॥ उमया सहितो देवः शं
करो रघुनंदनं ॥ सर्वदेवगणैर्युक्तः स्तोतुं समुपचक्रमे ॥४९॥ श्रीमाहादेव उवाच ॥
नमोस्तु रामाय सशक्तिकाय नीलोत्पलश्यामलकोमलाय किरीटहारांगदभूषणा
य सिंहासनस्थाय माहाप्रभाय ॥५०॥ त्वमादिमध्यांतविहीन एकः सृजस्यवस्यत्सि च
लोकजातं ॥ स्वमायया तेन न लिप्यसे त्वं यत्स्वे सुखे जस्रसुखेन वद्यः ॥५१॥ लीलां
विधत्से गुणसंवृतेस्त्वं प्रपन्नभक्तानुविधानहेतोः ॥ नानावतारैः सुरमानुषा
द्यैः प्रतीयसे ज्ञानिभिरेव नित्यं ॥५२॥ स्वांशेन लोकं सकलं विधाय तं बिभर्षि च
त्वं दधतः फणीश्वरः ॥ उपर्यधो भान्वनिलोडुमौषधीः प्रवर्षरूपोवसि नै
कधा जगत् ॥५३॥ त्वमिह देहभृतां शिखिरूपः पचसि भुक्तमशेषमजस्रं ॥
पवनपंचकरूपसहायो जगदखंडमनेन बिभर्षि ॥५४॥ चंद्रसूर्यशिखिम
ध्यगतं यत्तु तेज ईश चिदशेषतनूनां ॥ प्राभवत्तनुभृतामिह धैर्यं शौ
र्यमायुरखिलं तव सत्वं ॥५५॥ त्वं विरिंचिशिवविष्णुविभेदात्तु कालगु
णकर्मविभागात् ॥ वादिनां पृथगिवेश विभासि ब्रह्म निश्चितमनं

१५२

(३००)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वमिहैकं॥५६॥मत्स्यादिरूपेणयथात्वमेकः श्रुतोपुराणेषुचलोकसिद्धः॥तथैवसिद्धं
सदसद्विभागस्त्वमेवनान्यद्भवतोविभाति॥५७॥यद्यत्समुत्पन्नमनंतसृष्टाउत्पत्स्य
तेयच्चभवच्चयच्च॥नदृश्यतेस्थावरजंगमादौत्वयाविनातःपरतःपरस्त्वं॥५८॥
तत्वंनजानंतिपरात्मनस्तेजनाःसमस्तास्तवमाययातः॥तद्भक्तिसेवामल
त्मामनसानांविभातितत्वंपरमेकमेवं॥५९॥तत्त्वाबुधस्तामिदमेवरूपंभक्त्या
भजन्मुक्तिमुपैत्यदुःखः॥अहंभवन्नामगृणन्कृतार्थोवसामिकाश्यां
मनिशंभवान्या॥६०॥ब्रह्मादयस्तेनविदुःस्वरूपंचिदात्मतत्वंबहिरर्थ
भावाः॥६१॥मुमुषुमानस्यविमुक्तयेहंदिशामिमंत्रंतवरामनाम॥इमंस्तवं
नित्यमनन्यभक्त्याशृण्वंतिगायंतिलिखंतियेवै॥६२॥तेसर्वसौख्यंपरमंच
लब्ध्वाभवत्पदंयांतिभवत्प्रसादात्॥इंद्रउवाच॥रक्षोधिपेनाखिलदेवसौख्यं
हृतंचमेब्रह्मवरेणदेव॥पुनश्चसर्वंभवतःप्रसादात्प्राप्तंहतोराक्षसदुष्टश
त्रुः॥६३॥देवाऊचुः॥हतायज्ञभागाहतादेवदत्तामुरारेखलानाद्यदैत्येन
विष्णो॥हतोद्यत्वयानोविमानेषुभागाःपुरावद्भविष्यंतियुष्मत्प्रसादात्॥६४॥
पितरऊचुः॥हतोद्यत्वयादुष्टदैत्योमहात्मन्नृगयादौनरैर्दत्तपिंडैःद्विको

307

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्नः॥ बलादनिहत्वा गृहीतास्समस्तानिदानीं पुनर्लब्ध्वा सर्वा भयामः॥ ६५॥ य
क्षाः ऊचुः॥ सदाविष्टकर्माण्यनेनापि युक्ता वहामो दशास्यं बलाद्धस्तयु
क्ताः॥ दुरात्मा हतो रावणो राघवेण त्वया तेन वयं दुःखजालाद्विमुक्ताः॥ ६६॥
गंधर्वा ऊचुः॥ वयं संगीतनिपुणा गायंतस्ते कथामृतं॥ आददे मन्नसं
हृंरिक्ता पूर्णा स्थिता पुराः॥ ६७॥ पश्चाद्दुरात्मना रामरावणेनापि विह
ताः॥ त्वामेव गायमानाश्चलदाराधनलसराः॥ ६८॥ स्थितास्त्वया परित्रा
ताः हतोयं दुष्टराक्षसः॥ एवं महोरगाः सिद्धाः किंनरा मरुतस्तथा॥ ६९॥ व
सवो मुनयो गावो गुह्यकाश्च पतत्रिणः॥ सप्रजापतयश्चैव तथा चाप्स
रसां गणाः॥ ७०॥ सर्वे संसमासाद्य दक्षानेत्रमहोत्सवं॥ स्तुत्वा पृथक्
पृथक् सर्वै राघवेणाभिवंदिताः॥ ७१॥ ययुः स्वस्वपदं सर्वे ब्रह्मरुद्रा
दयस्तथा॥ प्रत्रसंतोसुदारामं गायंतस्तस्य चेष्टितं॥ ७२॥ ध्यायंतैस्वा
मात्मरूपेकार्थेहि सीतालक्ष्मणासंयुतं॥ सिंहासनस्थं राजेंद्रं ययुः स
वेदविदिस्थितं॥ ७३॥ खेवाद्येषुप्ध्वनत्सु प्रमुदितहृदयैर्देववृंदैः रक्ष

॥१५८॥

K.K.S.U. LIBRARY RAMTEK Dist Nagpur M1128 302

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=27.08.20 15:01
,TRANSFERRED=2020/08/27 at 15:50:39
,PAGES=303
,TYPE=STD
,NAME=S0003555
,Book Name=M-1128-ADHYATAM RAMAYAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
,FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF
,FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF
,FILE265=00000265.TIF
,FILE266=00000266.TIF
,FILE267=00000267.TIF
,FILE268=00000268.TIF
,FILE269=00000269.TIF
,FILE270=00000270.TIF
,FILE271=00000271.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE272=00000272.TIF
,FILE273=00000273.TIF
,FILE274=00000274.TIF
,FILE275=00000275.TIF
,FILE276=00000276.TIF
,FILE277=00000277.TIF
,FILE278=00000278.TIF
,FILE279=00000279.TIF
,FILE280=00000280.TIF
,FILE281=00000281.TIF
,FILE282=00000282.TIF
,FILE283=00000283.TIF
,FILE284=00000284.TIF
,FILE285=00000285.TIF
,FILE286=00000286.TIF
,FILE287=00000287.TIF
,FILE288=00000288.TIF
,FILE289=00000289.TIF
,FILE290=00000290.TIF
,FILE291=00000291.TIF
,FILE292=00000292.TIF
,FILE293=00000293.TIF
,FILE294=00000294.TIF
,FILE295=00000295.TIF
,FILE296=00000296.TIF
,FILE297=00000297.TIF
,FILE298=00000298.TIF
,FILE299=00000299.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE300=00000300.TIF
,FILE301=00000301.TIF
,FILE302=00000302.TIF
,FILE303=00000303.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection